
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥सटीकश्रीगीतगोविंदप्रारंभः॥

श्रीगणेशाय नमः ॥ श्रीजयत्तमल्लोकसद्गुरवे नमः ॥ श्रीराधाकृष्णाभ्यां नमः ॥
संभ्रांतो राधिकाया नयनविलसिते विभ्रमद्भूविलासैः किंजल्कव्रातकांतैः कन
कनिकषवसनट्टमंजुच्छटः सः ॥ बिभ्राणो मंजुकेलीर्मधुरमधुरया याराधया कृ
ष्णाचंद्रः कंदर्पाल्हादवर्धी जयति घनवनेवृंदयालक्षितः सः ॥१॥ इह खलु सकल
नवबल्लवीवृंदवदनेंदीवरग्रासाधरमधुरमधुरमूर्तिः श्रीमद्वृंदावनेश्वरीस्त
नकुंडलेमेमकरीविरचनाकलितकरकमलदलानंदकंदलितमकरध्वजादेशा
चलितयोः श्रीमत्कालिंदीतटासंबधिनाथवीव्रततिस्फुटत्कुसुमकदंबसौगंध्य
लुब्धसच्चंचरीककपटलीध्वनिकलमाधुरीमुग्धसप्तस्वरगुणगणे विविधनि
कुंजे मंजुलद्रुमछनवनेवलंबिनि [illegible]दर्पकोटिलीलासरसजलधिनिमग्नहृ
दयश्रीमद्वृंदावनकिशोरीकिशोरशेखरचूडामण्योः श्रीराधामोहनयोः सम
स्ततज्जनहृत्केरुहानंदसंवर्धिनी विहारमाधुरी सत्स्वरूपये ववर्णयितुं श्री
मज्जयदेवनामा कविरिष्टदेव[illegible]रणलक्षणं मंगलमाचरंति तच्चायो
ग्योप्ययं जनैः तदनुगतत्वेनै[illegible]ष्ट ॥ मघैरित्यादि ॥ जयंति सर्वोत्कर्षेणा
वर्तते । श्रावृता श्राकृतेभ्योली[illegible]रूपयोरतिरेकात् । उक्तंच । कृष्णस्तु भगवा
न्स्वयमिति कास्ताः रहकेल्[illegible]तत्क्रीडाः गृहोगृह्वरसे[illegible]हकेलय एकां
क्रीडाइतिवा सुजातिर्यं विज्ञा[illegible]भ्योपि[illegible]वनरा[illegible]ययासहकेलीनामु
त्कर्षो निरूपितः । उक्तंचायं न्योविहाय गोविंदः मीतो यामनयदहन्याति ॥ श्रीकृ

3

रहः एकांतेसतिर
अथवा॥ केलयः सुरतक्रीडाः प्रकरणवसालास्मिन्सति रहः एकांतेसतिर
कांतार्थेरहोव्ययमिति॥ सखीभिरपि किंचित्स्वव्यधाने नस्थितत्वात्॥ वक्ष्यतिच या
तेगेहाद्बहिरवहितालिपरिजनदूति॥ जयंतीत्यनेन नमस्करणीयत्वमुक्तं॥ तेननम
स्क्रियया काव्यमुखं द्योतितं॥ आशीर्षि लिङ् [illegible] तिलोट् चलिङ् विधानात्॥ आ
शीश्च भगवतीदं आशीर्वादरूपं मंगलं भक्तप्रेम्णेव सगच्छते परमकल्याणरूपत्वा
त्॥ केलयइत्यनेन कथालक्षणं वस्त्वपि निर्दिष्टं॥ एवं महाकविना त्रिविधमपि काव्य
सुखं समुन्मीलितं भवति॥ तथाच जयंतीत्यनेन वर्त्तमाननिर्देशात् केलीनां नित्य
संप्राप्तिपादित्तं केलयइत्यनेन बहुवचनेनानंतत्वदर्शितं॥
मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे
गृहं प्रापय॥ इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधा
माधवयोर्जयंति यमुनाकूले रहः केलयः॥१॥
कायमुनाकूले केवलीलोपासनयापरमैकांतिकं स्फुटमेवतासास्थानं दर्शयति॥
यमुनायाः कूलं तटं तेनतत्र॥ प्रत्यध्वकुंजद्रुमं॥ अध्वानश्चकुंजाश्चद्रुमाश्च अध्वकुंजद्रुमाः तान्प्रति
लक्षणेनाभिप्रति॥ तिसमासः॥ अध्वनि द्रुमे कुंजइत्यर्थः॥ अनेन महाविलासित्वं कथितं॥
जद्रुकं चापल्यसीमेतिकर्णामृते॥ तथाचाध्वादिषु केलयः यथा॥ कस्याः पदानि चैतानि
यातायानंदसूनुना॥ असन्यस्तित्र कोठायाः करेणोः करिणा यथा॥१॥ नलक्ष्यंतेपदा
न्यत्र नस्यान्नूनं तृणांकुरैः॥ खिद्यत्सुजातांघ्रितला मुन्निन्ये प्रियसी प्रीयः॥२॥ इमान्य
धिकमग्नानि पदानि वहतो वधूं॥ गोप्यः पश्यत कृष्णस्य भाराक्रांतस्य कामिनः॥३॥
अत्रावरोपिता कांतापुष्पहेतोर्महात्मना॥ अत्रप्रसूनावचयः प्रियार्थे प्रेयसा कृतः

प्रपदाक्रमणे एत्तेपर्य्येता स कपदे॥ केन्नासाधर्नैस्तत्र कामिन्याः कामिना कृतं॥ प॥ त्तानि
चूडयता कांत्तामुपविष्ट मेह ध्रुवमिति श्रीभागवतं॥ अथवा॥ प्रियसखिपरिरंभना
भिमुख्यानुबंधादन्नीं रत्नाविनिवेशान्नर्मलीलयोर्जितानि॥ इयमचिषमैदंन्यासत्ते
जलगो सौपदत्तति रीह राधाकृष्णयो रातनोति॥१॥ मनोहारीहारस्खलित मा
भिसार तरलैपरिम्लायन्मालयामिलितपुरटालंकृतिगणः॥ अयं कुंजस्तल्पी
कृतकुसुमपुंजप्रणयवां सर्मंतादुत्तुंगं पिशुनयत्तिरंगं सुरभिदरइत्ति॥ यमुनाकू
इसनेन संभोगश्रमहरणा यन्नोन्निर समीर पश्चाघचचयजलके त्यादि संपत्ति
दर्शिता॥ कयोःराधामाधवयोः॥ राधसाधसंसिद्धौ॥ राध्यते साध्यते संसिद्धः
प्राप्यते स्वसौदर्यादिगुणैः तादृशनायकसिरोमणेराकांक्षितमनयोत्ति राधा॥
अथवा॥ राध्यते साध्यते च वशीक्रियते स्वासाधारणानुरागमाधुर्यकौशीलेनाशे
षनायकचूडामणिरनयेत्ति सा राधा तथाचोक्तं॥ अनया राधितो नूनं भगवान्हरि
रीश्वरः इति भागवते॥ अनेन नान्नैवाशेषनायिकागुणाः॥ कथिता मा श्रियं शोभां
वैकुंठेश्वरीवा॥ धुय कंपने॥ पचाद्यच॥ धुनोत्ति निजसौदर्यादिगुणैः कंपयति स्वप्र
वणां करोतीति माधवः॥ यथाह लीलाशुकना॥ यसादकल्पतरूपल्लवशेखरेषु ली
ला स्वयंवरर संलभते जयश्रीरति॥ लीलया शृंगापरमविक्रमेण जयश्रीः सचीति
ना॥ यिनी शोभेत्ति॥ अथवा॥ जमस्य विष्णोः प्रसिद्धा महिषी लयः भुर्तुर्वभूसि नियमे
वस्थिति लक्षणः॥ सौभाग्याकर्षस्तपुरुकेतिव[illegible]वाश्रीर्यत्तशाबुनरजश्रकेमेतु
लस्यालब्धापि वक्षसि पदमिति॥ यद्वाछया श्रीलीलनाचरत्तपो विहाय कामानू सुचि
रं धृतव्रतेति॥ अथवा॥ मायाः सौंदर्यादिगुणसंपत्तेधवएति माधवः॥ धवः पतिः प्रियो
मर्त्तसन्निधानात्॥ मधौ मधुचंद्रोद्भवो माधवचन्द्रि[illegible]॥ अथवा॥ मधौ मधुरसंभवो
पाधवः॥ वदयति॥ शृंगारः सखिमूर्तिमानि[illegible]॥ मधौ वसंते भवो माधवः॥

स्मर इति वा ॥ न च मन्मथ इति सूत्रेण णिओ गुण इति गुणः ॥ तथा चोक्तं ॥ सासान्मन्म
थ मन्मथः ॥ स्त्रीणां स्मरा मूर्तिमानिति वा ॥ एभिर्व्याख्यानैर्नायकस्य गुणाः कथि
ताः ॥ राधा च माधवश्च राधामाधवौ तयोः ॥ तथा लक्ष्मीकाम्यमनोपि श्रीराधाया
मासक्तो बभूवेति तस्याः परमोत्कर्षो निरूपितः ॥ तन्नचानि गुरु गुणगण गौरवेण
कामकेलिषु नायिकायाः प्राधान्यात्तस्याः पूर्वनिपातः ॥ अस्याश्च नरमिति वा ॥
आस्तिकामुकोयं नायकश्च ॥ तदुक्तं ॥ श्यामां परस्त्रियं प्राप्य चुंबनालिंगनादिभिः ॥
न वांछ्यजनयन्भावान्स स्यादास्तिककामुक इति ॥ केचित्तु योग्यो विना भगवच्च क्रीडासं
वात् गोपिषु लक्ष्मीत्वमापादयंति ॥ तत्तु रुक्मिणी कृष्णजन्मनि नितितस्याः पृथक्कृमि
र्दर्शनात् ॥ नायं स्त्रियो गत नितां नरतेः प्रसाद इति निषेधाच्च न संगच्छते ॥ किंच मूल
प्रकृतिरुक्मिणीत्युपनिषद्वचनात्तु रुक्मिण्याः पूर्णत्वमेव गम्यते ॥ ततो पि गोपी
नां भावाधिक्यश्रवणात्तन्मात्रांकनीयमिति ॥ तद्यतो ॥ मद्राच मापुरपि नित्ययुजा
दुरापमिति ॥ नित्ययुजां पातिव्रत्य सविधानं न नित्ययुतानां महिषीणामित्यर्थः ॥
अन्यच्च ॥ यद्यपि नित्याद्वितीयवल्लभौ श्रीराधामोहनौ ॥ तथाप्यन्येन पराकीय
त्वाभासेन शृंगाररसस्य परप्रतिष्ठाध्वनिता ॥ सदुक्तं ॥ बहुवार्यते यतः खलु यत्र प्रच्छ
न्नकामुकत्वं च ॥ या च मिथो दुर्लभता सा च परमा मन्मथस्य रतिरित्याह भरतः ॥ या
मना दुर्लभत्वं च स्त्रीणां या च निवारणा ॥ तदेव पंचबाणस्य मन्ये परममायुधमि
ति रुद्रः ॥ शृंगारतिलके च ॥ अनन्यच्चाणोरे स्वीया धनहर्यपिणां गना ॥ अस्याः स्त्रके
वलं प्रेमतेनैषा रागिणी मनेति ॥ किं लक्षणयोः राधामाधवयोः इत्थं वक्ष्यमाणप्रका
रेण नदत्रिदेव्रातस्खलितयोः ॥ लोकानुसारतस्तद्रूप्यावदनिदेवतइति ॥ कदाचित्तु श्री
राधया श्री[illegible] संबंधयोगेन असंकोचव्यवहाराद्वस्तुतः ॥ संगमतृष्णावैयस्य व्रजे गोदोहन

मानीतः तस्मिन्नेव च समये तन्निकटे स्वव्रजे श्रीव्रजेश्वरस्य गमनं जातं तत्र प्राणकोटिप्रि
पुत्रे[illegible]धागमं च दृष्ट्वा प्रणयकोपोत्स्याह ॥ हे वत्से राधे यत्त्वयायमानीतस्तस्मात्त्वमेवे
मं गृहं व्रजं प्रापयेति वचनोपक्रमेणैव तन्निदेशात् स्वाभीष्टसिद्धिश्चिलं ये नैव कदा
चित् क्रीडाप्रतिबंधकं केचनजनं न प्रस्थापयेन्नायदास्यतीति च लितयोः मे घैरित्याघुक्तका
ल देशासंपत्योर्दीप्तिता: केलयः यमुनाकूले अध्यकुंजद्रुमं प्रतिजयंतीत्निामेघादीनां श्री
व्रजनाथदर्श्यैव भयानकहेतुत्वं तयोरसिकशिरोभूषणभूतयोः स्त्र श्रृंगाररहेहेतुत्वाच
नित्यं। तथा च लोके प्रसिद्धः। वृषभानोर्गवां श्रीकृष्णवत्सलानां दोहनं श्रीकृष्णः करोति
भगवत्प्रियाणां श्रीव्रजेश्वरस्य गवां दोहः श्रीदामादिना क्रियत इति केचिच्चि नंदनिनाम्नी
काचित्सखी न स्यादेशातः वचनादिति व्याकुर्वंति तद्वते स्वप्रसिद्धनामकल्पनया न स्त्रीकार्यी
यथानुकारीत्वयमर्थः। नंदयतीति नंदः। नंदिग्रहीपचादिभ्यो ल्युणिन्यच इति बहुलोक्तेस्व
नंदश्चासौ निदेशश्च आनंदकारि निदेशः स्वाभीष्टक्रीडायां प्रवणत्वात् ॥ कस्याश्चिद्राधाया
प्रियस्वयचर्याभाषणं न मोक्तिस्तस्मात् सख्या रसपोषकत्वात् ॥ तस्या लक्षणं यथा। स्वात्मनो अ
धिकं प्रेम कुर्वाणा न्योन्यम छलं ॥ विश्रंभिणी वयोवेषादिभिः स्त्रत्वो सखी मता। मिथः प्रेमगुण
इति कीर्तिस्तमोरासक्तकारिता ॥ अभिसारो द्वयोरेव सख्याः कृष्णसमर्पणं। नर्मविश्वासने पथ्यं ह्र
दयोद्घाटपाटवं। छिद्रसंरक्षितिस्यापत्यादेः परिवंचना ॥ शिक्षा संगमनं काले सेवनं व्यजनादिभिः।
तयोर्द्वयोरुपालंभसंदेशप्रेषणं तथा। नायकप्राणसंरक्षा प्रयत्नाद्या सखीक्रिया इति ॥
च लितयोः तमेव प्रकारमाह। हे सखि राधे त्वं तस्माद्वेतादृमं त्वन्मुखचंद्रहीने क्षणचको
रं त्वमेव गृहं प्रापय ॥ क्रीडानिकुंजं प्रापयेत्यर्थः ॥ अखिलभोग्यास्पदत्वेन गृहमि
त्युक्तं ॥ तेन च संभोगसंपत्याएनं सुखयेति गूढाभिप्रायः ॥ त्वमेवेत्यन्ययोगो निरा
कृतः ॥ अथवा गृहं प्रापयेति सामान्यनारीव्यावृत्या गृहिणी निर्विशेषसंभोगादिकमपि
समुदिता भवेत्यर्थः ॥ अत्र गृहशब्देन तास्यात गृहिण्युच्यते। गृहशब्दच्छलेन तामेव

पुरस्तस्य वनविहारदर्शनात्॥ प्राप्नोतिरदमाधवं वर्तते। अलोभादय युक्तिष्विति चूडामणिः॥
एवकारोऽन्ययोगव्यावर्त्यर्थः॥ त्वयैवायं गृहिणीमानस्यादितिसस्यागूढपरिहसितमिति कु-
मकणोक्तः॥ तस्मादिति किं। यतोऽयं तवाधीनो जनो भीरुः मदनवेपित एभिर्भाविहेतुभिः
स्मरव्यारहतीः सोढुमसमर्थः। अत्र नक्तं भीरुरिमं त्वमेव गृहं प्रापयेत्यत्र इदमोऽन्वादेशे द्वितीया
टौस्वेनद् इति सूत्रेण एनादेशः कथं न भवति। भिन्नवाक्ये अन्वादेशविषयत्वाभावात् एकक्रियावि-
शिष्टत्वेन कथितस्य पुनः क्रियान्तरविशिष्टत्वेन कथनमन्वादेशः। इह तु नक्तं भीरुरसेनैव
भीरुत्वविशिष्टतया निर्दिष्टस्य माधवस्वरूपेण पुनः क्रियावैशिष्ट्यं प्रतिपाद्यते। ततः क्रियान्त-
रविशिष्टत्वाभावान्नेहान्वादेशः। तानेव भावानाह। अंबरमाकाशं मेघैर्मेदुरं सान्द्रं स्निग्धवर्त्ति-
ते। अपरं तमालद्रुमैः कननभुवः श्यामा वर्तन्ते। नक्तं रात्रिकालः एवं देशकालवस्तुलक्षणादि-
भाषासूचिताः तथाच सद्भावानां श्यामत्वेन शृङ्गाररसरूपत्वं ध्वनितं उक्तं च श्यामो भवति शृङ्गा-
र इति। किं च वनभुवश्यामा इति नायिका सोऽहर्चयत मालद्रुमैर्मेघैश्च नायकस्येति तथा चोक्तं। प्रेम
प्रवृक्षउ दितः कुसुमावलीभिः सख्युर्व्यधात्स्ववपुषा व्यदधात पत्रमिति। अत्र काव्ये शृङ्गार प्राधा-
न्यात तं स्यमेघाद्यास्तमोप्युद्दीपनविभावाः राधाद्याश्चालंबनविभावाः। भीरुरित्यनुभावरसं
विषयतां नयन्तीति ते अनुभावाः फलं निसंवेधिसंसच चतुर्धा कायिका भुजक्षेपादयः। मानसा प्रमो-
दादयः। नाट्ये चतुर्भुजसंज्ञानादय आहार्याः सात्त्विकाः रोमाञ्चादयः शृङ्गारानुवर्तिभोः। हर्षवेगसौको-
त्सुक्यस्त्रीराच पलादयः। व्यभिचारिणस्तत्र भवन्ति एवं कार्यकारणसहकारिभिः रतिस्थायीभावः
सकलरससम्राड् रसप्रपंचः संयोगाख्योऽभिलाषि व्यावृत्यालक्षणोऽचिमलं भास्यश्च शृङ्गारः
सांगोपांगा समभिलिप्तो भवति। तदुक्तं कारणान्यथ कार्याणि सहकारिणि यानि च रत्यादेः स्था-
यिनो लोके तानि चेन्नाट्यकाव्ययोः॥ विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः। व्यक्तः स तैर्विभा-
द्यैः स्थायिभावो रसः स्मृतः। तथा चाभाभिनिरत्ते न विभावानुभावव्यभिचारिसंयोगाद्रसनिष्प-
त्तिरिति। एवमेव कविना रसमुख्येय्यि रिकृते तदाश्रयं बुध्वा केयिकैश्चिन्नायकस्य श्रीकृष्णत्वं नायि-
कायाः प्रौढत्वं शृङ्गाररसविभावानां भयानकहेतुत्वं पितृश्च निदेशः इति व्याकृतं। तदाकवि

गीत० ॥४॥

निरूपितरसस्यान्यथात्वमुपपद्यते। तेन पूर्वव्याख्यानमेव समीचीनं। अथवा निदेशो भाषणं देशात् सामीप्यार्थे यत्तते इति नंदनिदेशात्। नंदसामीप्यात् नंदनिदेशात् व्रजाद्धा॥ अथवा तु भयोर्यत्र संगमो जातस्तदेवाल्हादकारि श्रीमद्वृंदावनात् तरं दन्वा विशेषस्तस्मात् पक्षत्रयोपि श्रीकृष्णो करनुचलितयोरित्यर्थः। त्रैतेकातर्येण सोढा स संबोधयति हे राधेति इमं मल्लक्षणं जनं अयं मल्लक्षणो जनो भिरुः तव पार्श्वस्यकुमसमर्थ इति॥ अत्रानुकूलो नायकः स्वाधिनपतिका नायिका तयोर्लक्षणं वक्ष्यते ग्रे। पूर्वार्द्धे भिलाषलक्षणो विप्रलंभः अपरार्द्धे संभोगश्चशृंगारः॥१॥ कवितामावितांतःकरणः शृंगारोत्तर प्रबंधं कर्तुं प्रतिजानीते॥ वाद्वेवतेत्यादि जयदेवकविः। जयः श्रीकृष्णः तं घोतयति महाभाग्यवता तद्रहस्योपासने प्रवर्तकत्वेन प्रकाशयत्यसौ जयदेवः तेन प्रकाशमानो या अत एव कविः अथवा जयश्चासौ देवश्च जयदेवश्च यं जे देयो भगवान्स्वयमेवास्मिन ग्रंथे जयदेवव्यपदेशेन कविरित्यर्थः। जयेन श्री राधिका विजयेन दीव्यतीति जयदेवः सचासौ कविश्चेति वा। एतं गीतगोविंदाख्यं प्रबंधं प्रकर्षेण बध्यतेस्मिन् श्रोतृणां हृदयमिति प्रबंधस्तं करोति॥ तत्र हेतुगर्भं विशेषणद्वयं श्रीः वरांगणी राधा। व्यथवा श्रित्र सेवायां क्विप्‌ वीति क्विपदीर्घःसंप्रसारणं च श्रयते एतां श्री कृष्णोरसार्थमिति श्रीः श्रीयते नेनेति श्री सा श्रीः राधैव वसुषु दिव्यतीति वसुदेवो नंदः उक्तंच द्रोणो वसूनां प्रवरदत्यादि वसुभिर्द्रा व्यतीतिवात स्यापत्यं वासुदेव श्रीकृष्णः। अनेन धनाढ्य इति नायक गुणः कथितः॥ अथवा वसनिवासे च सस्यस्मिन्वृंदावने श्री राधांगणे वा इति वासुः। अथवा धातूनामनेकार्थकत्वात् वासयति सर्वमिदं स्वविलास प्रदिमलेनेवासुः ओणादिक

॥४॥

गोविं

उणप्रसयः स्वसौदर्यादिगुणे दीव्यतीति देवः द्योतयति सर्वमिति वा। निजकौ
शल्लेन सर्वान्विजयत इति वा। अथवा। श्रृंगाररसेन रुचिमान् स्त्रियो जनान्मोचय
तीति वा स्वविलासेन स्त्रियं तत्र नान्मदयतीति वा दैत्ये हर्षवानिति देवः। दिवु क्रीडा वि
जिगीषा व्यवहार द्युति स्तुति मोद मद स्वप्न कांति गतिषु इति। विलासवानुगुणवा
न् सर्वान्ति गायी शृंगारवान्मोदमानश्चेत्यर्थः च सुश्रासौ देवश्च वासुदेवः तयो
श्रीवासुदेवयोः रतिकेलिकथया सुरतक्रीडानुवर्णनेन समेतं युक्तं रतिरनुराग

।।वाग्देवताचरितचित्रितचित्तसद्मावतीरमणचारणचक्रवर्ती।।

स्तेन केलिषु यन्नागारयोः संवादस्तत्सहितमिति वा। ननु तयोः अत्यद्भुतानुरागिणोः
स्त्रियादिभिर्दुर्वितर्क्यालापज्ञाने कथमस्याधिकारस्तत्राह किंलक्षणः कविः वाक्
सौदेवताचेति। वाचां देवतेति वाग्देवता परासरस्वती तस्याश्चरितेन प्रसादमाधु
र्यादिगुणसंपन्नलोकोत्तरकाव्यरचनाविशेषरूपेण चित्रितं चित्तरूपं सद्म यस्य तादृ
शः अत्र विचित्रभगवद्गुणवर्णनेन विचित्रकवितारूपमहाधननिधानत्वेन समस्त
भक्तजनविश्रामसुखाश्रयत्वेन चित्तस्य गृहसाम्य। अथवा यतो वाचो निवर्तन्त इति श्रु
तेः तदगोचरत्वादयमर्थः। वाग्वर्णनीयभगवद्गुणरूपा या वाणी सैव परमपुरुषार्थत्वे
नेष्टदेवता तस्याश्चरितेनी विर्भावनन्नित्यानंदरूपत्वात्।। चित्रितं आश्चर्य
युक्तं कृतं चित्तमेव सद्म गृह यस्य जयदेवः वा कूपरासरस्वती तस्या देवता सर्वत्ति

मत्वनसर्वोपास्यतया श्रीराधाप्रियैस्तच्चरितेन विलासेन त्रितमालेख्ययुक्तं कूलं चित्तं स
म्भचेयस्येतिवा। अपरमपि गृहं विचित्राले ख्यमंडितं भवतीतिध्वनितं। तथा चास्य गृहम
पि भगवत्ता साक्षाद्दाविर्भावेन परमगोप्यमपि स्वहस्तलिखीतेन मंडितमिति भागवतेप्र
सिद्धं। ननु कथं तादृशप्रसाद भाजनत्वमस्येति अतआह। पुनः किं दृशः पद्मं करेयस्याः
सा पद्मावती। नूरादीनामिति दीर्घः सर्वसौभाग्यसमन्विता श्रीराधा पद्मा भगवद्वृ
चक्रवर्ति सर्वाधिकः तेन प्राप्तं प्रसादपात्रत्वमित्यर्थः॥ अथवा चरणयोर्विषयपूज
रेव चारणचक्रवर्तिनर्तकश्रेष्ठ इत्यादिना सदा तत्तदाराधनपरः। अथवा ए
करणकांति विधित्ते यस्याः सा पद्मावती तिया। तस्याश्चरणयोः चारणेन परिचर्यया

श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधं॥२

मावती तस्य पत्नी तस्याश्चरणयोश्चारणनर्तनं तेन चक्रवद्भ्रमितुं शीलमस्या सौ तादृ
शः। एतेन तद्भक्त्याधिक्यं कवेः सूचितं। यथाहात्वोगयुक्ता हि गणयंति न लौकिकमिति
लौकिकश्चायमर्थः॥ चरणयोश्चरति। परिचरतीति चरणचारणा पद्मावसेचरणा पद्माव
सेचरणचारणाचरणसे विकायस्य सचासौ चक्रवर्ती मुख्यश्चेसदृति॥ तस्य शृंगारित्वं कथितं
तेनयसरसकाव्यकरेणः धिकारः॥ उक्तं च शृंगारी चेत्कविः काव्ये जातरसमयं जगत्‌स एव चे
दशृंगारी सर्वं विरसतां व्रजेदिति। अलेख्याश्चर्ययोश्चित्रमिसमरः॥ चारणास्तु कुशील
वाइत्यपि कविः काव्यकरेश्शूराचितिविश्वः॥२॥ यदीत्यादि हे सज्जनगणा यदि हरिस्म
रणे कृष्णानुचिंतनमनः॥ अखिलभुवनयुवतिचित्तचोरेऽन्यविग्रह व्यावृत्या
श्रीमत्कमनीयकिशोर व्रजेंद्रनंदने भक्तिरित्यर्थः॥ उक्तं च। गोविंद एव निखि
लात्मनिरूढ वो भोइति॥ किंच। भक्तिरेव भजनं तदिहामुत्रापाधिरादयेने

वामुष्मिन् मनः कल्पनमत्त देवनैष्कर्म्यंतिनिनापिन्यां॥ तत्रापि सरसं रसः शृंगारः
तत्सहितं। यदि च। विलासकलासु विलासः स्त्रीणां भगवत्प्रेयसीनां राधादीनां हा
वविशेषः तत्संबंधिनीषु कलासु क्रीडासु चकुतूहलं कौतुकं। तात्कालिको विशेषस्त
विलासो गात्रक्रियादिष्विति। दुतत्क्ते। स्खलति बहुलं पदान्यासे विलोकितमन्यतः स्थि
रमपि नदा वक्त्रां भोजं प्रयासबंधुननं स्मितमपि सुधार्थः क्रोधो वृथैव च निष्कृ
तिः दयितस विघं यां त्या स्तच्या विलासरसोप्युद्दीप्तियमिति। एतेन भगवत्सरिज
नेषु भक्तिरुच्यते। कलाचंद्रकयोंलीचकलास्या क्रीडनादिष्विति विभ्यः तदाजय
देवकवः सरस्वती वाणिं शृणु आकर्णये सर्थः। अथवा हे दाः ददतीनिदा बहुधी
नेन पुण्यानि न्ायनं तः। शृणुत। अत्यादरेणावधारयते कला

मदिहरिस्मरणे सरसं मनो यदि विलासकलासु कुतुहलं॥

सुचतुःषष्टिकलासुरतिकलासु चतुःषष्टिश्चेत्थं॥ हसितं पठितं गीतं जणितं नर्त
नं तथा। वीणा वेणुर्यचिं तालः पुस्तकज्ञाने मायुषो वेदः॥१॥ धनुर्वेदश्च शिक्षा च रा
जनीक्षा च राजनीक्षा च रत्नयोः शिक्षा कल्पो व्याकरणं छंदो ज्योतिर्निरुक्तकं॥२॥ प
रिभाषा पुराणं च स्मृतिरामापेणं तथा॥ महाभारतमाख्यानं राजलक्षणवेदनं॥३॥ नि
युद्ध युद्धोत्तरणं भूततंत्र प्रहेलिका। सर्वांशी विषसंरोधो भूमिदष्टिश्च साधुनं॥४॥ शाकमें गि
तयोर्ज्ञानं तथा द्रव्यापकर्षणं। चिंतानिवर्तनं पुष्टिवर्तनं पिंडकर्षणं॥५॥ देशभाषापरिज्ञाने
शुभांगीकरणं तथा। विद्वेषणोच्चाटनोच्चमणिवस्त्रादिमंडनं॥६॥ विकल्पोच्चारकरणं विचित्रकर
मर्दनं। लिखितं चित्रकविता राजनीतिस्तथा परा॥७॥ सभापांडित्यतूर्यं दुर्गसेनारिवीक्षणं॥ अ
गसंवाहनं चारुदर्शनं चोरलक्षणं॥८॥ प्रसादनं तुरुष्टे स्त्रीचित्तहरणं तथेति॥८ कीदृशां जयदेव

गो

सरस्वती। मधुरकोमलकांतपदावलीं शृंगाररसकुर्यान्मधुरा झटिति बोधकत्वा कोमला
सुकुमारा गेयत्वा कांता कमनीया। मधुरा चासौ कोमला चासौ कांता च पदपरंपरा यस्याः स्ता
दृशीमिसर्थः॥ तत्र मधुरा यथा। मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः। येन माद्यंति धी
मंतो मधुनेव मधुव्रताः॥ इति दंडि। सुप्रयोगे महत्स्वे द्वे युक्तमस्य एष सिद्धिभिः॥ सुकुमारार्थसंयुक्तं
सुमारं प्रश्रुते। इति लिलारविंदे। यन्मनःश्रोत्रविषादं प्रल्हादजनकं भवेत्। शब्दबंधानुयोगेन तत्
कांतमिति कीर्तितं। तथा च मधुरत्वं द्विविधं। शब्दाश्रितमर्थाश्रितं च। तत्र शब्दमधुरं त्वपृथक्पा
दत्वं। अथ मधुरत्वं चोक्तिवैचित्र्यं कोमलत्वमपि द्विविधं। बंधस्यापरुषत्वं शब्दकोमलत्वं। अर्थको
मलत्वं पुरुषेष्वप्यर्थपरुषत्वं। तद्यथा। मृते यत्रः शेषद् इति। एवं कांतत्वमपि। बंधविशेषादिना मनः
श्रोत्रप्रीतिप्रदत्वं। उज्वलत्वं शब्दाश्रितं। अर्थाश्रितं। दीप्तरसत्वं। शृंगारादौ रसे वीर्ये गुणे रागेंद्रवेरस
रसमरः॥ एभिः पदैर्विषयप्रयोजने संबंधाधिकारिणो दर्शितः॥ रहःकेलय इति जयति तिविष
योदर्शितः॥ उक्तगुणवतो श्रीराधामोहनयोः उक्तलक्षणाभक्तिः प्रयोजनं।

मधुरकोमलकांतपदावलीं शृणु तदा जयदेवसरस्वतीं॥ ३॥

प्रतिपाद्यप्रतिपादकभावलक्षणः संबंधः॥ उक्तलक्षण एतद्रसभावितांतःकरणोऽधिकारी। एवं च
त्वारो निरूपिताः॥ ३॥ इदानीं ग्रंथनिर्दोषत्वाय प्रामाण्यापादनाय स्वकेन चिन्महाभागवतेन महाकवि स
मायां वर्णितं पद्यं संगृह्यते॥ वाचः इत्यादि। उमापतिधरनामा कविः॥ लक्ष्मणसेनाभासो वाचः पल्लवयति।
विस्तारयति। व्यंग्यार्थशून्यं शब्दार्थगुणशून्यं वास्य कवित्वमिति सूचितं। शरणः शरणनामा कविः दुरूह
स्य विषमार्थकाव्यस्य द्रुतिप्ररचने श्लाघ्यः॥ स्तुत्यः॥ गूढार्थत्वादि दोषयुक्तं प्रसादादिगुणरहितं तस्या
पि काव्यं चेति। तथा च शृंगाररस एवोत्तरः॥ श्रेष्ठो यत्र शृंगारेणोत्तरं प्रधानं वा यत्र संतप्रमेयं न स्यरस्व
नैः कविताग्रथनैराचार्यगोवर्धनस्पर्धि गोवर्द्धनाचार्येण सह स्पर्धा वा नूनं विश्रुतः न ख्यातः रसात
रप्रवेचनेन माधुर्यादिगुणसंपन्नपदरचनायां सोप्यशक्त इति भावः॥ इतरविद्याध्यापनादिना वा
आचार्यत्वं न तु सत्कवितायामाचार्यत्वमिति सोपहासमुक्तमाचार्यस्येति। धोइक विख्यापि ॥६
तिः॥ धोयिनाम कविराजः श्रुतिधरः॥ श्रुतिः श्रवणं तन्मात्रादेव ग्रंथादिग्राहिणं तु तस्य कवि

तायां कोशलमिति भावः। क्ष्मापतिपदेनाहं कारित्वं जा उमं चेत्ति त्तिध्वनितं। गिरां च संदर्भ शुद्धिं गुणालंकार संपन्न ग्रथन विज्ञो ष जयदेव एव जानीते नान्यो नो। तथा च गिरां संदर्भ शुद्धिं जयदेव जानीते भगवद्गुण वर्णनाकरत्वात्। तदुक्तं श्री भागवते। न तद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्। तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमं त्युशिक्क्षयाः तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि। नामान्यनं तस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साधवः। इति विशिष्टज्ञातुर्थ्यवतया च महाकाव्यत्वं दर्शितं। वैशिष्ट्यं विशिष्टय निर्दोषगुणवत्वे गुणवत्वालंकारयोगित्वे सति रसवत्वं तदुक्तं निर्दोषं गुणवत्काव्यमलंकारैरलंकृतं। रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विंदति॥ पल्लवः। किसलये पिंगे विटपे विस्तरे चलइति विश्वः। लघु
॥ वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणं श्लाघ्यो दुरूहद्रुते॥ शृंगारोत्तर सत्प्रमेय रचनैराचार्य गोवर्धन स्पर्द्धि कोपि न विश्रुतः श्रुतिधरो
क्षिप्रमरं द्रुतमित्यमरः। उत्तरं प्रतिवाक्ये स्यादूर्ध्वोदीच्योत्तमेन्यवदिति च॥४॥ ननपूर्वमुक्तं राधामाधवयो रहःकेलयः जयंति। तेन पारकीयत्वेन। अस्वर्ग्यमयशस्यं च फल्गुकृच्छ्रं भयावहं। जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः। इति भयादिनिंदाक्रांतत्वा तुच्छत्वाच्च कथं रसनिष्पत्तिः। कथं वा जयंतीत्युक्तं तदेव निरस्तिश्रायाद्भुतशक्तिमत्वनिरूपणेन सर्वनियामकतयापि महास्यद्भुतैश्वर्येणानियम्य गोपकिशोरो राखिलचिन्मयसास्वाद लामयमूर्तेरवतार गुणैर्नायकश्रेष्ठ्यापादनेन सर्वविघ्ननिवृत्तये न मस्क्रियामंगलमप्याचरन्निसानंदरूपतां चापादयन्नुक्तदोषं परिहरति॥ प्रलयेत्यादिना। उक्तं चास्मिन्नेवं राज्ञा पृष्टेन शुकेनापि। गोपीनां तत्पतीनां च सर्वेषा

मपि देहिनां॥ यांतश्चरति सोध्यक्ष एष क्रीडनदेहभाक्॥ अनुग्रहाय भक्तानां मानु
षं देहमाश्रिताः। भजते तादृशीः क्रीडायाः श्रुत्वा तत्परो भवेदिति। तासां माहात्म्यमपि
भागवते चोक्तं॥ तत्रैव। एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तये बलाः।
मया परोक्षं भजता तिरोहितं मासूयितुं मार्हथ तत्प्रियं प्रियाः॥ न पारयेहं निरवद्य
संयुजां स्वसाधुकृत्यं विबुधायुषापि वः॥ या माभजन्दुर्जरगेहशृंखलाः संवृश्च्य तद्वः
प्रतियातु साधुना॥ एतदुक्तं भवति। नायकोपि पुरुषोत्तमः॥ तास्तु नित्यप्रियाः परमर
सैकमूर्तयः॥ अतो निःसीमरसास्पदत्वं सर्वोत्कृष्टत्वमति सुप्रसिद्धमिति सिद्धांतः॥
अस्य गर्यमित्यादि यदुक्तं भगवता तत्तु प्राकृतविषयरसनिष्पत्त्ये वक्रोक्त्या तद्

प्रलयपयोधिजले धृतवानसि वेदं॥

वपरिक्षणार्थमिवेति॥४॥ गीतस्यास्य मालवरागो रूपकतालः॥ तयोर्लक्षणं
नित्यं विनीचुंबितवक्त्रपद्मः शुकद्युतिः कुंडलवान्प्रमत्तः॥ संगीतशालां प्रविशन्प्रदो
षे मालाधरो मालवरागराजः॥ रूपके स्याद्द्रुतं लघुरिति गीतार्थस्तु। हे केशव जय।
कः ब्रह्मा। ईशश्च रुद्रः तौ वशयतीति केशवः तादृश। भक्तसुखकारितया सर्वोत्कर्षे
ण वर्तस्व। ननु मम भक्तसुखसंपादने कुतः सामर्थ्यमित्यत आह। जगदीशेति। जगतां च
तुर्दशभुवनानामीशः नियंता। तथा च चतुर्दशभुवननियंतुस्तव कथं न सामर्थ्यमिति
भावः। तत्र हेत्वंतरमप्याह। हे हरे इति हरति भक्तानां क्लेशमिति हरिः॥
तदेव। अकृत्यकरणेनापि भक्तकार्यपरत्वं भगवतः प्रदर्शयति धृतमीनशरीर
रेत्यादिना। कीदृशः धृतमीनशरीरः धृतं परिगृहीतं स्वच्छंदया विकृतं मीनस्य म

स्मस्य शरीरं येन स॥ तादृश॥ एतत् कच्छपदं प्रतिपदमनुवर्तमानत्वात् दुक्तं॥ तद्बूहः अथ मोभागस्ततो मेलापकः स्मृतः॥ ध्रुवात्वाच्च ध्रुवः पश्चादाभोगश्चांतिमैन स्मृतः॥ इति चतुर्भि रवयवैः प्रबंधो भवतीति॥ यद्यपि क्वचिद्धृतमीनशरीरे क्वचिद्धृतकच्छपरूपेत्यादि किंचिद्भिन्न मेवपदमस्ति॥ तथापि जयंत जगदीशाहरे इत्यस्य प्रतिपदमनुवर्तमानत्वेन तत्किमिति मानत्

ते दिशरीरं मयापरिगृहीतमित्यत आह॥ त्वप्रलयपयोधिजले॥ प्रलयकालिकाः परस्परं मिलि ताये पयोधयः समुद्राः स ष्वाजले वेदं निमग्नं तं मीनशरीरमुपादायधृतवानसि कथं यथा स्यात्॥ विहितवहित्रचरित्रं यथा स्यात्॥ विहितं कृतं वहित्रस्य पोतस्य चरित्रं यथा स्यात्तथा पुनः कथं यथा स्यात्॥ अखेदं खेदरहितं यथा स्यात्तथा॥ परमानंदनिधानस्यात्र अथवा वेदं ज्ञानं धृतवानसि स सत्वत्तायार्पितवानसी सर्वः अतोभक्तानुरागेनागणितखेदत्वादखेदमिसूक्तं॥

विहितवहित्रचरित्रमखेदं॥ केशवधृतमीनशरीरजयजगदीशाहरे॥१॥

पदोपादानमंतरीपादिरहितत्वेन विश्राम स्थलाभावं सूचियितं॥ तथाच निरालंबे पि पयोधौ वेदं धृतवानसिति॥ वेदधारणार्थमेव तेशरीरपरिग्रह यित्ति भक्तकार्यपरत्वं दर्शितं॥ पृथुमाश्च षोमत्स्यो मीनो वैसारणोऽण्डजः स्मरः॥१॥ क्षितिरित्यादि हे केशव धृतकच्छपरूप हेरे धृतं कच्छपस्य रूपं येन तादृशजय॥ कूर्मावतारे पिहेतुमाह॥ तवपृष्ठे क्षितिः पृथ्वीतिष्ठति॥ तिष्ठतीति वर्तमानकाल निर्देशेनाद्यिनापि तिष्ठतीति भावः॥ मनुपंचाशत्कोटिर योजनविस्तृता मम पिष्ठे कथं तिष्ठतीत्य आह॥ अतिविपुलतरइति अतिशयेन पृथिव्यपेक्षयाप्यधिकविस्तीर्णे पुनः कीदृशे॥ धरणीध रणकिणचक्रगरिष्ठे॥ धरिण्याः पृथिव्याः धरणे मयकिणचक्रं चक्राकृतिय न्मत्तरुधिरुधिरमं डलं तेन गरिष्ठे गौरवयुक्ते॥ तच्छोणितग्रंथिरूपचक्रं गरिष्ठं यस्मिन् तादृशइति वा॥ कूर्मे कमठ कच्छपा विस्मरः॥ व्रणचिन्हं धुनैकिणइति हारावली॥ तथाच भक्तकृते पृथिव्यादिधारणकर्म णा भगवतः भारवाहनमप्ययुक्तमिति भावः॥२॥

मूल क्षितिरिति विपुलतरे तवतिष्ठतिपृष्ठे॥ धरणधरणकिणचक्रगरिष्ठे केशवधृतकच्छपरू

वसतीति। हे केशव धृतसूकररूप। धृतं सूकरस्य वराहस्य रूपं येन तादृश। जय। वराहावतार परिग्रहप्रयोजनमाह। तव दशनशिखरे दंताग्रे लग्ना संश्लिष्टा धरणी लोकधारणकर्त्र्यपि पृथ्वी वसति। कुत्र केव। शशिनि चंद्रे निमग्ना लग्ना कलंककलेव। लांछनलेखेव। अत्र निमग्नेत्यपदोनेन बालचंद्रस्य सादृश्यं दशनस्याप्यते। तत्र कलंककलेखास्य निमग्नत्वात् पूर्णचंद्रे तस्य स्पष्टत्वाद् तो बालचंद्रस्य दीर्घतया सादृश्यमपि संगच्छते। निमग्नेति एदंष्ट्रस्य थमि पिन। किंच। दंतश्लिष्टायास्तस्याः पोषणमपि सूचकमिति भावः। रदनाद्दशनाद्दंतारदाश्च समर अग्रं शिखरं रमित्याहुरद्रिशृंगे च तन्मतमिति धरणिः। कलास्त्रीनमूलके वृद्धौ शिल्पादावंश मात्रके। षोडशांशे च चंद्रस्य कलना कलयोः कलेति विश्वः।३॥ ॥तव करे स्यादि। हे केशव धृत नरहरिरूप धृतं नरहरेर्नृसिंहस्य रूपं येन तादृश जय नृसिंहावतार प्रयोजनमाह। तव करकमलवरे। करो हस्तः। स एव कमलवरः पद्म

वसति दशनशिखरे धरणितव लग्ना॥ शशिनि कलंककलेव निमग्ना केशव धृतसूकररूप जय जगदीश हरे॥३॥ तव करकमलवरे नखमद्भुतशृंगं॥ दलितहिरण्यकशिपुतनुभृंगं॥ केशव धृत

श्रेष्ठ तत्र नखं तिष्ठति। कीदृशं अद्भुतं आश्चर्यभूतं शृंगं मयपभागो यस्य तादृश॥ मद्भुतत्वमेवाह। दलितो विदारितो हिरण्यकशिपोर्दैत्यस्य तनुर्देहः तादृशो भृंगो भ्रमरो येन तादृशं। भृंगो हि पद्म दलविदलनार्थं प्रवर्तते। विदलयति च तत। अनेन पुनर्दलरूपेण नखेन भृंग एव विदारित इ समद्भुतं तथा च बहुतोपि हिरण्यकशिपुकायस्य भृंगत्वनिरूपणेन श्रीनृसिंहकरांबुजाप्येस्यातिसूक्ष्मत्वं ध्वनितं। मत्तदेहो हिरण्यकशिपुर्विचित्रा सायात्र नृसिंहवपुराविष्कर मिति भावः। यमानिलेंद्रचंद्रार्कविष्णुसिंहांशुवाजिषु। शुकाहि कपिभेकेषु हरिर्ना कपिले त्रिष्विस्मरः। शृंगं प्रभुत्वे शिखरे चिन्हे क्रीडांबु यंत्रके। विषाणोत्कर्षयोश्चापि शृंगः स्यात् कूर्चशीर्षकेऽपीति विश्वः। पुनर्भवः कररुहो नखरोनखमस्त्रियामितिच। तनुकायद्रवी बाले विरलेचापि वाच्यवदितिच। द्विरेफः पुष्पलिट् भृंगषट्पद भ्रमरालया इत्यमरः॥४॥

॥८

छलयसीत्यादि। हे केशव धृतवामनरूप धृतं वामस्य सर्वस्य रूपं येन। तादृश। जय। वा
मनावतारप्रयोजनमाह। हे अद्भुतवामन आश्चर्यरूपवामन विक्रमणे पादाक्रमणे नि
मित्तिभूते पादाम्बलिं दैत्यराजं छलयसि वंचयसि भगवानुपेन्द्रो वामनरूपं धृत्वा ब
लेः सकाशात् सदत्रयपरिमितां भूमिं प्रार्थ्य पश्चाद्बृहद्रूपं प्रकटीकृत्य चतुर्दशभुवने
रपि पदत्रयापूरणेन बलिं गृहीत्वा त्रिलोकीमिंद्राय ददावितिपुराणप्रसिद्धं रद्भुतत्वं।
सर्वात्मना भगवतः भक्तपरवशत्वेन छद्मनापि भक्तकार्यसाधनमिति अद्भुतवामने
त्युक्तं। वस्तुतस्तु जैद्रूशो भूत्वा द्वारपालो बभूवेति। अद्भुतत्वं ध्वनितं। अन्यच्चाद्भुत
त्वं दर्शयति। पदनखसंबंधियन्नीरं गंगाजलं तेन जनितं मुत्पादितं जनानां पावनं
पावित्र्यं येन तादृश। तत्रापि प्रवर्धमानस्य भगवतस्त्रिविक्रमस्य चरणांगुष्ठनखाग्रेण
छलयसि विक्रमणे बलिमद्भुतवामन। पदनखनीरजनितजनपावन। केशव धृतवामन
रूप जय ज०॥५॥ क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमितभवतापं॥ केशव
विदीर्णब्रह्मांडस्य प्रथमे पार्थिवावरणे तेनैव वर्त्मना तच्चरणारविंदं प्रक्षाल्य दिवागतं तद्द्विती
यावर्णजलं ब्रह्मद्रवार्घजलमेकीभूतं क्रमेण मर्त्यलोके प्रासंगंगेति लोकान्पावयतीति
पुराणप्रसिद्धं ग० तथा च भूलोकास्थितिना तिविक्रमेण वामनेन ब्रह्मांडजलस्यात्रानयनादाश्च
र्यं। भगवतश्चरणनखस्पृष्टजलेनापि सर्वलोकपावनमित्यद्भुतमहिमयोगेनाश्चर्य
मित्युपध्वनितं। किंच छलयसीति भूतेप्यथापि च लिसमी वर्तमानप्रयोगः पावन
इति नायकगुणस्तु कथितः॥ जो मोर्णस्तोय पाचनीयनीर क्षिरांबुशंबरमित्यम
रः॥ बलिश्चामरदंडस्याज्जरयाश्लथवर्मण्युदराच पर्ये दैत्य कंठे पूजोपहरयोः गाह
दारुविशेषच्च गंधकच्चकचिन्मतमिति विश्वः॥५॥ क्षत्रियेत्यादि। हे केशव धृतभृ
गुपतिरूप भृगुपतेः परशुरामस्य रूपं येन तादृश जय। तत्प्रयोजनमाह। क्षत्रि
याणां यद्रुधिरं तन्मये तद्धिकारे पयसि कुरुक्षेत्रास्य तीर्थजले जगत्त्राणि जातं अप

॥१॥

गीवि०

गतपापं नष्टकलुषं यथा स्यादेवं स्नपयसि स्नानं कारयसि ॥ यद्वधि श्रीपरशुरामेणैकविं
शतिवारान्क्षत्रियान्हत्वा तद्रुधिरैः कुरुक्षेत्रे पंचदानं विधाय पितृतर्पणं कृतं तदवधि त
न्महातीर्थं जातमिति पुराणप्रसिद्धः ॥ कीदृशं जगत् ॥ शमितभवतापं शमितो नाशितो भव
स्य तापो यस्य तादृशं ॥ प्राणिनां तापसंबंधादेव संतापः तत्तीर्थस्नानेन तु सर्वपापनाशे संतापनाश इ
ति भावः ॥ जलेमज्जतः संतप्तस्य तापनाश उचित एवेति भावः ॥ रुधिरेंगारके प्रोक्तो रुधिरं कुंकुमासृ
जोरिति विश्वः ॥ भवः संसार संतप्तिः श्रेयः शंकरजन्मस्विति च ॥ अनेनापि धर्मरक्षणाय तद्विरो
धिक्षत्रकुलसंहरणरूपं भक्तकार्यं दर्शितं ॥ तथा च रुधिररूपे जले मज्जतां साधनकोटिसंसाध्यसं
सारध्वंसलक्षणया पावनत्वात् पादनेनाद्भुतपावनत्वं वीर्यं कथितमिति भावः ॥ ६ ॥ वितरसीत्यादि ॥

वितरसि दिक्षु रणे दिक्पतिकमनीयं ॥ दशमुखमौलिबलिं रमणीयं ॥ केशव धृत
रघुपति[illegible]रूप जय ॥ ७ ॥ वहसि वपुषि विशदे वसनं जलदाभं ॥ हलहतिभीतिमिलितय
मुनाभं ॥ के० हलधररूप जय ॥ ८ ॥

हे केशव धृतरघुपतिरूप ॥ धृतं रघुपतेः श्रीरामचंद्रस्य रूपं येन तादृश जय ॥ श्रीरामावताररूसमाह
रणे संग्रामे दिक्षु दश दिशासु दिक्पदेनैव दशसंख्योपस्थितिर्ज्ञेया इति ॥ दशमुखस्य रावणस्य ये मौ
लयो मस्तकानि तान्येव बलिं उपहारं वितरसि ददासि ॥ कीदृशं दिक्पतिकमनीयं ॥ दिशां ये पत
यः इंद्रादयस्तेषां कमनीयं अभीष्टं ॥ तत्र हेतुः ॥ रमणीयं रावणवधद्वारा लोकाभिरामत्वात् सेवे
भागकथनाय दशमुखपदोपदानं ॥ किरीटे मूर्धचूडासु मौलिः केशे च संयते ॥ अत्रापि लोकपाला
नां स्वभक्तानां कार्यपरत्वं ईश्वरस्यापि सेव्यमिति चाद्भुतवीर्यकौशलं दर्शितं ॥ प्रसेकं तन्मौल्यर्पणात् ॥
॥ ७ ॥ ॥ वहसीत्यादि ॥ हे केशव हलधररूप ॥ धृतं हलधरस्य बलभद्रस्य रूपं येन तादृश त्वं जय
त्वं लीलामाह ॥ त्वं विशदे शुभ्रे वपुषि देहे जलदाभं सजलमेघवन्नीलं वसनं वस्त्रं वहसि धारय
सि ॥ कीदृशं ॥ हलहतिभीतिमिलितयमुनाभं ॥ हलेन हतिर्हननं तस्माद्भीः सा तद्भयेन मीलिता
या यमुना तस्या इव आभा दीप्तिर्यस्य तादृशं ॥ द्वयचमलया निलवल्कपमानस्य वस्त्र

॥१॥

स्यभययुक्तयमुनायाउत्प्रेक्षा। गर्भोपमा। भीरूणां कंपत्रचित एवेत्ति भावः। कदाचिद्वृ
दावने वारुणीं पीत्वा गोपीभिः सह विहरता श्रीबलभद्रेण जलक्रीडार्थमाहूता मत्तप्रल
पोयमिति मत्वा गर्वेणांतिकमनागच्छती कालिंदी रोषात् हलाग्रेण कृष्टेति पुराण
प्रसिद्धः। अस्मिन्नप्यवतारे ताभिः प्रेयसीभिः रममाणस्य तत्सुखार्थं यमुनाकर्षण
दिलीलविष्करणात्तत्परत्वमिति। किंच हलधर पदेन दुष्टनिग्रहार्थमेव हलं धृ
तवानिति भक्तकार्यपरत्वमवतारप्रयोजनं ध्वनितं। गात्रं वपुः संहननं शरीरं
रं च कलेवरमित्यमरः। शुक्लशुभ्रशुचिश्वेतविशदश्येतपांडुरा इति च। वस्त्रमाच्छाद
नं वासश्चैलं वसनमस्त्रियामिति च। भीति साध्वसकंपयोरिति विश्वः॥८॥ ॥

निंदसि यज्ञविधेरहह श्रुतिजातं॥ सदयहृदयदर्शितपशुघातं॥ के० बुद्धशरीर०९

निंदसीत्यादि। हे केशव धृतबुद्धशरीर धृतं बुद्धं शरीरं येन तादृश जय। ननु वेदनिंदक
स्य कथं स्तुतिरित्यत आह। यज्ञविधेः श्रुतिजातं क्रतुविधानसंबंधिवेदवाक्यसंमूहं
निंदसि न तु सर्वमित्यर्थः। सोपि किमिति निंद्यत इत्यत आह। अहह कष्टं दर्शितो बोधि
तः पशूनां घातो येन तादृशो। वेदोपि पशूनां घातं बोधयइति। अहह कष्टमित्येव निंदसी
ति भावः। एतादृशनिंदायामपि हेतुमाह सदयहृदयेति दयाकृपा तत्सहितं हृद
यं यस्य तादृश। अयं भावः। रागवशान्निरंकुशान् दृष्ट्वा अग्नीषोमीयं पशुमालभ
र तेत्यादि विधिवाक्यैः स्वर्गादिफलप्रदर्शनपुरस्कारेण गुडजिह्विकया वैदिक
मार्गे प्रवृत्तस्यापि श्वान्यश्वर स्वर्गादिफलजनकं निरपराधिबहुप्राणिवध
साध्यं यागादिकं युक्तिविरोधित्वान्न तेषामस्तं तहित्त

मितिविचार्यपरमपुरुषार्थसाधने निवृत्तिमार्गे तान् प्रवर्तयितुं। न हि स्यात्सर्व
भूतानीत्यादिना यज्ञादिबोधकवेदस्य निंदां करोषि न तु सर्वथा वेदनिंदायामेव त
त्तात्पर्यमत एव गूढं तत्वं तैस्तात्पर्यमज्ञात्वा दुरात्मनां वैदिकमार्गे विश्वासदृष्टि
तेषां मोहनायैव तत्त्वं तदवतारपरिग्रह इति। स्वजनोऽर्थे तद्विरोधिनां श्रेयसि तद्ध
चनरूपमवतारप्रयोजनमुक्तमिति। अहह हे स्वद्भुते वा॥ अहह हे स्वद्भुते खेद इति विश्वः।
वेश्रवसि च श्रुतिरित्यमरः। जातं जात्यां च जन्म स्वित्ति विश्वः॥९॥ म्लेच्छनिवहेति।
हे केशव धृतकल्किशरीर धृतं कल्किनः शरीरं येन तादृशालंजय। त्वं वेष्टितमाहाम्ले
च्छनिवहे निधने। म्लेच्छानां निवहाः समूहास्तेषां निधने नाशनिमित्तं करवालं खड्
गं कलयसि धारयसि। कीदृशं किमपि करालं अतिशयेन भयंकरं कमिव धूमकेतुमिव शोभमा

म्लेछनिवहनिधने कलयसि करवालं॥ धुमकेतुमिव किमपि
करालं॥ केशवधृतकल्किशरीर जय जगदीश हरे॥१०॥ध

क त्रिग्रहविशेषमिवारणेन दितं यत्करवालं पश्यतां म्लेछानां नाशो भवतीति करवा
लस्य धुमकेतुसाम्यं। धुमकेतौ औत्पातिकग्रहविशेषेप्युदिते तं पश्यतां प्राणिनां वि
पदो भवंतीति भावः॥ यद्वा धूमः केतुः चिन्हं यस्य स धूमकेतुर्वन्हिस्तमेव। अत्र खड्
स्य नीलत्वाद्धूमसाम्यं। मुष्टेश्च सुवर्णमयत्वादग्निसाम्यं। म्लेछः पापरते जातिभेदे
स्यादपभाषणे इति विश्वः। समूह निवह व्यूह संदोह विसर व्रजाइत्यमरः। निधनं
स्यात्कुले नाशे इति विश्वः। खड्गे तु निस्त्रिंशचंद्रहासासिरिष्टयः। कौक्षेयको मंड
लाग्र करवालः कृपाणवदित्यमरः। धूमकेतुस्मृतो वन्हावुत्पात ग्रहभेदयोरिति
विश्वः। करालो भीषणे न्यवदिति॥१०॥ ॥धृतवानसीत्यादिभिः वर्तमानप्रयोगैः

अवताराणाम्भगवतश्च लीलाया नित्यत्वं दर्शितं। एवं तत्तदवतारगुणैः स्तुतिं कृत्वा सं
प्रत्यवतारिणं स्तवन्प्रार्थयति। श्रीजयदेवेत्यादि। हे केशव धृतानि दशविधरूपाणि
येन तादृश त्वं जय। के अखंडानंदसुखे सेते इति केशवः। तादृशस्यापि दशविध
रूपाण्यंगीकृत्यापि तादृशैः कृत्यैरपि स्वभक्तकार्यसाधनेन तादृशमहिम्नः उद्बो
षणतव भजनेन मम महती रुचिर्जाता अतो भक्तसुखसंपादनेन जय। मम चेदं जयदेव
कवेः उदितं जयदेवकवेः भाषितं शृणु। कीदृशं सुखदं श्रोत्रमनःसंतोषदं। पुनः कीदृ
शं शुभदं मंगलप्रदं तत्र हेतुः भवसारं जन्मरहस्यं वर्णनीयत्वेन यत्र तादृशं। अथवा
भवे संसारे श्रेष्ठं परमपुरुषार्थसाधनत्वेन जन्मसाफल्यकरत्वादत एव उदारं परमार्थ
प्रदं। अथवा उदारं महत्। झटिति पदार्थार्पकमिति वा। श्रीकृष्णकीर्तनत्वात् त्रिजगज्जनकथान्वि

श्रीजयदेवकवेरिदं। कुदितमुदितं शृणु सुखदं शुभदं भवसारं॥ केशवधृतद
शविधरूप जय जगदीश हरे॥११॥

तत्त्वाच्चैतानि विशेषणानि। उक्तं भाषितमुदितमिति। सारो बले मज्जनि च स्थिरांशे न्या
य्ये च निरे धने च सारं। वरे न्यथ्ये च सार मुदीरयंतीति विश्वः॥११॥ ॥अंशावतारान्स्तुत्वा
संप्रति वर्णनीयं पूर्णतमं अखिलनायकशिरोऽलंकारं श्रीकृष्णं स्वयं प्रणमति। वेदा
नुद्धरते इत्यादि। कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः॥ तयोरैक्यं परं ब्रह्म कृष्ण
इत्यभिधीयत इति सर्वाश्रयः। अखिलपरिपूर्णमहाशक्तिमांश्च कृष्ण इति। स्वानन्यमा
धुर्येण प्रियजनाकर्षणाच्च कृष्ण इति कृते पदत्वाच्चेति कृष्णः। तस्मै निरवधिपरमानंद
घनरूपाय स्वप्रियजनैः रमणाय श्यामसुंदराय शृंगाररससर्वस्वमूर्तये तुभ्यं नमः।
तथा च श्रुतिः। अक्षरात्परतः पर इति। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी
ज्ञानबलक्रिया चेति अक्षरादपि चोत्तम इति गीतायां

नराकृति परंब्रह्म सच्चिदानंदविग्रह इति॥ आनंदचिन्मयरसप्रतिभाविताभिस्ताभि
र्य एष निजरूपतया कलाभिः गोलोक एव निवसत्यखिलात्मभूतो गोविंदमादिपुरुषं
तमहं भजामि इति ब्रह्मसंहितायां॥ वक्ष्यति च। शृंगारः सखि मूर्तिमानिव मधौ मुग्धो
हरिः क्रीडति। श्रीशुकेनाप्युक्तं साक्षान्मन्मथमन्मथ इति। ननु मीनाद्यवतारवानी
श्वरः केशवके जलसेतौ भृगोदरादौ नियथापदिष्टा मीयास्थिता नेश्वस्युः इति केन्न य
वः आदिनारायणः उक्तं च एतन्नानावताराणां निधानं बीजमव्ययमिति। तस्य
स्तुतिः स्तुतेवा इदानीं गोपकिशोरं वरः विहारिणं मां किं स्तौषीत्यत आह दशाकृति
कृते तुभ्यमिति। मीनादिदशरूपधारिणे तुभ्यमेव नमः॥ अयमर्थः। तत्तद्दशादवता
दवतारवानीश्वरो नारायणस्त्वमेवासि॥ तदुक्तं ब्रह्मणा नारायणोंगमिति श्रीभागव
ते। अकूपाराय बृहते। वैकुंठदर्शनेन होनास्यमेव त्रिशुको किश्र न्येद्वौ शाकलाः॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयते
क्षत्रक्षयं कुर्वते॥ पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते म्लेच्छा
न्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः॥५॥

पुंसः कृष्णस्तु भगवान् स्वयमिति प्रथमस्कंधे। ब्रह्मसंहितायां च। विष्णुर्महान् स इह यस्य कला
विशेष इति। अतोपरमेश्वरत्वात् सामेव स्तामि इति इत्थं निश्चित्य तत्का अवतारकर्मभिः संक्षेप
णपुनराह। किंलक्षणाय। मीनरूपेण वेदोद्धारं कुर्वते। पुनः कीदृशाय। जगन्ति भुवनानि कच्छ
परूपेण वहते धारयते। भूगोलं पृथ्वीगोलं वराहरूपेण उद्बिभ्रते उर्ध्वं प्रापयते दैत्यं हिरण्य
कशिपुं दारयते नृसिंहरूपेण विदारयते। बलिं दैत्यं वामनरूपेण छलयते वंचयते। क्षत्रक्षयं
दुष्टानां क्षत्रियाणां नाशं परशुरामावतारेण कुर्वते। पौलस्त्यं रावणं श्रीरामरूपेण जयते। हलं
दुष्टनिग्रहाय आयुधत्वेन कलयते च बलभद्ररूपेण धारयते। कारुण्यं रूपां आतन्वते। बुद्धरूपेण वि
स्तारयते। म्लेच्छान् मूर्छयते नाशयते स्पर्धः। य एतद् अवतारकर्मकर्तृत्वेन सर्वेगेतः पूर्णस्त्वमखिलश
क्तिमत्त्वेनाप्रतिपादितः आकृतिः कथिता रूपे सामान्यवपुषोरपि इति विश्वः॥५॥ इति प्रथमः प्रबंधः

एवं तावत नदवतारचरितैस्तांस्तान्नारायणगुणाननुवर्ण्य इदानीं समस्तनायकचूडा
मणेः श्रीपुरुषोत्तमस्य प्रथमपद्ये रेहकेवलयः इत्यनेन संक्षेपतः क्रीडासूचईत्वा सं
मतिसस्युत्या स्वाधीनभर्तृकावर्णनेन भगवतस्तस्य लोकोत्तर धीरललितशृंगारी त्वादि
गुणान्वर्णयन्नेव मंगलोत्तर मप्याचरति श्रितेत्यादिना। किंच सर्वपूर्णत्वात्कि मत्स्य
त्रानेदविलासरसमृग्याशक्तिरेवोद्रिक्तत्वमन्यत्र त्वन्यासांकचिदत्रापितसोषणायत्व
सामप्युक्तत्रैवं क्रमः। धीरोद्धता वामनपरशुरामादयः। तल्लक्षणं। मात्सर्यदर्पस्तुयि
ष्टः छद्मौहंकारवान्बली। चंडो विकथ्यमानश्च धीरोद्धत उदाहृतः। तद्गुणाश्चायत्वास्विता
नः। धीरोदात्तः सवित्तोयो रामोदात्तार धिर्यथेत्ति। शांतो विनातो धीरश्चेति तद्गुणाः। धी
रः शांतः। जीनबुधादिः। विदग्धो नवतारुण्यः परिहासविशारदः। निश्चिंतो धीरललि
तः स्यात्प्रायः प्रेयसीवशः। शृंगारिणी यकस्त्वन्यः पंचमः कथ्यते तथा। विलासचातुर्वाम
ज्ञो। इत्यादिवर्णनीयगुणवान्नायकः श्रीराधाप्रियः। तं गीतेन वर्णयति। गीतस्य गुर्जरी
रागः। मंठश्च तालः। तयोर्लक्षणं। श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवतल्पजा
ता। श्रुते स्वराणां दधती विभागं तंत्रीमुखाद्दक्षिणगुर्जरीयमिति। गुरुर्लघुद्वयं यत्र भ
ग तालः स कथ्यते। मंगलो मंठकोज्ञेयो रसे चाद्भुतसंज्ञके। अद्भुतकेलिप्रकटनादद्भुतत्वं
ध्रुवपदं गीतार्थस्तु। हे देव दीव्यतीति देवः तत्संबोधनं। श्रीराधया सह विलासासक्ते
तिवा हे हरे स्वसौंदर्यादिना निखिलभुवनयुवतिचित्तचोर जय जय। आदरे द्विरु
क्तिः। इदं च ध्रुवपदं। अथ पदानि श्रितकमलाकुचमंडल। श्रितं आश्रितं
कमलायाः कामयतइतिकमः कसुकांतौ। पंचादिसाद च। तलात्तिगृण्हा

तिस्वगुणैर्वशीकरोतीति सा कमला। लाआदानेइति यद्वा। कमला स्त्रीचरे स्त्रि
यो रितिविश्वः॥ वरस्त्रीलेनायिकमलाश्रीराधो व तस्याः कुचमंडलं स्तनरूपमेव
दुर्गकामभयादिव येन। तादृशा। अनेन सकलनायिकामुकुटमणिगुणाधिक्यं
कथितं। तथा च अनेन केलिकौशलेन रतिकौशलेन रतिकौशलरूपो नायकगु
णश्चोक्तः॥ स्वाधीनभर्तृका नायिका चेयं। तल्लक्षणं वक्ष्यतेग्रे। हे धृतकुंडल। धृते आ
करा कृति कुंडले कर्णाभरणे येन तादृश। अथवा तदाज्ञया धृते तस्या एव श्रुत्योः कर्णा
भरणे येन। अथवा। पुष्पादिना तत्कर्णभूषणार्थं निर्माय उपहारीकृतकुंडलयेन ताद
शा पुः कीदृशो कलितललितवनमाल। कलिता धृता मनोहारा वनमाला चरणपर्यं
तावलंबिनी माला येन तादृश। एतद्विशेषणद्वयेन भव्यत्वमुक्तं॥

श्रितकमलाकुचमंडल धृतकुंडल ए। कलितललितवनमाल
जय जय देव हरे॥१॥

वनमंभसिकानने इत्यभिधानात् पद्मलावा आपादप्रमितां मालां वनमाले
ति तां विदुरिति शाश्वतः॥ अथवा कलिता धृता ललिता मनोहरा वनमाला पुष्पमा
ला पद्ममाला वा प्रियाः कुंडे येन तादृश। अथवा कलिता अवगाहिता प्रियामंडना
र्थं वनमाला चंपकादिवनश्रेणी येन तादृश। अथवा कलिता धृता ललिता मनोहरा
प्रियायाः मंडनस्पर्शोत्थसात्विकविकारेण वनमाला स्वेदबिंदुर्जलबिंदुसंततिर्येन ता
दृश। अथवा धृता संभोगाश्रमजलश्रेणिर्येन तादृश। व्यभिचारिभावोयं प्रियामंड
नार्थं वनमाला कलिता बहुविधनिर्मिता येनेति वा। एभिर्व्याख्यानैः कुशलः कलावि
द्विलासी त्यादिगुणाश्च कथिताः। स्यान्मंडलं द्वादशराजके च देशेच बिंबचकदंबके
चाकुष्ठभेदे प्युपसूर्यके च भुजंगभेदे श्वभिति मंडले स्यादिति विश्वः॥१॥ ६॥

सू दिणमणिस्वादि। दिणमणिः सूर्यस्तस्य मंडली बिंबः ततोपि श्रेष्ठः कौस्तुभाख्य मडन
अलंकारो यस्य तादृशा। दिणमणिमंडलवन्मंडनं यस्येति वा। अनेनधनाढ्य इति ना
यकगुणः कथितः। भवखंडनेति व्रजराजकुले स्वजन्मना देवादीनां भवो जन्म तं ख
उयसि तिरोस्करोषीति तथाभूत। देवा अपि गोकुले जन्म वांछतीति भावः। अथवा भ
वः रुद्रः तं गांधर्वविद्याया खंडयसि पराजयं प्रापयसीति तादृशा उक्तंच। विविधा गो
पचरणेषु विदग्धो वेणुवाद्यधुरंधरो निजन्तिक्षः। नचसुतः सतियदाधर चिवेदन्तवे
णुरणयन्स्वरजातीः सवनशास्तदुपधार्यसुरेशाः शक्रशार्वपरमेष्ठिपुरोगाः। कवय
आनतकंधरचित्ताः कश्मलं ययुरनिश्चित तत्वा इति। प्रियजनानां विरहदुःखा

दिनमणिमंडलमंडन भवखंडन ए। मुनिजनमानसहंस।२।

दीनां उद्भवविदारणेतिवा। एतेन कुलीनकलाविचक्षणोक्तः। मुनिजनेति। मुनिवृत्तिर्मौ
नं तद्युक्तो जनः गोपीलक्षणः तस्य मानसं चित्तं तदेव मानसं सरोवर विशेषस्तत्र हं
सो मरालः। सौभाग्यमदलीलया मानादिना वा मौनयुक्तायाराधायाश्चित्ते निशायाव
ग्रहे सा सत्या। ननेगस्यात्तत्रैव कृतस्थितिः मरालेसर्षः। अथवा हे मुनिजनेति पृथ
क्पदं मननशीलो मुनिः संचासौ जनश्च तस्याः प्रियायाः सौंदर्यादिगुणगणगणन
छूत स्वभावेत्यर्थः। हे मानसहंस सत्कान्यसमस्ततद्धृदिवास। मुनीसारस्यएकपदं वा
मुनिश्चासौ जनश्च सचासौ मानसहंसश्चेति। दुर्दैवपारं परितरूपकमलकारः। त
थाहुः नियतारोपणो पायः स्यादारोपः परस्ययः। तत्परं परितश्लिष्टे वाचके भेदभा
जितं चेति। मानसं सरसि स्वांतेति विश्वः हंसो विहंगमोपि स्यात्सरमात्मनियोगिनी त्विचा।।

कालायेति। कालियनाम्नो विषधरस्य गंजन तिरस्कारक। अनेन चतुःषष्टिकलाकुशल त्वदर्शितं जनानां मधुर वचनादिना रंजयतीति जनरंजनेति अनेन सुभगवचनत्वं कथितं। अथवा सर्वजनानां श्रीराधानुकूल्येन अनुरक्तं करोषीति। तामेव रागादिना मंडयसीति वा। यदुकुलेति। यदुकुलमेव नलिनं पद्मं तस्य दिनेशः सूर्यस्तेन प्रकाशकत्वात्। यादवानां हितार्थाय यो घनो गोवर्धनोमयेति वचनात्। यदुकुलमिति गोकुलमेव। अन्योपि विषो विषधरश्चक्री व्यालं सरीसृप इत्यमरः। वा पुंसि पद्मं नलिनमरविंदमहोत्पलमिति च। रंजने रागजनने रजनं रक्तचंदनेति च। २॥ मधुरिति। मधुसुरनरकाणां विनाशकारिन्। गरुडासन। गरुडः पक्षिराजः। स एवासनमुपवेशनं यस्य तादृशः। अथवा मधुरा ख्यइस स्तेमुरयति॥

कालियविषधरगंजनजनरंजनए। यदुकुलनलिनदिनेश॥३॥
मधुमुरनरकविनाशमगरुडासनए। सुरकुलकेलिनिदान॥४॥

मधुसुरः। इगुप मुरवेष्टने इति धातुः। वेष्टयतीति स्वजनार्थं सर्वतः। आवृत्य सक्षतीति मधुसुरः। इ त्तरराग धेति कः। तेन नरकनराणां कमुखं नाशयतीति तुष्टीकरोति। यद्यर्थः। न त्कं च। इतरराग विस्मारणं नृणां वितरवीरनस्तेधरामृतमिति। गरुडवत्। बंधविशेष आसनं यस्येति च। अनेन रतिकौशलं कथितं। सुरकुलेति सुरकुलकेलीनामादिकारण। देवा हि क्रीडा चतुरा इति प्रसिद्धिस्तैरपि त्वत एव शिक्षितेति भावः। अनेन विलासित्व सामर्थ्यं चोपपादितं। यगणे गोत्र देहे पिरणि तं कुलमिति च॥४॥ अमलेति। अमलं निर्मलं यत्कामलं तस्य चदुलं पैपत्रं तत्सदृशे लोचने यस्य तादृश।

सू दिणमणिसाद्दि। दिणमणिः स्तौर्यस्य मंडलीबिंबः ततोपि श्रेष्टः कौस्तुभाख्य मंडन
अलंकारो यस्य तादृशा। दिणमणिमंडलवन्मंडनं यस्येति वा। अनेन घनाढ्य इति ना
यकगुणः कथितः। भवखंडनेति व्रजराजकुले स्वजन्मना देवादीनां भवो जन्म तत्र ख
उयस्थितिरोस्कारोषीति तथाभूत। देवा अपि गोकुले जन्म वांछतीति भावः। अथवा भ
वः रुद्रः तं गांधर्वविद्यया खंडयसि पराजयं प्रापयसीति तादृशा। उक्तं च। विविधा गो
पचरणेषु विदग्धो वेणुवाद्यउरुधा निजशिक्षः। तत्र सुतः सतियदाधर चिवेद तत्र वे
णुरणयन्स्वरजातीः सवनशास्तदुपधार्य सुरेशा शक्रशर्वपरमेष्टिपुरोगाः। कवय
आनतकंधरचित्ताः कश्मलं ययुरनिश्चितत्वादिति। प्रियजनानां विरहदुःखा

दिनमणिमंडलमंडनभवखंडनए। मुनिजनमानसहंस।२

दिनांउद्रवविदारणेति वा। एतेन कुलीनकलाविच्छेदोक्तः। मुनिजनेति। मुनिवृत्तिर्मौ
नं तद्युक्तो जनः गोपीलक्षणः तस्य मानसं चित्तं तदेव मानसं सरोवरविशेषस्तत्र हं
सो मरालः। सौभाग्यमदलीलया मानादिना वा मौनयुक्तायाराधायाश्रितापि भायाव
ग्रहेः सा सत्यां। ननेगस्यात्तत्रैव कृतस्थितिः मरालेस्वर्थः। अथवा हे मुनिजनेति पृथ
कूपदं मननशीलो मुनिः स चासौ जनश्च तस्याः प्रियायाः सौंदर्यादि गुणगणगणन
छंत स्वभावेत्यर्थः। हे मानसहंस सत्कान्यसमस्ततहृदि वास। मुनीश्वारस्यएकपदं वा
मुनिश्चासौ जनश्च स चासौ मानसहंसश्चेति द्वंद्वपारं परितरूपकमलकारः। त
थाहुः नियतारोपणोपायः स्यादारोपः परस्य यः। तत्परं परितेश्लिष्टे वाचके भेदभा
जितं चेति। मानसंसरसि स्वांतेति विश्वः हंसो विहंगभोपि स्यात्सरमात्सनियोगिनी त्विचा॥२॥

अनेनापि भव्यत्वमेवोक्तं। भवमोचन। भवो जन्म तस्मादाश्रयतां मोचयतीति तादृशा।
भक्तानां नित्यविग्रहप्रदानेन तस्य नित्यपरमानंदरूपत्वा भजनीत्वमुक्तं। अथवा
भवरूद्रं स्तं महाविपद्रूपादकासुरान्मोचयतीति सतथा। अथवा। कमलदललो
चनादिसौंदर्येण कृष्णरूद्रं समाध्यादियोगचक्रान्मोचयतीति स्यप्रवणं करोती
त्यर्थः। त्रिभुवनभवननिधान। त्रिभुवने भवनं गृहं श्रीमद्वृंदावनाख्यं तदेव निधा
नं वा सस्थानं महानिधिरिति वा यस्य तादृशा। निधानं त्वालये निधावित्तिविश्वः।
भवनं भावचेद्म नोरिति चापत्रं पालाशं छंदनं दले पर्णंछदः पुमानित्यमरः ॥५॥
जनकेति। हे जनकसुताकृतभूषण व्रजजनानां के सुखं यस्मात्स जनको व्रजजनेषु धानो
वाजनक इति श्रीवृषभानुस्त

अमलकामलदललोचनभवमोचना। ए त्रिभुवनभवननिधाना ॥५॥
जनकसुताकृतभूषणजितदूषण। एसमरशमितदशाकंठजय ॥६॥

स्य सुता श्रीराधा तस्याः कृता निभूषणानि अलंकरणानि मकरिकापत्रादीनि येन तादृशा।
जितदूषणा। जितानि निजगुणैः स्वस्मिन्नूतिरस्कृतानि दूषणानि दोषा येन तादृशा।
अनेन सकलकलाकौशलरूपस्यारूण्यरूपश्चानेकगुणत्वं। समरशमितदशाकं
ठा समरे रतिरणे शां कू जित्वा ख्यं सुखं दत्तं प्रापितं दशासंख्यानां नायिकानां कंठेयेन। ता
दृशा। अनेन रतासामर्थ्यं कथितं। अं चास्थौ नाससमरे सुरतसंग्रामे येतन्वं तेन रता प्रापि
ताकुजिता ख्याद्वशा अवस्था नायिकाकंठयेन ॥६॥ हे अभिनवजलधर सुंदर ॥ अ
भिनवो नूतनो यो जलधरः सजलो मेघस्तद्वत्सुदर ॥ महारसवर्षिन ॥ अनेनापि
भव्यत्वमेवोक्तं ॥ धृतमंदराधृतः मंदरो पर्वतविशेषो येन ता

दृश। अनेनापि सामर्थ्यमेवोक्तं। अत्र मंदरपदेन गोवर्धन एव। यथा गोपालस्तवेन्नं
करेणोर्द्धं। धृतैकहस्तमंदरमिति। अथवा येन उत्पाट्य समूलमंदरगिरिः छत्रीकृ
तो गोकुलेति। श्रीमुखचंद्रचकोर। श्रीयश्चंद्रः शोभावान् श्रीराधायाः मुखमेव च
न्द्रः आल्हादकत्वात् तस्य चकोरः तदास्वादसर्वस्वः। अत्र तस्या आननचंद्राधरसुधा
पानसोत्कंठत्वेन भगवतश्चकोरत्वेन निरूपणं। अनेनापि रतिकौशलत्वमेवोक्तं। अत्र
तदुक्तं। त्यागी कुलीनः कुशलो रतेषु कल्यः कलावित्तरुणो धनाढ्यः। भव्यः क्षमी स्थि
र रूचिः सुभगो भिमानी स्त्रीणां मतः शुभवचाः इह नायकः स्यादिति शृंगारति
लके॥७॥ ॥ इदानीं कविः सर्वनायकोत्कृष्टत्वेन श्रीकृष्णं स्तु॥

अभिनवजलधरसुंदर धृतमंदर ए। श्रीमुखचंद्रचकोर जय जय जय
देवहर॥ध्रु॥ तव चरणं प्रणता वयमिति भावय ए। कुरु कुशलं प्रणतेषु
ज॥९॥ श्रीजयदेवकवेरिदं कुरुते मुदं। मंगलमुज्वलगीतं जय॥१०॥

त्वा मध्ययिते तव चरणे वयं प्रणता। हे श्रीकृष्ण इति भावय चिंतय जानीहि इति। प्रणते
ष्वस्मासु कुशलं कुरु विघ्नराहित्यं कुर्विर्थः॥९॥ इदं जयदेवकवेः मंगलं गीतं विशेषतः
मुदं कुरुतां। कीदृशं मंगलं उज्वलं दोषरहितं गीतं गायने यस्य तादृशं। गीतदोषास्त
भरतमते। शंकितं भीतमुद्घृष्टमव्यक्तमनुनासिकं। काकस्वरं शिरः कंपं तथा स्थान
विवर्जितं। विस्वरं विरसं चैव विश्लिष्टं विषमाहतं। व्याकुलं तालहीनं च गीतदोषाँ
न्विदुर्बुधाः॥ अथवा मंगलमिष्टप्रणतिरूपं मंगलाख्यो तालो वेत्ति मंगलं॥१०॥
॥ इति द्वितीय प्रबंधः॥२॥ ॥श्री राधाकृष्णाभ्यां नमः॥ अथ तुर्दश॥३॥ध॥

पुनरपिनायिकायाः सोभाग्योद्रेकं निरूपआसीरूपं मंगलमाचरति। पद्मेति। मधु
सूदनस्य उरः हृदयं वा युष्माकं प्रियं वांछितं अनुपूरयतु संपूर्णं करोतु। प्रतिक्षणं द
दातीत्यर्थः। निसविलासासक्तत्वात्। तद्विशेषणविशिष्टस्य तस्य दातृत्वसामर्थ्यं
वांछतामपि तत्प्रियाणां तदेव रसानुभवनमिति ध्वनितं मधुररसास्वादलोपस्य
न मधुसूदनपदोपादानं॥ कीदृशं उरः पद्मानि विद्यंते यस्यां सा पद्मा॥ अर्शआदिभ्यो
अच् इत्यच् पद्मगुणयोगाच्च सौकुमार्यं पद्मेति पद्मकोटि सौगंध्यवती पद्मा सौभाग्य
परिमलाख्यापनाच्च सौकुमार्यसौंदर्यादिगुणे पीतिः। तस्याः पद्मायाः पद्मिन्याः श्रीराधा
याः याः पयोधरतटी स्तनप्रांतः तस्याः परिरंभेण आलिंगनेन ल

पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमरो मधुसूदनस्य।
व्यक्तानुरागमिव खेलदनंगखेदस्वेदांबुपूरमनुपूरयितु प्रियं वः॥

लग्नं यत्काश्मीरं कुंकुमं तेन मुद्रितं मुद्राचिन्हविशेषस्तद्युक्तमित्यर्थः। इदं मधुसूदनस्य
हृदयं ममैव न त्वन्यस्येति ख्यापनाय निजस्तनतटीलिप्तकाश्मीरेण मुद्रेव दत्तेति भावः।
तथाच पयोधरयोस्तटीपरिरंभेण नायिकायाः वामता ख्यापनेन तस्याः चेदाधीप्र
तिपाद्यते। पुनः कीदृशं खेलन् क्रीडां कुर्वन् अनेन कंदर्पस्तस्मात् खेदः आयासः सुरत
श्रमः तेन यत्स्वेदांबु स्वेदजलं तस्य पूरः प्रवाहो यत्र तादृशं। पतेन काश्मीरस्य स्वेदसं
बंधेन मुद्रायोग्यत्वं संभोगानिरूपयित्वं च ध्वनितं कीदृशं मिव व्यक्तः नुरागमिव व्यक्तः
प्रगटीभूतोनुरागः स्नेहो यत्र तादृशमिव। तद्विषयकानुरागाधिक्याद्दंतरे समावेशाभा
याकुंकमरागव्याजेन अनुरागो बहिर्निःसृत इवेति भावः। मुद्रा संजाताऽस्येति मुद्रितमि
तितारकादित्वादिनच् पूरो जलप्रवाहे स्यात् त्राणसंशुद्ध्योरपि तयोरिति विश्वः। स्त्री स्त
नाब्दौ पयोधरौ विति च। कंदर्पो दर्पकोनंग इत्यमरः। पद्मिनीलक्षणं॥ कमलमु

कुलमल्लीफुल्लराजीवगंधिः सुरतपयसि यस्याः सौरभं दिव्यमंगोच्चकितमृगमदश्री
मभ्रांतरक्ते च नेत्रे कुचयुगलमनर्घ्यं श्रीफलश्रीविडंबि ॥१॥ तिलकुसुमसमानां
बिभ्रती नासिकां च द्विजगुरुसुरपूजाश्रद्दधाना सदैव कुवलयदलकांतिः क्वापि
चांपेयगौरी विकचकमलकोशाकारकामातपत्रा ॥२॥ व्रजति मृदु सलीलं राज
हंसीव तन्वी त्रिवलिकलितमध्या हंसवाणी सुवेषा मृदुस्तु चिल्लचुमुंक्ते मानिनी
गाढलज्जा प्रबलकुसुमवासावल्लभा पद्मिनी स्यादिति ॥ अतस्या अलौकिकगुणा
नां वर्णनाद्राक्षसत्वादेति लोकग्राह्यत्वेन कथ्यंतेति सिद्धांतः ॥३॥ एतावता ग्रंथे
नाभिधेयप्रयोजनप्रयोजयप्रयोजनं केलिवर्णनोयुक्तनायकगुणप्रतिपादनपु
नःसराणि मंगलानि विधाय कविः शृंगाररसप्रधानभगवत्केलिवर्णनं चिकीर्षुः
तत्र प्रस्तावसरं संक्षिप्तं केलिं निचाल्पविश्लेषक्रीडामारब्धुमिच्छतोः परमप्रियतमयोः
कदाचिन्निमेषमात्रमपि विप्रलंभासह्ये जनिष्ठतोः श्रीराधामोहनयोः संभोगरसपोष
णायरसयोगादेव विप्रलंभारम्भशृंगाररसाविर्भावि ज्ञाते प्रथमं तावच्छृंगाररसर्वे
सर्वस्वभूतायाः नायिकायाः चरितानि वर्णयितुं प्रस्तौचयति वसंते यादि। तत्र सं
भोगोत्कर्षं प्रति विप्रलंभस्योपादानेऽलंकारिकाः। संभोगो विप्रलंभेन न विना
पुष्टिमश्नुते। कषायिते हि वस्त्रादौ भूयान्रागोभिजायत इति। किंच रसयोगादि
तियदुक्तं तच्छृंगाररसानुभावि भिच्छाभिच्छामीति निरपेक्षतान चिकीर्षाल
त्ति सत्वमिश्वरत्वंमिश्वरत्वमिति तस्य भगवतः निरपेक्षयेव रस नियामकत्वे
नापि निरपानंतत्राक्तिमतस्तस्य न स्यातंत्र्यभगाइति सिद्धांतः ॥ न कचास स
स्यकामन्नाति ॥ एवं निरपेक्षया कालव्यवधानमपि निरस्तं ॥ वसंते त्यादि

श्लोकार्थस्तु। कदाचित्सहचरितुल्यव्यसनासखीचसंतेसटसरसोन्द्रोघसहि
तंयथास्यादेवंराधांइदंवक्ष्यमाणंनु चेऽवाच कीदृशी। अवयवैरनंगेरूपलक्षि
तां। कीदृशैरवयवैः। वासंतीकुसुमसुशैकुमारैः माधवीलतापुष्पवत्कोमलैः
नतोपि मृदुलैरित्यर्थः। मार्दवं कोमलस्यापि स्पर्शासहदनुभावी तनुरेव ततोऽप्य
तद्यथा। अभिनवनवमल्लिकामयं सान्द्रायनवरं ननु राधिकापिन्निर्बीं। नकुसुमप
टलंदरापि जग्लौ सुतनु तनोस्तनुरेव सत्राणासीदिति। जग्ला ग्लानिंप्रापेत्यर्थः। पुनः
कीदृशीं कांतारे महारण्ये भ्रमंती। तत्र हेतुगर्भितं विशेषणमह। बहुविहितेति। बहु
वारं वारं विहितं कृतं कृष्णस्यानुसरणमन्वेषणं।

वसंते वासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे बहुविहि
तकृष्णानुसरणां। अमंदं कंदर्पज्वरजनितचिंताकुलतया च
लद्बाधां राधां सरसमिदमूचे सहचरी।।७।।

ययातादृशीं तत्रापि हेतुगर्भं विशेषणमाह। कंदर्पज्वरेण जनिता या चिंता तत्कृता
याकुलता तया आमंदमधिकं यथास्यादेवं चलद्बाधा चर्घिमा पीडा। अवयवैरि
त्रजटाभिस्तापसइतिच द्विशेषणे तृतीया। महारण्ये नाभिलाषचिंतारूपेदशे क
थिते। तल्लक्षणं। अभिलाषः स्पृहा तत्र कामे सर्वांगसुंदरे। दृष्टे श्रुते थ तत्रापि विस्म
यानंदसाध्वसादिति यथा दशरूपके कथं स वल्लभः प्राप्य किं कुर्यां तस्य सिद्ध
स कथं स्याद सौ वशाइति चिंताभवेद्यथेति शृंगारतिलके। सुकुमारावयवै
कांतारे भ्रमंतीमित्यनेनाभिसारेऽनुरागः सोऽश्वं दर्शितः। तद्यथा।।८

बहुप्रेमाद्यभिसृतेतद्भूयाद्युन्मादित्तेयुवतिजने गोपांगनांगणेनृत्यति सत्यपिच
योसहनं स्यामित्युः॥ ताभिः समंनविहरति। केचित्तुहरिरिहसरसवसंतेयुवतिज
नसमंविहरति नृत्यतिचेतिव्याकुर्वंति तत्तुराधाभिसारायसख्याअसूयाहेतुकथना
न्नसंगच्छते। ननुप्रथमानुरागः स्यात्सोपिनघटते। पूर्वक्रीडाचर्णनलात्। वक्ष्यति
चारासेहरिमिरुचिहितविलासंस्मरतिमनोममकृतपरिहासमिति। अतोत्रकृतव्या
ख्यानमेवसिद्धं। प्रकृतमनुसरामः ताभिः समंनविहरतीत्यत्रहेतुः विरहिजनस्यच
द्विरहितसकृष्णालक्षणजनस्यदुरंते। ताश्चवसंतश्च तांविनानतसविलासोसा
हप्रदाभवंतीत्यर्थः अतएवतामेवकामयंतीतिभावः॥ विहरतिसनेना। पिश्रिराधाने

विहरतिहरिरिहसरसवसंते। नृत्यतियुवतिजनेनसमंसखि
विरहिजनस्यदुरंते॥ ध्रु॥

हरउच्यते। मेलनसंकोचेपरिहारायसामान्यनारीणांसंगरस्कृतः॥ तथाचयद्वित्वंप्रियत
मेनानुसरिष्यसितदाऽयंवसंतस्त्वयापिदुरंतोभविष्यतीतिध्वनितंसमंसहेत्यमरः॥ ध्रु
वपदमिदं। अत्रद्वादशं। लक्षणान्विता। निसृष्टार्थादूतिसएवातदुक्तं। प्रवृत्तिकुशला
दक्षागूढमंत्रादृढप्रिया। सतंत्रोविधवादासीदुष्टाप्रव्रजितासखीमालाकारादिना
रीचकार्यदूतीष्टसिद्धये। तस्यालक्षणानि। यथा। कालचित्तोधमाभिज्ञासुवेषा
दृढमित्रता। दृष्टाधृष्टासन्नीलाचदक्षाचापल्यवर्जिता। अक्षुद्राचाप्यनुद्विग्नाप्रत्रास्या
द्वादशान्विता किंच। विलासिनोश्चस्वांतस्यास्वर्थोविज्ञायतेयस्याअनुरूपाविमोचतिस्या
कलरमानकूलकृत्। निसृष्टार्थेनिसाज्ञेयाकौतुहलसमन्विते ति। तथाचसत्तविंशतिदूतिकर्माणि

पात्साहनं १ अर्थदर्शनं २ गुणकथनं ३ विस्रंभणं ४ तदनुरागख्यापनं ५ कलानिवेदनं ६ शौ
र्यप्रगटनं ७ बहुमित्रता ८ सुवेशता ९ दुःखसहिष्णुता १० मधुरवाग्वादिता ११ गूढमंत्रि
ता १२ सौख्यवत्ता १३ स्वच्छंदानुवर्तिता १४ उपायज्ञता १५ कालज्ञानवदिता १६ देशविवेकि
किता १७ स्वभावज्ञता १८ सर्वकर्मकुशलता १९ दोषाच्छादनं २० गुणनिरूपणं २१ सौदर्य
शंसा २२ पिशुनवाक्यराहित्यं २३ मृदुभाषणं २४ अर्थप्रदाकथनं २५ विचेष्टितासत्तं २६
परतत्त्वज्ञानं चेति २७ तत्र कालज्ञता प्रोत्साहनार्थवादर्शनादि गुणान्प्रदर्शयति वसं
तस्य सरसतां प्राह। कीदृशे वसंते। ललिताश्च मनोहरा या लवंगलतिका तस्याः
परिशीलनेन परितः शीलनं आलिंगनं तेन कोमलो मृदुर्लो मलयसमीरो मलया
चलसंबंधी वायुः यत्र तादृशे। एतेन वासो

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे। अलिकुल
संकुलकुसुमसमूहनिराकुलबकुलकलापे॥ २॥ वि०॥

स्तेविध्यमुक्तं। लवंगलतानायिकायोगात् समीरस्योदीपनता कथिता। अन्यांश्चोद्दीपनविभा
वानुदर्शयति। पुनः कीदृशे वसंते। मधुकरनिकरणभ्रमरसंमूहेन करंबिते। मिश्रिते। तायकों
किलास्तैः कूजितः मधुरशब्दयुक्तः कूजनैः कुंज एव कुटीरो ल्पाकुटी यत्र तादृशे। शीलनालिंगनेस
मेनि विभ्वः। समीरमारुतमरुदित्यमरः। मधुव्रतो मधुकर मतुलिट् मधुपालनइति स्तोमौघ
निकरव्रातवारसंघातसंचयाः इत्यपि। मिश्रितं करंबितमिति चा। अल्पा कुटी कुटीरः इत्यपि। ध्व
वसंतस्य दुरंततामाह। उन्मदो उद्धतो मदनो यत्र। उद्धतो मदनो यस्मिन्निति वा। तादृशो मनोर
थो येषां तादृश्या ये पथिकानां च धूजना तैर्जनितो विलापो यत्र तादृशे। पुनः कीदृशे। अलिकुलै
भ्रमरसमूहैः संकुलो व्याप्तो यः कुसुमसमूहस्तेन निराकुलीकृतो बाणाकुला व्याकुलो बकुलकला
पः केसरसमूहो यत्र तादृशे। अथवा तादृशो बकुल एव कलापो भूषणं यस्य। कलापो स्मरतूणीरो वा।

संकुलं वाच्यवरासे विस्पष्टार्थे वर्चस्यपीति विग्रहः। केसरे
बकुलस्य स्मरः। कलापो भूषणे बर्हतूणीरे संहते पिच्छ॥ २॥

पुनः कीदृशे॥ मृगमदस्य कस्तूरिकायाः सौरभ रभसः सौरभवेगस्तस्य वशंवद आपयत्त वा दिनी नवदलमाला नूतनपत्रपंक्तिर्येषां तादृशाः स्तमाला यत्र तादृशे॥ पुनः कीदृशे॥ युवजना नां हृदयं विदारयंतीति युवजनहृदयविदारणास्तादृशा ये मनसिजस्य कामस्य नखास्तेषा मिव रूचिर्दीप्तिर्येषां तादृशा ये किंशुकाः पलाशकुसुमानि तेषां जालं समूहो यत्र तादृशे॥ किं शुकजालानि पलाशकलिकाइतिवा॥ अत्र पलाशकोरकस्य वक्रत्वेनारक्तत्वेन च हृदयविदा रणादुधिराक्तमनसिजनखस्य सादृश्यं॥ नखसौदर्यं च कथितं मृगनाभिर्मृगमदः कस्तू रीचेस्समरः॥ रभसो वेगहर्षयोरितिविश्वः॥ रूचिर्मयूखत्वशोभायामभिषंगाभिलासयो रितिच॥ पलाशो किंशुक इत्यमरः॥ जाले गवाक्षजनायेकोरके दंभवृंदयोरितिविश्वः॥ ३॥ मदन

मृगमदसौरभरभसवशंवदनवदलमालतमाले युवजनहृदयविदा
रणमनसिजनखरुचिकिंशुकजाले॥ ३॥ मदनमहीपतिकनकदंडरु
चिकेशरकुसुमविकाशे॥ मिलितशिलिमुखपाटलिपटलकृतस्मर

स्ययः कनदंड सुवर्णघटितछत्रदंडस्तस्येव रूचिर्यस्य वा दृशः केसरस्य नागकेशरपुष्पस्ये तिशाब्द साहचर्यात्॥ अथवा॥ विरहिणां दंडनार्थं दंड एव॥ पुनः कीदृशे॥ मिलिताः शिलिमु खाः भ्रमरा एव बाणा यस्मिन् दृशा यत् पाटलिपटलं पाटलिपुष्पसमूहः तेन कृतं स्मरतू णस्य कंदर्पतूणीरस्य विलासश्शोभितं यत्र तादृशे॥ अत्र परमव्यभाजनेकत्वेन भ्रमराणां चितिच॥ समूहे पटलं न तेस्यापि॥ तूणोपासंगतूणीरनिषंगाइषुधिर्द्वयोरित्यमरः॥ ४॥ गलितं विशेषेण गलितं लज्जितं लज्जा यस्य तादृशास्य जगतः प्राणगणस्य वि लोकनेन दर्शनं नतरूण करूणेः नवीनकरूणवृक्षे पुष्पविकाशव्याजेन कृतो

हासो यत्र तादृशो। अत्र हास्यरसस्य श्वेतत्वात् श्वेतपुष्पं विकाशसाम्यं। यदास्मरतः।
श्वेतहासः प्रकीर्तित इति। अथ च तरुणकरुणेरित्यनेन वृंदावनवृक्षादीनां नित्यतारु
ण्यमेव प्रतिपाद्यते। भगवत्क्रियत्वात्। अथवा। विगलितलज्जितानां जगतां वियो
गिजनानां दर्शनेन संदर्शनेन तरुणैरर्थाद् वियोगिभिः करणं करुणारससहितं य
थास्यादेवं कृतो हासो यत्र तादृशो। हा विरहिणो वराकाः कष्टं प्राप्नुवंतीति करुणाः
लज्जा हित्वा विलपंतीच हासस्तेषामिति भावः। कलारसानभिज्ञा एव च वृक्षाः। परप्रेष्य
वे पि कृतसंचरणाः अतस्तरुणेत्युक्तं। अथवा। विगलितं कोकिलादिभिः पक्षिगुणैः
शब्दायमानैः गलितं भुवि स्खलितं अत एव लज्जितं। गच्छंतीति जगत् संघिककुलं विभिः

विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे। विरहिनि
कृंतनकुंतमुखाकृतिकेतकिदंतुरिताशे॥ विहरति०॥७॥

ज्जितं च तज्जगच्चेति समासः। तस्यावलोकनेन तरुणे संयोगिभिः कारुण्येन कृतो हंसो
यत्र तादृशो। पुनः कीदृशो। वसंते विरहिणां वियोगिनां निकृंतनाय विदारणाय कुंतमु
खाकृति कुंत आयुधविशेषः तस्य मुखमग्रभागस्तस्येव आकृतिर्यस्य तादृशो
यः केतकं तेन दंतुरिताः व्याप्ता विषमीकृता वा आशा दिशो यत्र तादृशो। क्वचित्के
तकिदंतुरिताशे इति पाठः। तदा इकारो न्हस्वः। क्वचिद्ग्रहणस्य लक्ष्यानुरोधार्थत्वा
कृतन्हस्वेन केतकिशब्देन समर्थनीयाः। लज्जिते स्यत्र नपुंसके भावे क्तः। कृतिछ
दन इति ह्रस्वानुबंधोस्तीति। केचित्। तस्य ल्युट्प्रत्यये तस्य निकृंतनमिति प्र
योगाः। साधुरुणस्फुरसे वृक्षकृपायां करुणा मतेति विश्वः। आशीस्तु कुनइस्व
मरः। निम्नोन्नतिनघाव्याप्ते दंतुरं कथ्यते बुधैरिति विश्वः। अन्यातृच्छदिशो रिति

पुनः कीदृशे। माधविकायाः वासंत्याः परिमलेन सौरभेण ललिते मनोहरे श्लेषेण माध
वस्य यं माधविकातस्याः परिमलेन कांतविमर्द सौरभेण ललिते मनोज्ञे। उक्तं च।
आलिंग्येव प्रियेयाले कामनिर्जितचेतसा। स्फुरत्स्मरत्युक्तिरचना माधवी नायिका मता।
माधवशब्देन वसंत एव नायकः। श्रीकृष्णसंगमायातां वस्यति विभावोद्रेककथ
म नेनेति ध्वनितं। पुनः कीदृशे। नवमालतिकया नवमल्लिकाख्यपुष्पेण अतिशायेन सौर
भयुक्ते। पुनः कीदृशे। मुनिमनसामपि मोहनकारिणि मोहजनके अन्येषां मोहे किंव
वक्तव्यमित्यपिशब्दार्थः। तथा च मुनिमवसां मे निवृत्तीनां मानिनीनां मोहनकारिणीति ध्व
नितं। पुनः कीदृशे। तरुणानां विलासयुवजनानां अकारणबंधौ स्वाभाविकमित्रपर
मानंदप्रियइत्यर्थः। नवमालिकजातीति पाठे नवमालिकं नवमालिकाकु

माधवीकापरिमलललिते नवमालिकयातिसुगंधौ॥ मुनिम
नसामपि मोहनकारि तरुणाकारणबंधौ॥ ध्रु॥ विहरति०॥

सुमं च जातिश्चेति ताभ्यामित्यर्थः। विमर्दोत्थे परिमलो गंधे जनमनोहरे स्यमरः। ६। पुनः की
दृशे वसंते स्फुरंति कंपमानो सोभवमाना वायाः अतिमुक्तलतानस्याः परिरंभेनालिंगनेन मु
कुलितपुलकिनः मुकुलितं मुकुलं तदेव पुलकोरोमांचः तद्युक्ते श्चूतः आम्रो यत्र तादृशे। अत्र
कांतस्य संगमरसेन सात्विकोद्रेकात्कंपमानायाः लतानालिकाया परिरंभेण चूतनायकस्या
पि रोमोद्गमेनाचेतनयोरपि कामोन्मेषः कथितः। तेन वसंतस्यातिदुरंतत्वं कथितं। तथा चा
तिमुक्तपदेनातिशायमुक्तानामपि परिरंभणौत्सुक्यमिति ध्वनितं अतिमुक्तायाः कस्याश्चि
द्ववन्माधुर्यभराकृष्टायास्तदुपासनार्थं वृंदावने लतारूपत्वमिति या। तदा अतिमुक्ता त्वासौ
लता चेति समासः। अनेनातिमुक्तेः वैकुंठवासिभिरपि श्रीवृंदावने लतात्वस्पृह

णीयमित्यत्र माधुर्यभरो निरापिनः॥ तत्कंचा आसामहो चरणरेणुजुषामहं स्यां वृंदावने किमपि
गुल्मलतौषधीनामिति। एतावता वसंतस्य सरसतां दुरंततां चाभिधाय संप्रति क्रीडायाः स्थान
विशेषमाह। वृंदावन इत्यादि। वृंदावननाम्नि विपिने हरिः विहरतीत्यन्वयः कीदृशे विपिने।
परिसरे समीपप्रदेशे परितः सर्वतो गतेन यमुनाया जलेन पूते पवित्रे परसरपरिगतं च
तत् यमुनाजलं च तत्र पूतं यस्मिन्निति वा। पावनस्य यमुनाजलस्य। अधिकपावनत्वेन किं
वक्तव्यं तस्य पावनत्वमित्यर्थः। तथाचार सोयः परमाधारः सच्चिदानंदलक्षणः। ब्रह्मसंपनिष
दुक्तं स एव यमुनास्वयमिति वचनात्। एवंभूतमहिम्नोपलक्षितायास्तस्याः पावनत्वेना
ति मुक्तेः स्पृहणीयत्वं तस्य सिद्धमिति दर्शितं। पावनत्वमत्र भागवद्र

स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते॥ वृंदावनविपि
ने परसरपरिगतयमूनाजलपूते॥७॥ श्रीजयदेवभणितमिदमुदयति
हरिचरणस्मृतिसारं॥ सरसवसंतसमयवनवर्णनमनुगतमदनविका

सविशेषानुभावादुच्यते। नतु पापमात्रक्षयादिति। वृंदमवतीति वृंदावनं वेपकादि वृंदं गोपीवृंदं
वा। भगवत्केलिसुखसंपादनात्। अतिमुक्तः पुंड्रकः स्याद्वासंती माधवी लता तस्य भरः। पर्यंत भूः प
रिसरः इत्यपि॥७॥ संप्रति गीतार्थमुपसंहरन् स्वभणितेरुत्कर्षमाह॥ श्रीजयदेवेत्यादि॥ श्री
जयदेवकवेः इदं। भणितं उदयति राजते। अथवा। द्युक्षियपदिवासुरसे पदं। तत्र हेतुः
हरिचरणयोः स्मृतिः स्मरणं तेन सारं श्रेष्ठं अथवा हरिचरणस्मृतिरेव सारो यत्र ता
दृशं। पुनः कीदृशं सरसं शृंगाररसप्रधानं वसंतसंबंधिनो वनस्य वर्णनं यत्र ता
दृशं। अतएवानुगतमदनविकारं अनुगतः संबद्धोनुस्यूतः मदनस्य विकारो य
त्र तादृशं॥ अथवा॥ मदनः॥ श्रीकृष्णः तस्य विकारः भावोद्रेकः राधांप्र

तिसख्यावर्णनेन अनुगतः यस्मिन् समुदिते तादृशं मदनसंबंधि विकार अनुगतं॥ श्रोतॄणां हृदि यस्मात् दिति वा॥ सरसवसंतसमयवनवर्णनमिसस्य विशेषणं वा नुगतमदनविकारमिति वा॥ ८॥ ॥इति श्रीगीतगोविंद जयदेवकविकृत काव्ये तृतीय प्रबंधः॥ ॥३॥ इदानीं वसंतकालीनकाव्येरपि विरहिजनसंतापकत्वमाह॥ दरविदलितेत्यादि॥ इह हि अस्मिन्नेव वसंते गंधवाहो वायुश्चतो दहति अर्थाद्विरहिणां॥ किं कुर्वन् कैः दरदूषद्विदलिता विकसिता वल्लिः मल्ली या मल्लिका लता तस्याः सकाशात् चंचंतः उद्गच्छंतः ये परागाः पुष्परेणवः त एव प्रकटिताः पटवासाः पिष्टातकाः तैः कीदृशो गंधवाहः केतकीगंधबंधुः केतकीसौरभसहचारी पुनः कीदृशः प्रसरत्स्मृति दिशं संचरन् तोआसमबाणस्य

दरविदलितमल्लीवल्लिचंचत्परागप्रकटितपटवासैर्वासयन्काननानि॥

इह हि दहति चेतः केतकीगंधबंधुः प्रसरदसमबाणप्राणवद्गंधवाहः॥ ९॥ निवास्मरस्य प्राणवत्प्राणसंदृशः॥ अथवा प्रसरता असमबाणेन प्राणवान् शक्तिसंपन्नो यो गंधवाह इत्येकमेव पदं॥ अथवा॥ किंभूतं च न प्रसरन्॥ आर्थान्मिनोरथं प्रति असमबाण प्राणवत्॥ कामस्य जीवितमिव॥ दूषदर्थ दरोव्ययमिति विश्वः॥ परागपुष्परजसीति च॥ पिष्टातः पटवासकइत्यमरः॥ गंधवाहानिलाशुगा इति च॥ ८॥ अद्भुतसंगाइति॥ श्रीखंडशैलानिलोत्पलयसंबंधी पवनः ईशाचलं ईशस्य महादेवस्याचलं पर्वतं हिमालयं अनुसरइति॥ कस्मादिव॥ अद्रेः मलयस्योत्संक्रीडे च संतो ये भुजंगाः सर्पास्तेषां कवलेन जनितोयः क्लेशः संतापस्तस्मादिव॥ तर्हि हिमाद्रिं किमिति व्रजतीत्यत आह॥ प्रालेयति प्रालेयं तुषार स्तस्य प्लवनमवगाहनं तस्येच्छया॥ तत्र सर्पैः कवलितो द्वीणी स्य पवनस्य तद्विषसंपर्कादधिकं विरहिणां संतापकत्वं ध्वनितं वस्तुतस्तद्दक्षिण

थायोः शीतलत्वात्सुखकरत्वाच्च विरहिणां दुःसहपरिणामेन सर्पयसनं हिमाप्लवनमित्याकोत्रा।
न केवलमिदमेव दुःसहं। वसंते। अपरमपि साह। किं च। इति पिकानां कोकिलानां कुहुकुहु रिति
गिरः। वाचः। उन्मीलंति प्रकटीभवंति। कीदृग्वाः कलोनालाः कलाः अव्यक्तमधुराः उत्तालाः उ
द्गताः कस्मात् स्निग्धा येरसालाः अम्रवृक्षाः तेषां मौलयः अग्रभागास्तत्र यानि मुकुलानि त
न्यालोक्य वीक्ष्य योहर्षोदयः आनंदस्याविर्भावस्तस्मात्। तत्र कचिद घुसृंगोति पाठः तदा
आद्यवसंतदृश्यर्थः। तुषारस्तुहिनं हिमं प्रालेयं मिहिकाचे समरः। उत्तालोहेमकुंडे स्यादृर्म
चोत्तालउद्भटे ताला। पिकानां गिरः ॥९॥ उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्री
डत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः। नीयंते पथिकैः कथंकथमपि ध्याना
धानक्षणप्राप्तप्राणसमासमागमसोल्लासैरमी वासराः ॥१०॥

अधुसंगावसद्भुजगकवलकुंनादिवेन्नाचलं प्रालेयप्लवनेच्छयानुसरंति
श्रीखंडशैलानिलाः। किं चास्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया
दुन्मीलंति कुहुःकुहुः रिति मलो

श्रेष्ठे पिचिक साला पिस्याद्दुतालः प्लवंगमेत्ति विश्वः ॥७॥ संप्राति वसंतदिवसानामपि दुरं
तत्वमाह। उन्मीलदित्ति। अमी वसंतसंबंधिनो वासरः। दिवसाः पथिकैः कथंकथमपि
महताकष्टेन नीयंते समाप्यंते। कीदृग्वाः वासराः उद्गीर्णप्रकटीकृतः। कर्णज्वरः श्रोत्रसं
तापो यैस्तादृग्वाः कैः उन्मीलंति प्रकटीभवंति यानि मधूनि गंधाश्च तेषु लुब्धाः लोलु
पा भ्रमरास्तैर्व्याधूताः कंपिताय चूतांकुराः आम्रमुकुलानि तेषु क्रीडतां कोकिलानां या
काकल्यः अव्यक्तमधुरध्वनयः तासिद्धृता ये कलकलाः कोलाहलास्तैः। तदुक्तं वसंते प
चमं वक्ति कोकिलइति उद्दीपनविभावोदन्नितिः केन प्रकारेण नीयंत इत्यत आह।
ध्यानेति। ध्याने स्वप्रियाचिंतने मदचधानं तत्परत्ता तेन क्षणं प्राप्तोयः प्राणस

मायाजीवितनुल्यास्ताः कांतायाः समागमस्तयोः रसस्तम्भादुत्पन्नाये उल्लासा उत्साहास्तैः पथि कविशेषणं वा। कीदृशैः ध्यानवधानेन क्षणं प्राप्तोयः प्राणसमा या सा समागमरसस्तस्मिन्नुल्लासो येषां तादृशैरिति। अनेन श्रीकृष्णस्यापि प्रियाध्यानेन कष्टं नवसंतवासरं निर्वाहितमिति ध्वनितं। काकलीनुकलेसूक्ष्मे ध्वनौ विस्मर ः कोलाहलः कलकल इति च॥१०॥ एवं उद्दीपनविभावादर्शिताः संभ्रमानुभावं दर्शयिति। अनेकनारीत्यादि। असौ सखी राधिकां पुनराह। पुनः कथितवती किं कुर्वती आराददूरे समक्षं प्रत्यक्षं मुरारिमुपदर्शयिती कीदृशं अनेकनारीणां परिरंभसंभ्रमेण आलिंगनादरेण स्फुरन्यो मनोहारीविलासः अंगविकारः तेन लालसा औत्सुक्यं अर्थाद्दर्शनायां यस्य तादृशं॥

अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं॥
मुरारिमारादुपदर्शयंत्यसौ सखी समक्षं पुनराह राधिकां॥११॥

अथवा। अनेकनारीणां परिरंभसंभ्रमेण स्फुरन् चित्तारूढो भवन्यो मनोहारी हरेश्चित्तापहरी श्रीराधाया विलासः हासादिलक्षणः तस्मिन् लालसा यस्य। परिरंभसंभ्रमः अन्योन्यसख्यालिंगनलक्षणाभियोगस्तेन स्मारित श्रीराधाविलासेन तत्सखीषु लालसं प्राप्तमिति। मुरारिमारात् श्रीकृष्ण एव कामस्तस्मादनेकनारीणां परिरंभसंभ्रमेण स्फुरदाविर्भवन्यो मनोहारी विलासस्तेन लालसो औत्सुक्यं भावविकारं दर्शयिती त्यर्थः अनेन तदभिमरणायता साभावक्रियानिरूपणेन नायकगुणाधिक्यं दर्शितं। चक्ष्यति चापीनपयोधरेत्यादिना संभ्रमेत्र यमिच्छंति भयमुद्वेगमादरं त्वरायामपि संभ्रम इति। लालसो लालस्यापि स्याप्याचातृष्णातिरेकयोः औत्सुक्ये चेति विश्वः आराद्दूरसमीपयोरित्यमरः तथा संभ्रमपदोपादनाल्लालसमिसनेन च तासामालिंगनापेक्षयाति दालिंगनापराधिक्यं दर्शितं किंच आरात्किंचिद्दूरे समीपे वा तस्याः प्रत्यक्षं यथा स्यात् तथेति॥११॥

तदेवगीतेन प्रपंचयति। चंदनेत्यादिना। रामकरीरागेण गीयते यतिताले। रागलक्षणं॥
स्यवर्णप्रभाभास्वरभूषणा। चलेनिचोले सुतनोचहंती। कांतेपदोपांतमधिश्रितेपि मानो
न्नता रामकरी प्रदिष्टा॥ ताललक्षणं प्रागुक्तं। गीतार्थस्तु। हे विलासिनि विलासशीले इह
श्रीमद्वृंदावने मुग्धवधूनिकरे सुंदरगोपवधूनिचये हरिर्विलसति। क्रीडां करोति। की
टे०क दृशे वधूनिकरे केलिपरे क्रीडापरायणे। अत्र मुग्धपदेन हावाद्यनभिज्ञत्वं केलिपरेत्यनेन
हावाद्यभिज्ञत्वमेव सकलकलाभिज्ञतापक्षे इति भावः। मुग्धदृक्सुंदरमूढयोरिति विश्वः।
विलासो हावविशेषस्तल्लक्षणं। यानस्था।

चंदनचर्चितनीलकलेवरपीतवसनवनमाली केलिचलन्म
णिकुंडलमंडितगंडयुगस्मितशाली॥१॥ हरिरिह मुग्धवधू
निकरे विलासिनि विलसति केलिपरे। ध्रु।

नासनादीनां नेत्रवक्त्रादिकर्मणां। उत्पद्यते विशेषो यः स विलासः प्रकीर्तित इति भरतोक्तं।
अथवा केलिपरा उत्कृष्टा सर्वातिशायिनी यस्यास्तत्संबोधनं। केलिपरे इत्यपि। मुग्धाश्च
ता वध्वश्च मुग्धाः मुग्धेति नायिकालक्षणान्विताः तासां निचये हरिः स्वविलास
कौशलैः अखिलनारीमनोहरतीति। सकलकलाकुशलस्य तासु मुग्धासु तादृशहा
वाद्यनुपपत्त्या यैव तस्याखिलविक्रीडापर्याप्तिः। तामेव कामयतीति। किंचोक्तं तथा
तत्र गंतव्यमिति भावः। मुग्धायाः लक्षणं शृंगारतिलके मुग्धा नववधूस्तत्र नवयौवनभू
षिता। नवानंगरसस्यापि लज्जाप्रायरतिर्मतेति। किंचाकृतापराधे दयिते बाष्परुद्धा
वलोकना प्रिया प्रियंकौ चाशक्ता मानेन विमुखी सदा। किंच नवयौवनलेनापि दृष्यच्चलकां

सगर्वसरजोगंडसममग्रारुणाधरं। लावण्योद्रेदरस्यांगं चिलसद्भावसौरभं। उन्मीलितांकु
रकुचमस्फुटांगकसंधिकं। प्रथमे यौवने तत्र वर्तमाना मृगेक्षणा। अपेक्षते मृदुस्पर्श
स्मितं तेनोद्धतां रतिं। सखीकेलिरसास्यांग संस्कारकलितादुरानकोपहर्षभिजते स
पत्नीदर्शनादिषा। नातिरज्यते कांतस्य संगमे किन रुंधती नितल्लक्षणात्। अथवा। अत्र द
क्षिण्यैरूपो नायकगुणउक्तः। न कंतत्रैव। योगौरवभयं प्रेमसद्भावं चपूर्वयो षिति। नमुं
चत्यन्यचित्तोपि ज्ञेयो सौ दक्षिणो यथेति। केचित्तु। नायकाः स्वपत्नेकासु तुल्यो दक्षिण
उच्यते इति। अत्र न घटते श्रीराधाया मनुरागाधिक्यश्रवणात्। यथा सर्वगोपीषु सैवै
का विभोरस्त वल्लभेति। पद्मे। श्रीभागवते च। अनया राधितो नूनं भगवान् हरिरीश्वरः।
यन्नो विहाय गोविंदः प्रीतो यामनयद्रह इति। वृषभानुरिति ख्यातो नंदगोपग्रजेवसन्।
तस्य कन्या वरारोहा राधानाम्नीति च स्मृता। इति वाराहे। राधया माधवो देवो माधवेनै
व राधिका। विभ्राजते जनेष्वधी इति क्रकूपरिशिष्टे च। जने भु सर्वगोपीजने ध्वि स्पर्धः तदेवं
संगतिः प्रथमे न्हि तया सह विलासं समाप्य द्वितीये न्हि तत्संकेतिताभिसारे तस्या एव सौभा
ग्यातिशय पोषणाय विविधरस वैचित्री समुदायोदयाय निशामेव श्रीमद्भगवतः सेयानु
बाणस्य परिपूर्णशृंगाररसस्य योगान्मीलिते नायकरत्नगुणाकृष्टगोपीगणेन दुणाकृष्ट
चित्तोपि तद्योग्यचेष्टयात तस्यासंगमामृतं कासयमानो पिताभिः सह क्रीडां कृतवानिति।
एतद्ध्रुवपदं। अथ पदानि। कीदृशो हरिः। चंदनेन चर्चिते नीलकलेवरे स्यामश
रीरे पीतवसनं पीतवस्त्रं वनमाला च यस्य तादृशः। पुनः कीदृशो हरिः। केलिषु चलतीकंमाने
ये मणियुक्ते कुंडले ताभ्यां मंडितं अलंकृतं गंडयुगं कपोलयुग्मं यस्य स्मितेन ईषद्धसितेन
चित्रालाशोभमानः। स्मितलक्षणं भरतो। ईषद्विलसितैर्गंडैः कटाक्षैः सौष्ठवान्वितैः। अल
क्षितद्विजं धीरमुत्तमानां स्मितं भवेत्। तथा च चेतचंदनपीतांबर ४० विविधपुष्पमालया स्मि
तेन च स्यामशरीरो विशेषेण तच्छित्तप्रलोभनाय शोभातिशयत्वं कथितमिति भावः। ११। ७४

मुग्धानां चेष्टितमाह। पीनेत्यादिना। काचिद्गोपवधूः पीनपयोधरभारभरेण सोल्लसन
गौरवातिशयेन सरागं सानुरागं यथा स्यादेवं परिरभ्यालिंग्य तदुदंचितं ऊर्ध्वमंचितः
पंचमाख्यो रागो यत्र एवं यथा स्यात्तथा अनुगायति। अनुपश्चाद्धरेर्गानानंतरं गायति।
उदंचितपंचमस्वररागो यथा स्यात्तथेति वा। तत्र पीनपयोधरेत्यादिना सौंदर्यं प्रतिपादि
तं। मुग्धत्वं च तस्य परिरंभणोद्यमं विनैव प्रथमपरिरंभणात्। अन्योन्यकृते परिरंभे हि
शृंगारः पुष्टो भवति। तदुक्तं दशरूपके। रम्यदेशकलाकालवेषभोगादिसेवनैः। प्रमोदात्मा
रतिः सैव यूनोरन्योन्यरक्तयोः। प्रहृष्यमाणः शृंगारो मधुरांगविचेष्टितैरिति। किंच। श्री
कृष्णस्यानुगानेन गीतशिक्षापितेनेति ध्वनितं समशिक्षयैव रसोत्पत्तिः। तथाह्या। काचि
त्समं मुकुंदेन स्वरजातीरमिश्रिताः। उन्निन्ये पूजिता ते

पीनपयोधरभारभरेण हरिं परिरभ्य सरागं। गोपवधूरनुगायति काचिदुदंचितपंचमरा
नश्रीयता साधु साध्विति। तदेव ध्रुवमुन्निनेतुं स्वैमानं च बहु दाति रिंभागवतोक्तं। अथवा।
सरागमित्यादि हरेर्विशेषणं। कीदृशं हरिं सरागं रागेण तच संभोगस्खलित सिंदूरादिना
सह वर्तमानः स्वरागः स्वेनलयि सानुरागं सरागमिति वाः तत्र हेतुमाह। पुनः किंलक्षणं उदं
चितश्चासौ राविधितु ध्वंनीतं पंचमस्वरो येन तादृशं। तदुक्तं भरतेन। मध्यपंचमभूयिष्ठः
स्य शृंगारयोर्भवेदिति। शृंगारपंचमस्वरो बाहुल्येन भवतीति तत्वदनुरागेण लदा व्हा
न संकेते नैगायतीति भावः। अथवा पंचमो उदंचितो रागो यन तादृशं। उक्तं च। निषादर्ष
भ गांधार षड्ज मध्यम धैवताः। पंचमश्चेत्यमी सप्त तंत्रीकंठोत्थिताः स्वराः। निषादं हेष
ते वाजी गाव ऋषभभाषिणः। अजाविकं तु गांधारं धैवतं बृंहते गजः। षड्जं मयूरा ब्रुवते म
गी मध्यमभाषिणः। पुष्पसाधारणे काले कोकिलो रौति पंचमं भिति चः। केकिच्या षड्ज
वदेन्मयूरो पिऋषभं चातकोवदेत्। अजावदिति गांधारं क्रौंचो वदति मध्यमं। पुष्पसाधा

रणे काले कोकिलो रौति पंचमं। ददुरो दैवतं चैव निषादं च वदेद्गजः इति हलायुधः। हास्य
शृंगारयोर्ज्ञेयौ स्वरौ पंचममध्यमौ। षड्जर्षभौ तथा ज्ञेयौ वीररौद्राद्भुतेरसे। गांधारश्च नि
षादश्च कर्तव्यौ करुणारसे। धैवतश्चैव कर्तव्यो बिभत्से च भयानके। भैरवपंचमो मधम
ल्लारो गौडमालवौ देशाख्यश्चेति षड्रागाः प्रोच्यंते लोकविश्रुताः। सप्त स्वरास्त्रयो ग्रामा
मूर्छनास्त्वेकविंशतिः। तानास्त्वेकोनपंचाशदित्येतद्वयस्य लक्षणमिति। एवं तद्रागमो
हिता यास्तच संभोगचिह्निते नव्यसंकेते गायता सहालिंगने नानुगायनेन नस्याः मौ
ग्ध्यं स्फुटमेव कथितमिति भावः। तथा च स्त्रियो हि गीतेन मोहिता भवंति। तदुक्तं। गोप
स्त्वद्गीतमाकर्ण्य मूर्छिता नाविदंस्वपास्त्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं

कापि विलाससविलोलविलोचनखेलनजनितमनोजं। ध्यायति
मुग्धवधूरधिकं मधुसूदनवदनसरोजं॥ हरिरिह म०॥

ततः इति भागवते श्रुतिश्चा अपक्रम्यातिष्टनू तद्रोहिनोजन्मते देवा अब्रवन्नयमुष्म
दक्षु तेणवास्मानुवर्तते विष्णयामहा इति ब्रह्मगंधर्वाश्चिवदश्च गायन्देवाः सा देवानुगाय
त उपावर्तन तस्मात् ध्यायंतं स्त्रीषु कामयंते कामुकाः। एवं स्त्रियो भवंतीति। श्रीराधायाः अ
पेतस्याः अगौरवसूचनाय कापि इति। स्क। पंचमो रागभेदेस्या स च नाम अपि पूरणे। पंचम
श्चतुरे हृद्ये पंचमः प्राउ वो स्त्रियामिति विश्वः॥२॥ कापि सादि। कापि मुग्धवधूः मधुसूदनस्य व
दनसरोजं मुखपद्मं अधिकं यथा स्यात्तथा ध्यायति चिंतयति। कीदृशं। विलासेन
चिलोलयोश्चंचलयो विलोचनयोः यत्खेलनं तेन जनित उत्पादितः मनोजः कामो ये
न अर्थात्तस्यामेव तत् आधिकमित्यपि मुखस्य विशेषणं वा। तदा पुनः कीदृशं मुखपद्मं
अतुललोचण्यास्पदमित्यर्थः। सौगंध्यादिगुणाख्यापनाय मधुररसास्पदे नाधिका
मोद्वाघकत्वाच्च नापहारकत्वाच्च वदनससरोजोपमा। मधुसूदनपदेन तस्यामनुरागस्यास्थि

काःपिकपोलतलेस्यादि। कापिनितंबवती दयितेन प्रेष्ठं कपोलतले चारु मनोहरं यथास्यात्तथा चुंबचुचुंबनं कृतवती किंलक्षणा। किमपि कार्यं लपितुं मंत्रयितुं श्रुतिमूले कर्णमूले मीलिता संलग्ना कीदृशेः पुलकैः रोमांचैः अनुकूले प्रियामिलासी सूचकैः। औत्सुक्येन सा कांतमुखचुंबनं सर्वजनहास्यकं स्मृतीतिव्याजेन चातुर्यं प्रसार्य प्रसार्य तदारब्ध मितिभावः। अत्रापि स्वयमेव प्रथमं चुंबनेन तस्याः अधीरत्वं ध्वनितं नितंबवतीत्य नन सौंदर्याधिक्यं च कथितं अथवा कापि नितंबवती सुंदरी परमविदग्धा तव सखी श्रुतिमूले लग्ना किमर्थं किमपि तव संगमवार्त्तां लपितुं कथनार्थं मित्यर्थः। तत तदा किं कृतवती तदा हृदयितं पुलकैरनुकूले कपोलतले चारु चुचुंब॥

कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले। चारु चुचुंब नितंबवती दयितं पुलकैरनुकूले।४। केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले। मंजुलकुंजगतं विचकर्ष करेण दुकूले

तव कथाश्रवणादि सात्विकविकारेण मय्यनुगतत्वं सूचके कपोलतले तत एवाचारु पथास्यात्तथा चुचुंब अनुमोदनं कृतवती स्वयं स्वयं। यदा तव वार्त्ता श्रवणेनापि एतादृशो। भव तितदा किं च कर्त्तव्यं तव संगमानुरागः ततः मेलनमेव कार्यं।४। केलीत्यादि। काचिगोपसुंदरी अमुं श्रीकृष्णं केलिकलाकुतुकेन दुकूले पट्टवस्त्रविषये विचकर्ष आकृष्टवती दूकूले गृहीत्वा अमुं विचकर्षेति केचियोजयंति। कीदृशं। मञ्जुलो मनोहरो यो मञ्जुलो वेतसो यत्र तादृशो यः कुंजः तत्र गतं तव सखीं निरीक्षयंता सा बवचनायस्मात् कुत्रचिच कर्ष। यमुनाजलकूले यमुनायाः जलयुक्ते रोधसि तव आगमनो

शाय निलीयवंजुलकुंजस्थंश्रीकृष्णंयमुनाकूलेप्रतिक्रीडार्थंआकृष्टवतीस्पर्धः॥ अत्रा
प्यन्यानुरक्तस्यवस्त्राकर्षणादधीरत्वंव्यंग्यं॥ अथवा केलिकलाकुतुकेनतवविलासो
त्सुक्येनतासांवचनंकृत्वायमुनाजलकूलेतटे योवंजुलकुंजः बकलकुंजः तत्र गतं
अमुंकाचित्करेणदुकूलेविचकर्षेत्यन्वयः॥ कुतुकंचकुतूहलमित्यमरः॥ मनोज्ञंमं
जु मंजुलमितिच॥ वंजुलोबकुलेख्यातेवंजुलोवेतसेमतइतिधरणिः॥ दुकूलंक्षौमे
सूक्ष्मांशुकेपि॥५॥ करतलेत्यादि॥ ननुगोपीभिः क्रीडांकुर्वतः॥ श्रीकृष्णस्यकुत्रम
व्यनुरागः कथंवृथाप्रलपंकरोषीतत्तआह॥ स्वयमेवशृणु॥ काचिद्युवतिः वरांगणीरा
धाभिधानाहरिणाश्रीकृष्णेनप्रशंसेसूताकीदृशी॥ रासररसेरससमूहोरासः॥ रास
श्चासोरसश्चेतस्मिन्रासेबहुनर्त्तकनर्त्तकीनांनृत्यविशेषारासः॥ तस्मिन्यो

करतलतारतललवलुयावलिकलितकलस्वनवंशे॥
सहनृत्यपराहरिणायुवतिःप्रशशंसे॥६॥

रसः संगीतकौशलेनचमत्कारविशेषः॥ तत्रेतिवा सहनृत्यपराश्रीकृष्णेनसह
तुल्यंनृत्यतीकीदृशेरासरसेकरतलयोस्तालेनपरस्परंवादनेनतरलाञ्चचला
यावलयावलिःकंकणपंक्तिः तया कलितः मिश्रितः कलस्वनअव्यक्तमधुरशब्द
स्तत्सहितोवंशोवेणुर्यत्रतादृशे॥ अयमभिप्रायः॥ श्रीराधांविनाऽन्ययुवतिगणेष्वा
सोत्सकेमतिश्रीकृष्णपूर्वप्रवृत्तप्रस्तावेनश्रीराधिकास्तोत्रेणाखिलगोपीगणंनि
वर्तयतीति॥ अथवारासरसेरासानुरागेसतिसहनृत्यपरायुवतिःहरिणाप्रशशं
सेकस्मिन्करतलतालतरलवलयावलिकलितकलस्वनवंशेसप्रतितत्कर
तालमिलितवेणुकलध्वनौकेनापिसंकेतेनतवस्तुतिंकरोमितताभिर्नलक्ष्यते॥

तस्तासां मोग्ध्यमिति भावः। द्रुममदेकरास्फालेनालं तु हरितालकरस्य मरः। तरलश्च चले खड्गे हारमध्यमणावपि। नीत्रिचा। वंशोवेणौ कुले वर्गपृष्ठस्यावयवेपि च। रासेरससक्रू रासस्यादित्रिचा। रासस्क गोदुहक्रीभेतिहारावलिः। द्रा। श्लिष्यत्यादि। काममपि रामां क्रीडाशीलां श्लिष्यति आलिंगति। काममपि चुंबति। काममपि मधुरवचनादिना रमयति क्रीडयति स श्रीकृष्णः स्मितेनइषद्धसितेन चारू यथास्यात्तथा परां गोपी पश्यति। रचंनास्वभिसक्तासु दाक्षिणेनालिंगनादिकं पृष्टारोपिण गच्छतीमपरां वामां चक्रस्वभावां मनोहरस्वभावां वा तव सखी अनुगच्छति। अनुनयार्थं अनुगतिं करोति। अथवा। एवं सस्मितावलोकादिमात्रेण तासां वंचने हसां वामां तां अनुगच्छति अनुनयार्थमभि

श्लिष्यति काम पि कांचुंबति काममपि काम पि रमयति रामां पश्यति सस्मितचारूपरामपरामनुगच्छति वामां॥७॥ श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यं। दावनविपिनेललितं वितनोतु शुभानि यशस्यं॥८॥ हरिरिह मुग्धवध॰॥ ॥विपिनविनोदकलावलितं=

अत एव वल्लव्ये वत स्यानुरागः। अतः संगमार्थं विलंबं मा कुरुष्वेति भावः। सुंदरीरमणी रामेत्यमरः॥७॥ श्रीजयदेवकवेः इदं सर्वस्वरूपं गीतं शुभानि वितनोतु विस्तारयतु। कीदृशं। अद्भुतकेशवकेलिरहस्यं क्रीडाकौतुकं यत्र तादृशं श्रीराधारत्नश्रीकृष्णस्याप्यनेकविलासवतीनां अनुरंजकत्वादद्भुतत्वं केशवपदेन सौंदर्यं च कथितं। पुनः कीदृशं। यशस्यं यशप्रदं। वृंदावनविपिनललितमिति पाठे नदाइदं ललितं गीतं शृंगारचेष्टितं वा। वृंदावने अद्भुतकेलिरहस्यं वा॥८॥ अत्राभिसारिकैव नायिका। धृष्टदक्षिणानुकूलशठाश्च नायकाः। तत्र काममपि रमयति रामां सरागमिति सनेन धृष्टः। तथा अभिव्यक्तान्यतरुणीभोगलक्ष्मापि निर्भयः मिथ्यावचनदक्षश्च धृष्टायं खलु कथ्यते। दक्षिणस्तु के

प्रियंवक्ति पुरोन्यत्र विप्रियं कुरुते भृशं॥ निगूढमपराधं च शठोयं कथितो बुधैः॥ मंजुलकंजुल कुंजगतमिति रमयति रामां वेत्यनेनोक्तः॥ अपरां वामामनुगच्छतीत्यनुकूल श्च कथितः॥ तल्लक्षणं वक्ष्यते ये श्रीराधायामनुकूले यदा तदा धीरोदात्तो नुकूल नायक मात्र संघटने॥ तथा कुवलयहृन्नाः संकेत स्यादशावि लकोशालेर्मनसिज कलानारी प्रस्तावनामभितन्वतां॥ न किल घटते राधारंगमसंगाविधायितां बतविलसिते शोभिल्यस्य छटप्य घ द्विषः॥ यच्छपि धीर ललितानुकूलोयं नायकः तथा सर्वनायक गुणाः श्रीराधारसपोषणाय तत्तद्भावैः श्रीकृष्णः संभवति॥ ननु सकलकलाभिज्ञः श्रीकृष्ण कथं हवाय नभिज्ञाभिर्गोपिभिः सहकेलिं कृतवानित्यत आह॥ विश्वेषामिति॥ हे सखी राधे मुग्धो वसंते मुग्धो मनोहारो हरिः क्रीडति॥ किं कुर्वन् विश्वेषां गोपीजनानां [illegible] र्वेषां प्राणिनां वा अनुरंजनेन अनंदं जनयन् पुनः किं कुर्वन् इंदीवराणां॥

विश्वेषामनुरंजनेन जनयन्नानंदमिंदीवरश्रेणी [illegible] मंजुलरूपुन
यन्नंगरनंगोत्सवं॥ स्वच्छंदं व्रजसुंदरीभिरभितः [illegible] लिंगितः शृं
गारः सखी मूर्तिमान् वसंते मुग्धो हरिः क्री[illegible]

रूप्या मकमलानां या श्रेणी पंक्तिस्तद्वत् श्यामलैर्नीलैः [illegible] रंगैरवयवैरनंगस्य कामस्य उत्सवं उपनयन् नुपस्थापयन् स्वावयवानां [illegible] स्यापि संगीकरणात् सौकुमार्यं च कोमलस्यापि स्पर्शासहनतो च्यते॥ तदुक्तं हाहति [illegible] वर्ष्यं गैरिति सौंदर्यं कथितं तदुक्तं॥ अंगप्रत्यंगकानां यः सन्निवेशो यथोचितः॥ सुश्लिष्ट [illegible] धस्यान्त सौंदर्यमुदीयति॥ कीदृशोहरिः अभितः सर्वतः बाह्येरवयवैः [illegible] प्रति स्वच्छंदं यथा स्यादेवं व्रजसुंदरीभिरालिंगितः कइव मूर्तिमान् [illegible] सइव॥ तथा च शृंगार स सख्या महा कृष्णस्यामः॥ तदुक्तं भरतेन॥ श्यामो [illegible] श्च कीर्तिरति॥ यथा मुग्धो मनोहरः शृंगाररसो मधौ वसंते क्रीडति सर्वत्र [illegible] किं कुर्वन् अनुरंजनेन नयनो परस्पर रागजननेन विश्वेषां प्राणिनामानंदं जनयन् पुनः किं कुर्वन्नंगैः शृंगाररसस्यांगभूतैः

रिभावैश्चानंगोत्सवे उपनयनु केवलमतिभावैरित्याह । इंदीवरेत्यादि । इंदीवरश्रेणीभिः नीलोत्प
लपंक्तिभिः श्यामले गात्राभ्यकोरे नीलनिचोलतमालवद्नादिभिः कोमलैर्मृदुशय्यादिभिः ।
तत्र हेतुगर्भविशेषमाह । स्वच्छंदमित्यादि । स्वच्छंदं यथा स्यादेवं व्रजसुंदरीभिः अंगमंगं प्रति
आलिंगितः । आश्रितः श्रृंगाररसस्यांगानां विभावादीनामध्ये कयाचित्ताम्बूलस्रक्चंदनाद्यु
दीपनविभावरूपं कयाचित्स्मितकटाक्षाद्यनुभावरूपं कयाचित्त्रपाशंकासूयादिसंचारिभाव
रूपं कयाचिद्रोमांचस्वेदादिसात्विकभावरूपं श्रृंगाररसस्यांगमाश्रीतेभित्तिभाभावः ।
विभावादीनामंगत्वं प्रतिनुपरतः । विभावैरनुभावैश्च भावैः संचारिसात्विकैः । जनितो बोधितः ।
स्फीतो वृद्धः श्रृंगार इत्यतेरति । विभावसामान्यलक्षणं तु रसरत्नदीपिकायां भावयंति चित्त्रि
वेण येरसान्वेमनोरमान् । ते विभावास्तु कथ्यंते नाट्यशास्त्रविशारदैः । तत्र श्रृंगारविभा
वा भरतेनोक्ताः । ऋतुमाल्यालंकारैः प्रियजनगांधर्वकाव्यसेवाभिः । उपवनगमनविहारैः श्रृं
गाररसः समुद्भवति । अनुभावसामान्यलक्षणं । क्रियंते यैरसाः सम्यक्लोकानुभवगोचराः ।
ते नुभावास्तु कथ्यंते नाट्यशास्त्रविशारदैः । तत्र श्रृंगारानुभावाः नयनवदनप्रसादैः स्मित
मधुरवचोधृतिप्रमोदैश्च । मधुरैश्चांगविकारैस्तस्याभिनयः प्रयोक्तव्यः । व्यभिचारिसामा
न्यलक्षणं दशरूपके । विशेषादाभिमुख्येन चरंतो व्यभिचारिणः । तत्र श्रृंगारव्यभिचारिणः ।
श्रृंगारतिलके । शंकासूया तथा ग्लानिर्व्याधिश्चिंता स्मृतिर्धृतिः । औत्सुक्यं विस्मयो हर्षो व्री
डोन्मादो भयं तथा ग्लानिर्व्याधिश्चिंता स्मृतिर्धृतिः औत्सुक्यं विस्मयो हर्षो व्रीडोन्मादो भ
यं तथा विषादजडतोन्निद्राबहित्थाचापलैर्मतिः । इति भावाः प्रयोक्तव्याः श्रृंगारव्यभिचा
रिणः इति सात्विकभावाः श्रृंगारदैतिलके । स्तंभः स्वेदोथ रोमांचः स्वरभंगोथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विका मता इति । एतेषामवांतरलक्षणानि ग्रंथगौर
वभयान्न लिख्यंते । अत्र सकलकलाभिज्ञस्यापि व्रजसुंदरीभिः सह तदुत्तेसा
रणक्रीडनः श्रीकृष्णस्य नंदसूनुत्वहानिः । तासां तथैवानुरंजनात् अत एव वि
श्वेषामनुरंजनेनेस्य नेन विश्वानुरंजकत्वं कृष्णस्योक्तं तेनेच तासु साधारण

प्रेमकथनेन तस्य एवोत्कर्षः कथित इति भावः। अथवा हे सखि तचारं नुजनेन प्रीसुखाद्दने
न चिश्वेषां सर्वेषां सखीजनानां नः आनंदजनयन् क्रीडयती सर्थः। स्त्री संयोगे नास्मिन्न
स्त्यान कर्तव्य इति भावः। ताभिः स्वातंत्र्येनालिंगिते तात स्य नुतयालिंगने प्रीतिरिति भा
वः। अन्यत्समानं शृंगारः सुस्वरे नाट्ये रसे च जनमंडने ति विश्वः। चिश्वं सर्वं भवश्चापीति
च इंदीवरं तु नीले स्मिन्निसमरः। कालश्यामलमेचकाइत्तिच मूर्तिकाठिन्यकायोरिति
च। पुंसः स्त्रिया स्त्रिया पुंसि संभोगं प्रति या स्पृहा। स शृंगार इति श्रीकोरनिक्रीडादिका
रणमिति। तथा च व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितत्वमुत्सनेनाभितः सर्वतः यदंगया
आलिंगितवतीत्तदंगमाधुर्यातिरेकात्। ग

रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवामभ्यर्णंपरिरभ्य नि
र्भरमुरः प्रेमांधया राधया। साधु त्वद्वदनं सुधामयमिति व्याहृत्य
गीतस्तुतिव्याजादुद्भटचुंबितः स्मितमनोहारी हरिः पातु वः॥१२॥

सा त्युक्तेन समर्थाबिभूवेति भावः। उक्तं च साक्षान्मन्मथमन्मथः। काचित्कूरां बुजन्त्रोरेर्ज
गहे जलिना मुदे सादि। स्वच्छंदमिति च यथेष्ट विलासास्पदत्वेन कथितं॥१२॥ इदानीं सर्गांतेक
विरोऽशिषं प्रयुक्ते। रासोल्लासेति हरिः श्रीकृष्णः वः युष्मान्पातु रक्षतु। किंभूतो हरिः स्मितेन
मंदहसितेनेवान्यनारीणां मनोहर्तृत्वं शीलमस्य सतथा। पुनः किंभूतः। राधया उद्भटं प्रकट
मेव यथा स्यात्तथा चुंबितः। किं कृत्वा आभीरवामभ्रुवां गोपांगनानां अभ्यर्णंसमीपे उरो वक्षः
निर्भरं गाढं यथा वक्षो वृंद परिरभ्यालिंग्य। किं लक्षणानां गोपीनां। रासोल्लासभरेण रासक्रीडा
यां हर्षातिरेकेन विभ्रमभृतां विलासवतीनां। विभ्रमभृतां न पश्यतीति ननु भवत
ता सुविभ्रमः प्रत्यक्षयुवतिगणं पश्यंत्या तया कथं चुंबितस्तत्राह प्रेमांधया प्रेम्णा हर्षा
तिशये नांधया। श्रीकृष्णं विनान्यं न पश्यती। तथा लज्जाजनकस्यान्यस्यादर्शनादेव

निर्भरं मालिंग्य चुंबनं कृतवतीति भावः। तत्रापि न केवलं ग्राम्यतया एवं कृतवती किंतु सचातुर्यमित्यत आह। त्वद्वदनेत्यन्मुखं सुधामयममृतमयं साधु युक्तमिति व्याहृत्य उक्त्वा। गीतस्तुतिव्याजात्। गानप्रयुक्तसा छलेन यद्गीतं अमृतनयं त्वद्वदनं सुधानिधानमिति साधु युक्तमेवेति चातुरी नारचय्य चुंबनं कृतवतीति भावः॥१२॥ इति चतुर्थः प्रबंधः॥ ॥इति गीतगोविंदे सामोददामोदरो नाम प्रथमः सर्गः॥१॥ प्रथमे सर्गे अभिलाषचिंतारूपां दशां निरूप्येदानीं स्मरणरूपां दशां वर्णयति। तल्लक्षणं वक्ष्यते ये। तत्रादौ चनैः सख्या प्रेरितापि श्रीराधा समक्षं अन्या।

प्रणये विहरति वने राधा साधारणप्रणये हरौ विगलितनिजोत्कर्षा-
दीर्ष्यावशेन गतान्यतः। क्वचिदपि लताकुंजे गुंजन्मधुव्र-
तमंडलमुखरशिखरे लीना दीनाप्युवाच रहः सखीं॥१॥ इति प्रथमः सर्गः॥
भिः सहवर्तमानं श्रीकृष्णं दृष्ट्वा असहमाना क्वचित्कुंजांतरे गत्वा सखीं प्राह। तदेव दर्शयति।
विहरतीत्यादिना। श्रीराधा सखीं रहो पि गोप्यमपि वक्ष्यमाणमुवाच। उक्तवती। कीदृशी सा ईर्ष्यावशेन असहिष्णुतया। अन्यतः अन्यत्र गता। ईर्ष्याया हेतुमाह। विगलितेत्यादि। विगलितनिजोत्कर्षाद्विगलितो गतो निजः स्वीयः उत्कर्षो रूपमेव रूप्याति प्रणयिनी स्वयं रूपं तस्मात्। अन्यस्त्रीभ्यो निजातिरेकापगम्यादिसर्वैः कसति। हरौ कृष्णे विहरति सति कीदृशे हरौ। साधारणः राधायामन्यगोपांगनासु समानः प्रणयः प्रेमा यस्य तादृशे।

उ असाधारणप्रणयेति वा अंलित प्रेमवती सर्वथा। अतो दीना। हृः खिता। पुनः कीदृशी क्वचिदपि लताकुंजे लतानिभिरतिनिबिडे कुंजे लीना। दर्शयेनये च स्थिता॥ कीदृशे कुंजे। गुंजंतः शब्दायमानाः ये मधुव्रता भ्रमराः तेषां

मंडलीपकीस्क यामुरवरं वाचालंत्रिरवरंअ प्रभागोयस्यतादृशो। तत्र कुंजे नैव लता छादित गृह प्रासोलतापदं निबिडत्वं सूचनाय। अपि विश्रंभेति विश्रः। इ ष्यामाहु समानेषु दानमानाद्य मर्षणं। तथा च क्रमराणां शब्देनापि कमायोद्रेकः कथित इति भावः। दूष्यं विशेनेन व्यभाचारि भावानाप्रवेशः कथितः। १४। किमुवाचे साह। सचरादिस्यादिना। गीतस्यास्य गुर्जरी रागः। ताल सु प्रतिमंठ। रागलक्षणप्राक्कथितं।ताललक्षणं तु तारश्चाप्यपरश्चैव विचारः कुंदसंज्ञितः। चत्वारः कथिताश्चेते प्रतिमंठाविचक्षणैः। विरामांतं द्रुतं द्वंद्व गुरुश्चैकस्ततः परं। सुरंग ताले गातव्यः ताले सु प्रतिमंठके। गुरुरेकोभवेचत्र सन्निपातः स कथ्यते। अपरः प्रतिमंठस्क विद्वद्भिस्तेन गीयते। लघुद्वयं विरामांतं ताल कंदुकसंज्ञिके। विचारो गीयते तेन विलंबश्च लयो भवेत्।

सचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं। चलितदृगंचलचंचलमौलिकपोलविलोलवतंसं। १। रासेहरिमिह विहितविलासं। स्मरति मनो

द्रुतमेकं भवेद्यत्र स तालो खंड संज्ञितः। द्रुतलयेन गातव्यः कुंदश्च प्रतिमंठकः। सुरंगः सन्निपातः कंदुकः। खंडइति प्रतिमंठश्चतुर्विधः। श्री राधोयाः सुष्टुरंग वर्णवर्णनासुरंगो यं प्रतिमंठकः। अपरे ग्रिमप्रबंधेषु ज्ञेयः। गीतार्थस्तु हे सखि मम मनः। हरिं चित्तवृत्तिचोरि श्रीकृष्णं स्मरति स्मृतिगोचरं करोति पूर्वानुभूत विषयत्वात् कीदृशं। इह वने रासक्रीडायां विहितविलासं विहितः कृतः। मया सह विलासः क्रीडा येन तादृशं। पुनः कीदृशं कृतपरिहासं यथा नर्मकेलिर्यन तादृशं। अथवा। अन्यगोपांगनानां कृतपरिहसं यथा स्यात् तथा मया सह विहितः। विविध विभ्रमो येन तादृशं। हरिं चित्तचोरं इह लताकुंजे। निलिनाय अपि मम मनः स्मरति। अथवा विहितः कृतः मम विलासो विभ्रमो येमे अति ...बहानुरागेणा मत्तः कारितरस्पर्धः। तत्कंचाअधीनस्यापि सेवायां कीर्तस्यानभिनंदनात्।

(ए)काकामकेलिकःक्रीडि मनमपट्टकाम्पांकृतासं। दृष्ट्वा तिलकस्थान। नप्या। इति...



मया सिक्तिं न कबरीबंधपार्श्वमभ्यर्थितः। कुत्रो नालम बद्धश्चवं चिकुरस्तोमो मुदं दोग्धि मो व
क्रस्यापि न मार्जनं कुरुघनं घर्मांबु मेरां च तेनेवोत्तं स ममालतीर्ममशिरः। खेदं मणौ रे
रयति। इति रसामृतसिंधौ। स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा। हेलालीलेस
मी हावाः क्रियाः शृंगारभावजा इति स्मरः। तथा च स्मरतीत्यनेन अष्टविधसंभोगो छेवध्य
न्यते। यतस्तस्याष्टविधस्मरणमेव साधनं तद्यथा। स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभा
षणं। संकल्पो ध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः।
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमिति। तत्र केलिः मानसी क्रीडा। दिदृक्षया प्रकर्षे
णेक्षणं प्रेक्षणं कथं मीलिष्यतीति विचारः। संकल्पः अध्यवसायः मिलननिश्चयः।
सुरतसुखप्राप्तिः क्रियानिवृत्तिः केचित्तु रहः रासेति व्याकुर्वंति तत्तु न समीचीनं अनु
पपत्तिप्रसंगात्। इह पदार्थस्य प्रसक्तेः तत्त्वात्। तदुक्तं भट्टैः। इदमप्रत्यक्षगतत्वमि
ति। तस्मान्न चात्र रासः प्रत्यक्षः तस्यातीतत्वात्। राधया श्चलती कुंजे निलीनत्वात्। न
पको पाया अनुनीता प्रसीदति। रज्यते च प्रत्युत नाथ गुणज्ञा चोत्तमा यतिः। कांते किं कुपिता
सि कः परजने प्राणेश कोपो भवेत्कोयं सुभ्रु परस्तमेव दयिते दासोस्मि कृते परः। इत्यक्का
तः। इति शृंगारतिलके यथा वा। कर्तुं धर्मक्षणिकमपि से साध्यमुत्तस्य त्रोषं चितो संगत
भजति मया दत्तखेदप्यसूयां। क्लान्तं विदलति मृषाख्यातिर्वा तोलकं मेराधा मूर्धन्य
खिलसुदृशां राजते सद्गुणेनेति। किंच समानलज्जा मदनाप्रेघता रूप्यशालिनी। किंचित्र
गर्भे वचना मोहांत सुरतक्षमा। मध्या सा कोमलाक्षेपिमानेकुत्रापि कर्कशा। अथ पद
नि। कीदृशे हरिः संचरता तानप्रतानक्रमेण स्फुरता अधरेणोष्ठेन सुधामधुरध्वनिमुख
रितो वादितो वादितो मोहनवंशी परमोहकारी वेणुर्येन तादृशः। अथवा संचेरसासंक्रमम

नायकधरसुधयामधुरांध्वनिं यत्र तथा स्यात्तथा मुखरितो मोहना

स्वेयवेणुर्येनतादृशं॥ संचरदधरध्वनि। तितृीया विशेषणं। क्रियाव्ययविशेषणानां क्लीबत्व
मेकवचनांतत्वं वाच्यमिति। तदुक्तं रंध्रान्वेणोरधरसुधयापूरयन्निति। कास्मिंगते कलपदा
मृतवेणुगीतसंमोहितात्र्यंचरितान्नचलेदिति। यथा वा॥ निःसंशृंगो विसरविनिस्यनवप्रिया
सोगोप्यं तथापि हृदयं मदनो दुनाति। युक्ता कथं चनशमं गमितेचतस्मिन्मातस्यकालमुर
लीकरोति। तद्वंशावरेण मोहितं मममनः सांप्रतं कृतापराधमपितं स्मरतीति भावः। पुनः
कीदृशं॥ चलितः कनापि भावविशेषेण मत्संमाननाय घूर्णितो दृगंचलोऽपांगोपायत्र एवंय
थास्यात्तथा। चंचलोदालायमानो मौलिः शिखरोयस्य। कपोलयोर्विलोलेचंचलौ अवतंसौ
कर्णाभरणे यस्य तादृशं॥ अनेन शिरःकंपदोषं विनेव शेखरकुंडलचालनेन यादृकवैचि
त्री कथिता। तथा चाधरसुधापादानेन तदाननस्य चंद्रादप्यानंदकरत्वं द्योतितं। पुंस्युत्तंसा
वतंसौ द्वौ कर्णपूरश्च शेखरे इति अव

म चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं॥ प्रचुरपुरंदरधनुरनुरं
जितमेदुरमुदितसुवेशं॥ श्रातसः वतंसः वष्टिभागुरिरल्लोपमवस्याकारलोपः॥१॥

ननु व्यासंगादिना सविस्मार्यतां मित्यत आह। चंद्रकेत्यादि। चंद्रकेन विचित्रवर्णचिन्हितेन अ
ग्रभागेन चारूणां मनोहराणां मयूरशिखंडानां मयूरपिछानां मंडलेन समूहेन वलयितः वे
ष्टिताकेशायेन तादृशं। तथा चात्र मयूरादिदर्शनेनापि तस्यैव स्मरणं भवतीति ध्वनितं। पुनः
कीदृशं॥ प्रचुरैबहुलैः परंदरधनुर्भिः धनुरंजितः। चित्रितो यो मेदुरः सांद्रस्निग्धमुदिरो मघः
तद्वच्छोभमानो वेशः आकृतिर्यस्य तादृशं॥ अत्र नानामणिखचितहारमुकुटकेयूरादीनामिं
द्रधनुसाम्यं बोद्धव्यं इयं चाभूतोपमा। प्रचुरपुरंदरधनुभिरनुरंजितस्य मेघस्याप्रसिद्धेः अ
थवा केशानां कृष्णस्य वा मेघसाम्यं शिखंडकानां धनुर्भिसाम्यं वनमाला कृष्णयोर्वा सिमो
चंद्रकमेचकावित्यमरः। बर्हिकंठसमवर्णमेचकं त्र– तेषु धाः इति कामः॥ शिखंडस्तुपुच्छब
र्हे नपुंसकामित्यमरः। वेष्टितं स्याद्वलयितमिति सपि। मुदिरः कामुकेऽबुदे इति विश्वः। मुदिरो जल
दः प्रोक्तो मुदिरो हर्षसंमितइत्यनेकार्थः। वेशोयस्यागृहे प्रोक्तो नेपथ्ये गृहमात्रके इति सपि॥२॥

गोपिस्यादि।गोपकदंबकस्याभीरसमूहस्य या नितंबवत्यःप्रशस्तनितंबशालिन्यःस्त्रियःता
सांमुखचुंबनेलंभितःप्रापितोलोभोयेनतं।अथवा।गोपकदंबनितंबवतीनांमध्येममम मु
खचुंबनेलंभितःलोभोयेनतं।लंबितेतिपाठेस्वीकृतःचित्ताकृतिरित्यर्थः।गोपकदंबनितं
बवतीभिःमुखचुंबनेलंभितःप्रापितःलोभोयस्यतमितिवा।तस्यतुप्रणयोमय्येवस्वाभावि
कस्ताभिर्बलात्कारितइतिभावः।पुनःकीदृशं।बंधुजीवपुष्पवत्।मधुरोमनोहरोऽधरपल्ल
वःपल्लवाकृतिरधरोयस्यतं।अथवाबंधुजीवयुतीन्बंधुजिवःप्रियजनस्यजीवनममृत
निधानत्वात्सचासौमधुरोधरपल्लवोयस्यतं।मधुरपदेनसरसतापल्लवपदेनसुकुमारताऽ
रुणताचकथिता।उल्लसितेनविकसितेनस्मितेनशोभायस्यतं।अनेनइंदीवरबंधुकोद्भव
स्तत्रकुंदोदयउपमीयते।तथाचाबंधुकादिभिःसएवसायतइतिभावः।रक्तक।

गोपकदंबनितंबवतीमुखचुंबनलंभितलोभं।बंधुजीवमधुराधरपल्लव
मुल्लसितस्मितशोभं॥३॥विपुलपुलकभुजपल्लववलयितबल्लवयुव
तिसहस्रं।करचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रं॥४॥

स्तु बंधुकोबंधुजीवकइत्यमरः।सरसोमधुरःप्रोक्तोमधुरोथमनोहरइत्यनेकार्थः॥३॥विपुलेति।
विपुलोविस्तीर्णःपुलकोरोमांचोयत्रतादृशाभ्यांभुजपल्लवाभ्यांपल्लववत्कोमलाभ्यांबाहुभ्यांवलयि
तंवेष्टितंबल्लवयुवतीनामाभीरकांतानांसहस्रंयेनतादृशं।अत्रवलयितमित्यनेनापिअवज्ञ
याऽवेष्टनमात्रंसरहस्यमालिंगनादिकंतस्यतुमय्येवेतिध्वनितं।पुनःकीदृशं।करयोश्चरण
योरुरसिचयानिमणिमयानिकटकादिभूषणानिअलंकरणानितेषांकिरणैःविभिन्नं
नाशितंतमिस्रंतमोयेनतं।अंधकारःस्त्रियांध्वांतंतमिस्रंतिमिरंतमइत्यमरः।अथवा।विपु
लःपुलकोयासांतास्ताभुजपल्लवेनवलयित्वावेष्टिताश्च।एवंभूतायाःबल्लवयुवतयःताभिः
सहसमकालमेकत्रवर्तीतिसहस्रमिति।तथाचकात्यायनीयसूत्रेसहस्रवतीनिसहस्र
मिति।एवंविधंकायुवतीनस्मरतीतिभावः॥

करचरणोरसिमणिगणभूषणकिरणैर्विभिन्नस्तचित्रोषेणाभिद्रेदोयस्य विभिन्नः सपत्नी
रूपान्तत्र येनतायस्मात्तं। तद्भूषणेभूषितां मां दृष्ट्वा सपत्नीनां पराभवो भवदित्यर्थः। उस्त्र
मिति पाठांतरे र्णउ स्त्रशब्दः करणवाची। ततः उस्त्रप्रकाशमानमित्यर्थः केचिदेवं व्याकु
र्वन्ति॥४॥ जलदपटलेत्ति। पुनः कीदृशं जलदपटले सजलमेघसमूहे चलतः संभ्रम
मानस्येंदोः चंद्रस्य विनिंदकस्तच्छोभातिशायी चंदनतिलको ललाटे यस्य तं। केचिज्ज
लदपटलचलदिंदुविनिंदकचंदनबिंदुललाटमिति पाठः। तदा जलदपटले चलन्यदिं
दुश्चंद्रः तस्य विशेषणनिंदकस्तिरस्कारश्चंदनबिंदुमंदलाकृतितिलको ललाटे य
स्य तं पुनः। कीदृशं। पीनौ मांसलौ कठोरौ ये पयोधरौ स्तनौ तयोः परिसरस्य पर्यं

जलदपटलचलदिंदुविनिंदकचंदनतिलकललाटं॥
पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटं॥५॥

तभागस्य मर्दने निर्दयं हृदयकपाटं कपाटवद्विस्तीर्णं हृदयं यस्य सः तादृशं॥५॥ पु
नः कीदृशं। मणिमये मणिप्रचुरे मकरवन्मनोहरे ये कुंडले ताभ्यां मंडितौ गंडौ यस्य तं।
अथवा। मणिमयमकरमनोहरे कुंडले मंडिते याभ्यां तादृशौ कपोलौ यस्य तं। तदुक्तं। भूष
णभूषणांगमिति। किंच। विभूषणं विभूष्यं स्याद्येन तद्रूपमुच्यते इति रूपलावण्यमपि
कथितं। मुक्ताफलेषु छायायास्तरलत्वमिवांतरे। प्रतिभाति यदंगेषु तल्लावण्यमिहोच्य
ते। तद्यथा। शृणु सखि तव कर्णयाम्यत्र नीचैर्विरचय मुखचंद्रं मा वृथा। राद्धिवर्णाद्इय
मुरसि मरारेरस्ति नान्या मृगाक्षी मरकतमुकुराभे बिंबिता सैव मेवेति रसामृतसिंधौ
अत एव वक्ष्यदरं सुंदरमपीत्यर्थः। तथा चार तादृशं सुंदरवरं कथयन्स्मरामिति भावः॥

औदार्यं विनियंप्राहुः सर्वावस्थागतं बुधाः। इति विनयगुणात्वं वा। अथवा। मणिमयमकरमनोहरकुंडलाभ्यां मंडितावलंकृतौ ममकपोलौ येन तं। अत एव उदारं औदार्यगुणयुक्तं। रहसि ममाखिलं चित्तं सर्वतः क्षणमेव पूरितवानिति सकलमनं स्मर्यत इति पुनः कीदृशं पीतं वसनं वस्त्रं यस्य तं। पुनः कीदृशं। औदार्योपपादकं विशेषणमाह। अनुगतस्यादि। अनुगताः आश्रिता ये मुनिवराद्यसुरवराः ते एव परिवाराः परिजनाः यस्य तं। अथवा। अनुगतानां मुन्याद्यसुरवरातानां परिवाराः प्रकर्षो यस्मात्तं। परिवादः परिकरे परि क्लेशप्रकर्षयोरिति विश्वः। द्वंद्वांते चरम एतस्य मन्यादिपदैः प्रत्येकमभिसंबंधः। तथा च। तैरप्यधिगतस्स्वाभिमतफलैः सततं सेव्यत इति। तस्यौदार्यं ख्यातमेवेति भावः।

मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं॥
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं॥ध्रु॥

अत्र मुनिवराः शुकनारदादयः। मनुजवराः परिक्षिदादयः। सुरवराः ब्रह्मरुद्रादयः॥ असुरवराः प्रह्लादादयः। अथवा। अनुगता ये मुनिमनुजसुरासुरास्तेभ्योपिवरः श्रेष्ठः॥ गोपलक्षणो गोपीलक्षणो वा परिवारो यस्य तं। अथवा अनुगतः अनुसृतः माधुर्यभरेण आकर्षणान्मन्यादीनां वरपरिवारः श्रेष्ठः परिग्रहो यस्य तमिति। उक्तं च आरुधान मरुंधती हृदयमप्यार्द्रस्मितार्द्रश्रियस्ति। का स्त्रीति दुरवापेति च। मय्यनुगतो मुन्यादीनां परिग्रहो यस्मात्तमिति वा। दानं पप्युपपत्तिश्च धैर्यं तेच प्रियभाषणं। स्वजने प्रियरवापितदौदार्यमिति स्मृतमिति। नायकौदार्यगुणलक्षणं॥ध्रु॥ विशदेति। पुनः कीदृशं। विषदस्य

निर्जलस्य कदंबस्य तले मूले मिलित सलग्न मसंकेती कृत कदंबतले मदपेक्ष माऽग्मलएव गलाकाचिन्मामपनयतु इति मया सह न मर्थिवा निलीयस्थितं। पुनः कीदृशं कलिः प्रणयकलहस्तस्मा घकलुषं चित्ते कलुमलं अहं संकेते समागता अयं मागतः प्रायशोऽन्यनारीसक्तो भवतीष्येति। अतःपरं यद्यायास्यति तदामयान संभाषणीयइत्येवंरूपं एकाकिनी कथमत्र तिष्ठमीति च भयं। अथवा भिन्नानाघद्र यं एतद्वयं कदंबमूलादुपेत्स स्वाटूक्तिभिः। रामयतं। पुनः कीदृशं किमप्यनिर्वचनीयं यथास्यात्तथातरंगानुतरंगइवा। चरन्चारं वारं मुहुरुच्छन्ननंगः कामो यत्र तादृक् तयादृशयादृष्ट्यामेन साच मामपि॥

चिरादकदंबतलेमिलितं कलिकलुषभयं शमयंतं। मामपि किमपितरंगदनंगदृशा मनसा रमयंतं॥७॥ श्रीजयदेवभणितमति सुंदरमोहनमधुरिपुरूपं॥ हरिचरणस्मरणंप्रतिसंप्रति पुण्यवतामनु

रमयंतिमित्सर्थः। मामपीत्स पिशब्देन सोत्कंठयोत्कंठया अहमपि तस्य कस्य चित्ता कोऽनरप्रमाणयस्य पात्रे मासमिति ध्वनितं। एवंभूतं श्रीकृष्णं मे मनः स्मरतीति भावः॥ कलिः स्यात्कलहः शूरं कलिरं स्युगेष्वपीति विश्वः। कलुषं वापिनसोरितिच॥७॥ श्री देवेत्सादि। श्रीजयदेवकवेरिदं भणितं श्रीकृष्णचरणस्मरणं जनकपुण्यविशिष्टानां हरिचरणस्मरणं प्रति श्रीराधाकथितसरासक्रीडाचरणं तस्य स्मरणं प्रतिसंप्रति इदानीमपि अनुरूपं योग्यं तां टरिपोः श्रीकृष्णस्य रूपं वर्णनीयत्वेन यत्र तादृशं॥ इति पंचमप्रबंधः॥५॥ ननु श्रीकृष्णः यो विना अन्यगोपीभिः सह विहरति। तत्किमिति स्मरासि त्याह। गणयती त्सादि। नममनः

श्रीकृष्णे पुनरपि कामं अभिलाषं करोमि तत् किं करोमि कीदृशे कृष्णे। युवतिषु वल्लवीषु
गोपवधूषु चलंती वर्धमाना तृष्णा यस्य तादृशे। अत एव मां विना विहारिणि वारं वारं विह
रणशीलरूपे। कीदृशं मनः। चान प्रतिकूलया मत्वेहेत्वंतरमप्याह। गणयतीत्यादि। तस्य
सोदर्यादीनां ग्रामं समूहे गणयति परिसंख्याति। भ्रामं कोपं भ्रमादपि नेहते नेहते ने
च्छति। दोषं मद्विधप्रणयिन्यवधीरणादिकं दूरतो विमुंचति च। तत्र हेतुमाह परितोषसंतो
षं वहति। तत्र विभावना विशेषोक्ती अलंकारौ। निजानुसरणरूपानुरागहेतुं विनाप्यनुरा
गप्रकाशनात् अन्यांगनासक्तिरूपवैराग्याकथनाच्च। तथा च काव्यप्रकाशे व्यप्रकारिका।
क्रियायाः प्रतिषेधेपि फलव्यक्तिर्विभावना। विशेषोक्तिरखंडेषु कारणेषु फलावचः॥१॥

ति गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहति च परितोषं दोषं विमुंचति दू
रतः युवतिषु चलत्तृष्णे कृष्णे विहारिणि मां विना पुनरपि मनो वामं कामं करोति करोमि

एषा च काव्यप्रकाशकृता व्याख्याता हेतुरूपक्रियाप्रतिषेधे विफलप्रकाशनं विभावना। मिलिते
ष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिरिति। ग्रामः स्वरे संवसथे वृंदे शब्दादिपूर्वके इति विश्वः।
भामः क्रोधे रवौ दीप्ताविति च। वामं सव्ये प्रतीपे चेति। कामः स्मरेऽभिलाषे च स्मर॥१५॥ अथो
त्कंठिता नायिका समयी श्रीराधा सखीं स्वमनोरथानाह। निभृतेति ध्रुवपदं। गीतस्या
स्य मालवगौड रागः। एकताली तालः। रागलक्षणं कथितं प्राक्। ताललक्षणं। एकताली त्रिधा
प्रोक्ता गीतज्ञाः शास्त्रविशारदैः। रामा च चंद्रिका तद्वद्विपुले सम्यलक्षणं। द्रुतमेकं भवेद्यत्र ताले
यं खंडसंज्ञितः। रामा तेमेकताली तु कीर्त्यते गायकोत्तमैः। गुरुद्वयं भवेद्यत्र तालो ललितसं
ज्ञकः। चंद्रिका चैकताली स्यात्तेन सौभाग्यदायिनी॥ कोकिलप्रियताले वै द्रुतत्रयमुदा
हृतं। विपुला चैकताली स्यात्तेन गीतज्ञसंमता। खंडललितकोकिलप्रिया इति भेदास्त
त्र ज्ञेयाः। उत्कंठायाश्च लक्षणं। उदाममन्मथमहा

ज्वरवेपमानां रोमांचकंठकितमंगकमुद्वहंती। संवेदवेपथुघनोत्कलिकाकुलांगीमुकं
ठितां वदति तां भरतः कवींद्र इति। गीतार्थस्तु। हे सखि मया सह केशिमथनं श्रीकृष्णं रम
य क्रीडय। कीदृश्या मया। मदनं यो मनोरथः। इच्छा न युक्तो भावो रतात्यः सज्जा नायस्या
स्तादृश्या। अथवा। मदनमनोरथेन भावितया आसया। ननु को वद मया प्रार्थनेकृते क
दाचिन्नायाति इत्यत आह। उदारं औदार्यगुणयुक्तं। त्वत्प्रार्थितमवश्यं दास्यते चेति भावः।
अथवा। श्रीकृष्णः तत्कौतुकत्वात् तस्य यो मनोरथः संभोगेच्छा तया च भावितया। ननु कथं
तस्येच्छा ज्ञाते सत आह। सविकारमिति। विकारो मानसो भावस्तत्सहितां एवमन्यो न्यानु
रागपूर्वकत्वेन शृंगाररसपोषणमुक्तं तथाह। अनुरागो नुरक्तायां रसो वह इति॥

निभृतनिकुंजगृहं गतया निशि रहसि निलीय वसंतं। चकितविलो
कितसकलदिशा रतिरभसरसेन हसंतं॥१॥ सखि हे केशिमथनमुदारं॥ त
रमय मया सह मदनमनोरथभावितया सविकारं॥ ध्रु॥ ॥ ॥

स्थितिः। अभावे त्वनुरागस्य रसाभासं जगुर्बुधा इति। तथा चात्र महाभावमयी उत्त
मा नायिका ज्ञेया। नायकश्चोत्तमस्तद्गुणा निरूपिताः प्राक्। सविकारमिति क्रियावि
शेषणं वा दीप्ते विकारस्तन आंतादि प्रकटनेन तत्सहितं यथा स्यादेवं मदनमनोरथ
भावितये तन्वयः। तदुक्तं रसिकसर्वस्वे। नाभिमूलकुचोदरप्रकटनं व्याजेन न्य यद्योषितां।
साकांक्षं मुहुरीक्षणं स्खलितता नीवीनितंबस्य च। केशपाशविन्यासं यमोत्क इति तु मित्रा
दि संदर्शने सौभाग्यादिगुणप्रकाशनास्तिकथने स्ता सा तु रागेंगितमिति। तत्र सामर्थ्य
ख्यापनाय केशिमथनपदोपादानं तद्वयोजनं च निःशंककेलिप्रतिपादानं। अथवा। प्रशस्ता।
केशा यस्यः केशी तं मथ्नाति। इति केशिमथनस्तो स्वसौंदर्येणाशेषसुंदरीणां क्षोभकमित्यर्थः।
केशी प्रशस्तकेशावान्। केशी चासौ मथनश्च केशिमथनश्च केशिमदन इति। स्वसौंदर्येण रवि

62

मीत्रितं तु शीलमस्येति केशी सुप्रजातो णिनिस्ताच्छील्ये। अजातसर्व्वं सुपिधातोर्णिनि स्यात् ताच्छी
ल्य इति। मंथ विलोडने। नंदिग्रहिपचादिभ्य इति ल्युः इति। मथ्नातीति मथनः केशी चासौ
मथनश्चेति। कामस्यापि कामं मम मानसक्षोभकं च सर्व्वथैः उक्तं च साक्षान्मन्मथमन्मथः।
अथवा। केशिनं कामनियन्तारं योगिवर्यमपि समाधुर्य्येण क्षोभयतीति तत्त्वथा मूलं केशि
मथनं किंपुनः रागिणामिति भावः। मूर्ध्नि चिते जले मूले काये सुखे प्रमणि मारुते कामे काले
सुवर्णकः शब्द इत्यनेकार्थः। भाविते स प्रथमव्याख्याने तारकादित्वादितच् द्वितीयपक्षे भावि
तं वासिने वा सद्इति विश्वः। ध्रुवपदं। अथ पदानि। पुनः कीदृश्या मया। निभृतमे कान्ते यन्नि
कुंजरूपं गृहं तत्र गतया। कीदृशं श्रीकृष्णं निशिरात्रावेकांते निलीयति रोहितीभूय वसंतं
एवं भूतं मां श्रीराधा मा पश्यत्विति कौतुकेन मया परिहसितुं संकुचितमात्मानं कृत्वावस्थितमि
ति भावः। अन्या काचिन्मा पश्यत्विति वा। पुनः कीदृश्या चकितं यथा स्यादेवं विलोकिताः सकला
दिशो यया तादृश्या कुत्र कृष्णो निलीय तिष्ठतीति कृत्वाभिसरंती मां मा कश्चन पश्यत्विति च कि
तं पश्यं सवेत्ति भवः। इयं च विभ्रांता दृष्टिः तदुक्तं गीतरत्नाकरे। यानुकश्चिद विश्रांतमविषह्यं चि
लोकनेविस्तर्णं चंचलो सुभृतारा सा दृष्टिरुच्यते। विभ्रांता विभ्रमे वेगे संभ्रमे च भवेदसौ। इति
च। कीदृशं श्रीकृष्णं रसानुरागेन वारको संभोगयोरभसः उत्साह स्तत्पुनः को योरसः शृंगाराख्य
तेन हसतं रसनुभाव्यं हासः। तथा क्रीडायां कालपेक्षा सहिष्णुतया त्सम प्रकटार्थपुरस्थितमम
ापिमामियं न पश्यतीति कस्याहसंतमिति भावः। निभृतं रहएकांतमिति धरणिः। रससे वेग
उत्साह इत्यमरः। ११। प्रथमसमागमेति। पुनः कीदृश्या। प्रथमसमागमेन लज्जितया श्रीडि
तया निसाप भुक्तचरे पि हरौ केनापि रसविशेष माधुर्य्येण निमित्यनूतनया। प्रथमसमाग
मे स्मृतं। तथाच श्रीभागवते। यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं
पदे पदे का विरमेत तत्पदाच्चलापि यं श्रीर्न जहाति कर्हिचिदिति। प्रथमसमागमे कामिन्यो
लज्जंतिवा मतामावहंतिचा यथाह भरतः। श्लिष्यकंठं किमिति न मया मूढया प्राणनाथ

चुबत्यस्मिन्वदनविकृतिः किं कृतावानदृष्टः। नोक्तं कस्मादिति नववधूश्चेष्टितं चिंतयंती पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा इति। प्रथमसमागमवल्लज्जितयेति वा
योजयंति। कीदृशो श्रीकृष्णं पटुनायिकाप्रसादनक्षमं यत् चाटु शातं प्रियवचनं शा
शातं तेनानुकूलं। विनयोक्तिशातैर्नुरं नयपरमित्यर्थः तत्क्षणमधुनेत्यादिना प्रक
टयिष्यति। तद्यथा शृंगारशास्त्रेचा प्रथममिह हि एवं पुष्पगंधादिकं स्यान्मृदुमधु
रवचोभिर्येर्जियो सन्निधाने। करतलमथ गोत्रे भ्रामयंश्च्छदस्याधुरितमुदरपु
ष्टेदमाश्लिष्यदद्यादिति। एवं वा वैलक्ष्यापनोदनचातुर्यं। तदुक्तं। मुग्धामनुनय
त्येषमृदूपायेन सस्त्रस्त्रीरौदेयनू। नातिप्रीतिकरैर्भावैर्निर्बंधैर्वलिभिषकैः। तद्य
थासरतिसरसस्त्रीरादेषा अत्र मद्भ्रमरावलीसुमुखी पश्चे मन्ये तवास्या पिपासया
इति निगदिते किंचिद्व्रीस्या विचक्रितकंधरा वदनकमले बाला भर्त्रा चिरं परिचुंबि
तेति। शृंगारतिलके। पुनः कीदृश्या मृदुकोमलं मधुरं माधुर्यगुणसंयुक्तं मृदुत्वं
मधुरं रसवादिति वा स्मितयुक्तं भाषितं यस्यास्तया। तदीयचाटूक्तिभिरपहृतलज्ज
याः किंचित्स्मितं च भाषितं च यस्याः तयेत्यर्थः। उक्तं च। अन्तरसचित्रोषेणेत्व भि
लाषं नयेच्छ तिं यन्नायिकामुखगतं। मार्दवं तदुदीरितं। माधुर्यं च भवेद्यत्र शाकेर्थे
च स्फुटो सौरैरिति। कीदृशो श्रीकृष्णं शिथिलीकृतस्मितादिनानुकूले मां ज्ञात्वा श्लथी
कृतं जघनस्थितं दुकूलं पट्टवस्त्रं येन तादृशो अखिलनायककुलशिरोमणेः श्रीकृष्ण
स्य दर्शनेन दृढबंधापिनी वि स्वयमेव स्खलिष्यति ततो मे खलाचलं बिल्तं जघ
नस्थितमेव वाससस्तेनापहरणीयमिति जघनदुकूलस्य पातं॥ तदुक्तं॥

रतिहस्य। ओष्ठाग्रं स्फुरती क्षणे विचलतः कूपोदरमसवद्धस्मितः सुकुमाकूलो
विगलितिप्राप्नोति बंधं पुनः प्रच्छन्नो व्रजस्तैते नो प्रकरतां श्रोणितटं दृश्यते
नीवी च स्खलति स्थितापि सुदृढं कामो गितेयोषितामिति। यथा च। कांते तल्प
मुपागते विगलितानी विस्वयं बंधनाद्वासो विश्लथमेखलागुणधृतं किंचि
न्नितंबे स्थितं। एतावत्सखि वेद्मि केवलमहं तस्यांगे पुनः को सौ कास्मि रतं च
कीदृशामिति स्वल्पापि मे न स्मृतिरिति भरतः। रतेपूर्वाचस्येयं सूचिता। त्रु
टयत्तटं स्फुरद्वक्षो विकसन्मुकपंकजां। न्नियनं नीवीनाभिदेशो लिल्यमे सचेत्तां।
चाटुर्नारीप्रियोक्तिः स्यादितिरत्नमाला। जघनेकटेरधोभागे इति हारावली॥२॥

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं॥
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं॥२॥

किसलयेति। पुनः कीदृश्या मया किसलयशयने पल्लवशय्यायां निवेशितया।
कीदृशं कृष्णं चिरं चिरं बहुकालं व्याप्य ममैव वक्षसि उरसि शयानं सुप्तं। एतेनालिं
गनविशेषस्तक्तः। तदुक्तं पंचसायके। गोत्रोपरिष्टादथ तल्पमध्ये संलीयते यन्मि
थुनं शरीरे कामाभिमानाक्षतपूर्णचेष्टं तत्क्षीरनीरादव्यमिदं प्रदिष्टमिति। पुनः
कीदृश्या कृतपरिरंभणचुंबनेयया तादृश्या एतच्च जघनोपश्लेषरूपालिंगनाभि
प्रायेण। तदुक्तं जघनकलितकांतश्रोणिरंगोपरिष्टाद्व्रजति यदिह नारी स्रस्तकेशो
तरीया। करजरदनकृत्यं चुंबनं वा विधित्सुः कलयति जघनोपश्लेषमेनं कवींद्रा इति।
चुंबनमपि पंचसायके यथा। ओष्ठेन कांतस्य मुखे ष्ठयुग्मं निःपीड्यते हाचित नालु
भागा। चुंबास्ययेन्नस्यति यत्र नारी प्रोक्तं समौष्ठमिति निपुटाधरिति। कीदृशं कृष्णं। प

रिरंभ्याालिंगनकृतं मदीयाधरपानं येन तं। अनेन लालाटिकमालिंगनमुक्तं। तदुक्तं पंचसायके। अन्योन्यसंरक्तमुखं कपोलं नेत्रं ललाटं हृदयं च बाहुं। सानंदमार्वेश्रममीलितास्तं ललाटिकं तत्सुविदो वदंति। यथा वा संकेतनलयेयसुखोपविष्टागाढं यतिश्लिष्यति सापि कोतं। अन्योन्यगात्रे विरुातीवरागाद्द्वंद्वं लतादाश्रुतलज्जाभिधानमिति। पल्लवो स्त्री किसलयमित्यमरः॥३॥ अलसेति। पुनः कीदृश्या मया। अलसे ● ● ●थरे च ते निमीलिते च ताद्दृशी विलोयने यस्यास्तया। एतेनांगिकः कामविकारः कथितः। यत्र मूर्धानमारभ्यपादपर्यंतिकः। क्रियाः। अंगे विहिता यस्मात्तस्मादांगिक उच्यते इति॥ नायिकालक्षणे तदंगसंगमरसानंदे मुकुलादृष्टिश्च कथिता। तदुक्तं संगीतरत्नाकरे।

किसलयशयननिवेशितया चिरमुरसि ममैव शयानं। कृतपरिरंभनचुंबनया परिरभ्य कृताधरपानं॥३॥ अलसनिमीलितलोचनमापुलकावलिललितकपोलं॥ श्रमजलसिक्तकलेवरया परमदनमदादतिलोलं॥४॥

स्फुरत्संश्लिष्टपक्ष्माग्रा सुखविश्रांततारका। मुकुलादृष्टिरानंदे हृष्टयोस्पत्रगंधयोरिति। अथवा। अलसा आलस्ययुक्तेऽत एव निमिलिते मुद्रिते लोचने यया। अत्र निमिलिते मुद्रिते स्याद्युपादानात्। अवघट्टारव्यचुंबनं मुक्तं। तदुक्तं पंचसायके। हस्तेन नेत्रे परिमील्य भर्तुः संमीलताक्षीवदने स्वजिह्वा। निक्षिप्य च क्रीडति यत्र लोका रव्यातं रसज्ञैरवघट्टसंज्ञमिति। कीदृशं श्रीकृष्णं पुलकावल्या रोमांचपंक्त्या ललितौ मनोहरौ कपोलौ यस्य तं। अनेन सात्विकविकारः कथितः। तदुक्तं भरतेन स्मरणे संगमे चैव प्रियस्यालोकनेन तथा। हेतुत्रयं समासाद्य सात्विकः संभवतीति। स्तंभः स्वेदोऽयादि पूर्वमुक्तः। पुनः कीदृश्या श्रमजलेन सुरतायासजनितश्रमवारिस्वेदेन सकलं समग्रांगं वा संपूर्णं वा कलेवरं अंगं यस्यास्तया श्रमजलसकलकलेवरेति पाठे श्रमजलशकलानि स्वेदबिंदवः कलेवरे यस्यास्तया। क्वचिच्छ्रमजलसिक्तकलेवरयेति पाठः। कीदृशं श्रीकृष्णं परम उत्कृष्टो यो मदनकृतो मदो हर्षस्तेनातिशयेन लोलं। वरः प्रचु

तातन्माऽऽतिलोलमिति वा। प्रचुरश्रेष्ठयोर्वरिष्ठ इति विश्वः। श्रमजलेत्यादिना निराकुलश्रग
लग्नेयं नायिकोक्ता। यथा। धन्यास्ता सखि योषितः प्रियतमे सर्वांगलग्नेपि या। प्राग
ल्भं प्रसरयति मोहनविधावालंब्य धैर्यं महत्। अस्माकं तु तदीयपाणिकमले प्युन्मोचयत्य
शुकं कोयं काचयमत्र किं च सुरतं नैव स्मृतिर्जायते॥४॥ पुनः कीदृश्या मया। कोकिलस्य क
लोच्यक्रमधुरो मोरवः शब्दस्तद्वत्कूजितं शब्दितं यस्यास्तया। अथवा। कलरवः पारावतः यया
यः तदाकोकिलकलरवयोः कूजितमिव कूजितं यस्यास्तया। अनेन कूजिताख्यो वा स्वरनमुक्तं।
तदुक्तं पंचसायके। पिकशुकशिखिकलहंसप्रायपक्षिव्रजानां स्वनितमनुकरोति स्वंगनामन्मथार्ता
मुखदशनविवर्तीतत्क्रीडाद्रावदं तिस्तनिते भितिसमासाच्चित्रसंभोगकाले। यथा वा रसिकसर्व
स्वे। दात्यूहलावकमयूरकपोतहंसपारावतादिविरुतध्वनितंरताख्यं। तन्मिश्रनिःस्वनितसीत्कृ
तहासनादैः सयोजयेद्वदनचुंबनमैथुनाद्यैः। तथा चोक्तं कांते तथा कथमपि प्रथितं मृगाक्ष्या चातु
र्यमुद्धतमनोभवयारतेषु। तत्कूजितं मृदुवदद्भिरनेकवारं शिक्षापितं गृहकपोतशतैर्यथास्यात्।
ननु वात्स्यायनादिशास्त्रे नैवक्रमतक्तः। तदुक्तं। आश्लेषं प्रथमं कुर्याद्द्वितीयं चुंबनं तथा। तृतीयं
नखदानं च दष्ट्राघातं चतुर्थकं पंचमं क्षेपणं प्रोक्तं षष्ठं प्रहरणं तथा। सप्तमं कंठशब्दं स्याबंधनं
चाष्टमं रतमिस्यत्र कंठशब्दस्य सप्तमरतस्याग्रे वक्ष्यमाणनखदानादिना श्रीकृष्णस्य रसिकता
भंगः स्यादित्यत आह। जितेत्यादिना। कीदृशं श्रीकृष्णं जितो वशीकृतः कामशास्त्रस्य विचारवी
णता। तथा हि। चतुर्दश विधा भार्या स्वीया सेव्या परा न तु। परकीयामपि भजन् त्वत्तमामेव काम
येत्। पुरापि बाला मध्या च प्रौढा वृद्धा च तु चिधा। बाला चलकरी क्लिष्टा। मध्या क्लिष्टारतिप्रदा।
प्रौढबलक्षयकरी वृद्धा पुंस्त्वविनाशिनी। षोडशाब्दा भवेद्बाला त्रिंशता तावद्युत यौवना। पंच
पंचाशता प्रौढा वृद्धा स्त्री तदनंतरं। एवं चतुर्दशविधानां देवादिसत्वानां मध्ये गांधर्व
सत्वां मध्यां रममाणस्तु जितकामशास्त्रविचार इति। उक्तं। गांधर्वसत्वाया लक्षणं।
उद्यानकाननरता गीतवाद्यरता तथा। विचित्रमाल्या च सुस्नाता गांधर्वीसा प्रकीर्तिता। तस्य
वनं यथा। स्नात्वा सुगंधद्रव्यैस्तु संगीतध्वनिपूर्वकं। मृद्वालिंगनदानेन गांधर्वीकामयेत्

द्धुधः इति। अथवा। जितमनसिजतंत्र विचारं बधादिकौशलं। अनंदावाप्तेः स्थितिरितिवा। अथवा। जितो वशीकृतो मनसिजतंत्राणां कामपरायणानामन्यचिलासिनां विचारः सिद्धांतो येन तदुक्तं साक्षान्मन्मथमन्मथः। कामिनां दर्शयन्दैन्यमिति। जितो भिभूतः विस्मारितः मनसिजतंत्रस्य विचारो येन तमितिवा। अयंभावः। चतुःषष्टिकलाकुशलस्यापि परमरसिकनायकस्य श्रीपुरुषोत्तमस्य स्वानुकूलोत्तमनायिकासंनिधौ रसमग्नतया क्रमस्मरणाभावान्न दोषः नचरसहानिः। तदुक्तं रतिचक्रप्रवृत्तस्य नैव शास्त्रं नच क्रमः। इति। पुनः कीदृश्या मया श्लथाः केशग्रहणचुंबनादिदानेन शिथिलाः कुसुमैराकुला व्याप्ताश्च कुंतलाः केशकलापा यस्यास्तया। अथवा श्लथकुसुमैः आकुलाः कुंतलाः

कोकिलकलरवकूजितया जितमनसिजतंत्रविचारं श्लथकुसुमाकुलकुंतलया नखलिखितघनस्तनभारं॥५॥ चरणरणितमणिनूपुरया परिपूरितसुरवितानं॥ मुखरविसंखलमेखलया सकचग्रहचुंबनदानं॥६॥ यस्यास्तया। कीदृशं कृष्णं। नखैर्लिखितो अंकितो घनः निबिडः स्तनभारो येन तं। तत्र लिखितपदोपादानात् अर्धचंद्र पंकजपत्राख्यं नखदानमुक्तं। तदुक्तं पंचसायके। अस्यार्थमेकस्तु रितो धर्विरेखं प्राहुः क्षतं पंकजपत्रसंज्ञं। दोर्मूलवक्षःस्तननाभिसंधावस्योपयोगं मृववते महेशा इति। तत्र प्रधानत्वात् स्त्रियो रिति विश्वः। चुकुरः कुंतलो वालः कचः केशः शिरोरुह इसमरः॥५॥ एतावत्पर्यंतं पंचप्रकारालिंगनादिसेविधं बाह्यरतमुक्तं। संप्रति बंधाख्यमष्टमं रतमाह। चरणेत्यादि। पुनः कीदृश्या मया। चरणयोः रणितौ शब्दायमानौ मणिखचितौ नूपुरौ यस्यास्तया। अनेन। यकरुतबंधविशेषो दर्शितः। यद्वा। नच्चरयोः रणितौ शब्दायमानौ नूपुरौ यया इत्यर्थः। एतच्च आमरकं नाम विपरीतरताभिप्रायेनोक्तं। उक्तं रतिरहस्ये। चक्रवद्भ्रमतिकुंचितांघ्रिका भ्रामरं भजघने समुच्छ्रिते रति। कीदृशं श्रीकृष्णं। पुरितः सर्वतः संपूर्णतां नीतः सुरतवितानः रतिविस्तारो येन तं। अनेन नायककर्तृकाश

कीदृश्या मया। पूर्वं मुखराणां आब्दायमानानाम् पश्चाद् दृश्यं खलात् तु रितगुणां मेखलाकां चियस्य स्तया। अनेन न अग्रे खोलितत्त नाम कं विपरित मुक्तं। तदुक्तं वात्स्यायनीये पुरुषायितप्र करणे। स्वजघनमेव दोलायमानं सर्वत्र भ्रामये दिति प्रेरखोलितं तद्विज्ञेयं रसिकैः। स चंदाजनेरिति। तत्र सर्वग्रशब्दो मनोरमाकारेण व्याख्यातः। मध्या पूर्वपश्चिमभागेद क्षिणोत्तरभागे चेति। रतिरहस्येपि। सर्वत्र कटितट भ्रमो यदि प्रेपूर्वमितमुक्तं मूलित मिति। तत्रापि सर्वत्र शब्दार्थः स एव। कीदृशं श्रीकृष्णं सकचग्रहं केशग्रह सहितं चुंबनदान यस्य तं। केशग्रहणपूर्वकं चुंबनं विपरीतरत एवोक्तं। तदुक्तं शृंगारे चुंबनं कार्यं पुंसा लिंग न पूर्वकं। विपरीतग्रहे नार्याः सकचग्रहचुंबनमिति। मेखला खड्ड बंधे स्यात् काची रोल नितंबयोरिति विश्वः। शृंखला कुमुदे काञ्च्यां च स्त्रीचक्रमबंधने इति च। ६। पुनः कीदृश्या मया॥ इति सुखसमये सुरतसुखप्राप्तिकाले लोकोनरानुभावकाष्ठांप्राप्तोयः संभोगशृंगाराख्यो रसस्तेना।

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजं॥
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजं॥७॥

लसया मंथरया। कीदृशं श्रीकृष्णं। दर ईषत् मुकलिते मुद्रिते नयनसरोजे नेत्रकमले यस्य तं। अनेन द्वयो रानंदाचाप्तिर्युगपदेव सूचिता। तदुक्तं रतिरहस्ये। मूर्छनामीलितं चाक्ष्णो श्रुतिका लस्य लक्षणं। सर्यमेतत्तरि त्राय साध्यपेतस्य यंततरइति। पुनः कथंभूतया। निःसहा असमर्था अतएव किसलयरायने निपतिततनुलताय स्यास्तया। अनेन सुरतांत समयदुक्तः। तदुक्तं अंगे स्वेदः श्लथत्वं च केशावस्त्रादि संवृतिः। ज्ञाते च्युति सुखे नार्या विरामेच्छा च जायते इति स्मारतः। तथा चे विपरित रतांते कोकः। स्वेच्छया मिलति वल्लभे यथा योषिदाचरति पौरुषामितं। आ दितो घटितमेवयत्रितं भूपतत्मकरणक्वचेष्टितं इति। तथा। अतिप्रयत्नेन रतांतक्लांता कृष्णे न तल्पादयरोपिता पि। अलंब्यतस्यैव करं करेण जो स्नात कृतानंद मलिंदमापेतिरसार्णवसु धाकरः। कीदृशं मधुसूदनं मधुरसोसोदलपटं। अत्र मधुसूदन शब्दो भ्रमरपर्यायः। तदेवयिरो

भणनमध्ययति। कीदृशं।

उदितमनोजं। उदितस्तत्कालत्रुटितमुक्ताहारकांचीगुणस्वस्वस्थानसंघट्टनसंजातपयोधरश्रोणीपरिसरस्पर्शादिना च पुनराविर्भूतो मनोजः कामो यस्य तं। तस्मिन् लज्जितराधापीडालोकनादिना पुनराविर्भूतो मनोजो यस्य तमिति वा। तदुक्तं वात्स्यायनेन। अवसानेपि च प्रीतिरुपचारैरुपस्कृता। सविश्रम्भकथायोगैः रतिर्जनयते परामिति। अनेन द्वयोर्माधुर्यभरः कथितः। अथवा। पूर्वदक्षरश्रुतिहत्योरिति नंघावेल्लुः इति मधु माधुर्यं क्षरतीति मधुसूदनः स चासौ मुदितमनोजश्च। मुदितः माधुर्यभरात् शृंगाररसिकोन्मालेनानंदितो मनोजः कामो येनेति। नमित्यर्थः। काचेचि सामर्थ्यबोतयेनो मधुना मानदैत्यं सूदितवानिति मधुसूदन इति। व्याकुर्वंति। ७। श्रीजयदेवेति। इदं जयदेवकविना भणितं वाणीति यदुक्तं

> श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं॥
> सुखमुत्कंठितगोपवधूकथितं वितनोतु सलीलं॥८॥ सखि०

ठितया गोपवध्वाः राधिकायाः कथितं वचनं तत्सुखं वितनोतु विस्तारयतु। पठतां शृण्वतामिति शेषः। कीदृशं। अतिशयेन मधुरिपोः श्रीकृष्णस्य निधुवनं सुरतक्रीडा शील यस्य स्वरूपं। सलीलमिति लीला शृंगारजा क्रिया तत्सहितमित्यर्थः। सलिलं यथा स्यादिति वा। आयोधनं निधुवनं सुरतसमभिसने कार्थः। कथितमित्यत्र भावे क्तः॥८॥ इदानीमत्युत्कंठया संख्याप्यनीयमाना गोपिगणवृतं श्रीकृष्णं दृष्ट्वा परावृत्य सखीमाह। हस्तस्रस्तादिना हे सखि अहं गोविंदं कानने पश्यामि हृष्यामि च पश्यामीति वर्तमानसामीप्ये वर्तमानता। कीदृशं कृष्णं व्रजसुंदरीगणवृतं गोपवधूकदंबपरिवृतं। ननु सपत्नीभिः परिवृतं दृष्ट्वा कथं ते हर्षः इत्यत आह। मामिति। मां मुद्वीक्ष्य दृष्ट्वापि लज्जितं

अन्यवधूभिः परिवृतो हमनणीयसद्य नयामुग्धं मनोहरमाननं यस्य तं। तथा च सुंद
रीशत वृतोपि सापराधमात्मानं मन्यमान्यः मत्तो बिभेतीति हर्षत्त चित्त एवेति भावः।
पुनः कीदृशं। अनृजुकुटिला भ्रूवल्ली भ्रूलता यासामेतादृश्यो याच ल्लव्यः गोपवध्वः
तासां वृंदं उत्सारयत्यपसारयतीत्येवं शीलं दृगंत विक्षितं नेत्रांतनावलोकितं यस्य
तं। मध्यागतायां प्रियादृगंतचेष्टया अन्यगोपीरपसारयंतमित्यर्थः। पुनः कीदृशं।
हस्तात् स्रस्तो मदर्शनेन साध्वसवशात् स्खलितो विलासवंशः क्रीडावेणुर्यस्य तं। पुनः
कीदृशं। अतिशयेन स्वे

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवीवृंदोत्सारि
दृगंतवीक्षितिमतिस्वेदार्द्रगंडस्थलं। मामुद्वीक्ष्य विलज्जितं
स्मितसुधामुग्धाननं कानने गोविंदं व्रजसुंदरीगणवृतं पश्यामि च

द्रे॥प स्वेदैः आर्द्रगंडस्थलं यस्य तं। सर्वत्र मामुद्वीक्ष्येत्यस्य संबंधः॥१६॥ अनृजुभ्रूवल्लि
मद्बल्लवीत्यनेन तासां सौंदर्यमुक्तं। अथवा। अनृजुः कुटिला मदाधिक्यदर्शनेन च
क्रोधात् भ्रूलता यासां तासां वृंदं ममपसारयतीत्येवं भूतं दृगंतवीक्षितं यस्य तं। अथवा
अनृजुभ्रूवल्लिमत्। कटाक्षविलकितं मयि यस्य अत एव बल्लवीवृंदमपसारयीत्य
र्थः। अत्रानृजुभ्रूवल्लीति प्रियादर्शनेन भ्रूनर्तनं कथितं। तत्सौंदर्यमपि। अथवा।
अनृजुभ्रूवल्लिमद्बल्लवीवृंदं तद्भावोद्बोधकत्वेन तत्। अधिकं सारि विस्तरणशील
कटाक्षवीक्षितं यस्य तद्भावविस्तारकमित्यर्थः। तासामेवाभिसारकमिति वा। अथ
वा। अनृजुभ्रूवल्लिमद्बल्लवीवृंदेन मद्गुणदर्शनेनोत्सारि उर्ध्वं प्रसरणशीलं दृगंतवी

क्षितं। कटाक्षोक्षणं यस्यतं। एवं सकलगुणसंपन्न नायकमुकरमणेर्दर्त्तनिदेवश्रीकृष्णो सागरसोमतिदर्शिता। अत्र राधा मोहना वालंबन विभावो अनकूलप्रतिकूल भावेव वश्रीकारिणिर त्तिथा या भावः। वनाद्युद्दीपनविभावाः स्मितकंठाश्लाघनुभावाः स्मितसुधामुग्धाननमितिदृगंतवीक्षितमिसनेन चदर्शितं। स्वेदकंपादयः सात्विका। अतिस्वेदार्द्रस्फद्रितत्वं तेषां दर्शितं हलसत्रस्तचिलासचत्रूभिन्नि वेपथुनोद्दीसः। सात्विका साध्वसमितिव्यभिचारिभावः लज्जाभयम्रदिकाश्चव्यभिचारिणइति महाकविना श्रीवृंदावनेश्वर्याः परमविदग्धायाः त्वेन सागरससंम्राटश्रृंगारोवर्णितः। अलमतिविस्तरेण। अनकूलश्चायंनायेकः तदुक्तं। अतिरक्ततया नार्यस्यक्तानललनास्पृहः। सीतायां रामवसोयमेनुकूलःप्रकीतितः। राधायामेवकृष्णस्य सुभासिद्धानुकूलता तदालोकेकदाप्यस्य नान्यासंगःस्मृजेदितितथथा। वेदग्धीनिकुरंबचुंबितधियः सौदर्यसारोज्वलाः कामिन्यः कतिनाघ बल्लवपते दीव्यंतिगोष्ठांतरे। राधेपुण्यवती शिखामणिरसिक्षामोदरित्वां विनाप्रेंखतीनपरासुयद्दकरिपोर्दृश्यात्रदृष्टिमयेति। प्रेयोनामायमलंकारश्चेति। तदुक्तंदंडिना। प्रीतिप्रकाशनं यत्तस्प्रेयइत्सभिधीयतइति। ॥७६॥ पुनर्विभावानाह। दूरालोकेति। हे सखि स्तोकोत्मकः स्तबकः गुछोयस्या एतादृशी यानकक्षाः अतिनेवाअशोकलतिकाऽनुकंप्याशोकन्नाखा न स्याः विकाशोउद्बोधोदुरालोकोदुःखेनालोकितुंशक्यः। नवे केसरचुकेनेइतिहखः लतिकेसत्रानुकपापां कनूामहृस्तपालिता अतएवानुकंप्याहशोकलतिकादुरालोकेतिभावः। किमपरं कासारः सरसीतत्संबंधी सदुपवनं तत्संबंधीयः पवनः शायसोपिपथियन्निदुःखंददाति। कासारइत्यनेनवायोशैत्यंकथितं। उपवनसंबंधित्वेनसोगंध्यंमांघंचध्वनितं। यतोवृक्षैरूपहतगतित्वेन मंदएववायुर्भवतानि अथवास्तोकसादिवायेरचविशेषणे। स्तदास्तोकस्तवकनवकाशोकलतिकांविकाश

यतीत्यन्वयः। नन्वपि मुखमागच्छन् पवनो ऽचलादिना निवार्यतामित्यत आह। दुरालोकायतीत्यिन्द्रियद्रूस्यर्थः। तथा चाकस्मादेवापतन्नदृश्यत इति भावः। अपि शब्देन तद्विकासिनाशोकलतिकापि व्यथयतीति ध्वनितं। अपि चेयं शिखरिणी गोवर्धनपर्वते वर्तमानाचूतानामाम्राणां मुकुलप्रसूतिः। कुड्मलोद्गमोपि न सुखयति। विकासदशायां तु कोवेद किं भविष्यतीत्यपि ध्वनितं। अथवा कीदृशी मुकुलप्रसूतिः। शिखरिणी प्रशस्ताग्रभागवर्तीत्यर्थः। शिखरिणीति प्रशंसायामिनिः। अथवा। शिखरिणी मल्लिका न सुखयतीत्यर्थः। भ्रामयतीनां भृंगीणां भ्रमरांगनानां रणितैः गुञ्जितैः रमणीया स्त्रीणां गानां भ्रमणं नायकान्वेष्यमाणार्थमिति ध्वनितं। शिखरिणी नामकछंदइत्यपि सूचितं। स्तोकोल्पे चातकेति विश्वः।

दुरालोकस्तोकस्तबकनवकाशोकलतिकाविकासः कासारोपवनपवनोपि व्यथयति। अपि भ्राम्यद्भृंगीरणितरमणीया न मुकुलप्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति॥१७॥ साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शितभुजामूलार्धदृष्टस्तनं॥ गोपीनां निभृतं निरीक्ष्य गमिताकांक्षश्चिरं चिंतयन्नन्तर्मुग्धमनोहरं हरतु वः क्लेशं नवः केशवः॥१८॥ इति द्वितीयः सर्गः॥ ध्वनिष्मतीवृक्षशाखावल्ली प्रियंगुषु। स्त्रीरत्ने मल्लिकायां च प्रोक्ता शिखरिणी बुधैरिति विश्वः॥१७॥ साकूतेति। केशवो हरिः युष्माकं क्लेशं हरतु। किं लक्षणः। गमिताकांक्षः श्रीराधायां प्रापिताभिलाषः। अन्यासु गोपीषु तद्दर्शनात्। गमिता निरस्ताकांक्षा यस्य स इति वा। किं कुर्वन्। निभृतं यथा स्यात्तथा निरीक्ष्य निभृतं रहस्यं भावप्रकाशनमिति या निरीक्ष्येति वा। अन्तर्हृदये चिरं चिंतयन्। किं निरीक्ष्येत्यपेक्षायामाह। साकूतं स्मितं साभिप्रायमीषद्धसितं। पुनः किं। आकुलाकुलगलद्धम्मिल्लं। आकुलाकुलोत्यन्तव्यस्तः गलन्धम्मिल्लः केशपाशो यत्र। कामोद्रेकाद्रोमहर्षादिहेतुना। पुनः किं। उल्लासितभ्रूवल्लीकं उक्षिप्तभ्रूवल्लीकं। अलीकदर्शितभुजामूलार्धदृष्टस्तनं। अलीकेन छलेन दर्शिताः भुजामूलार्धदृष्टस्तनाः यत्र कर्मणि तत्। अत्रार्धशब्दो दृष्टस्तनाभ्यां संबध्यते। हस्तौ च स्तनौ चेति द्वंद्वसमासः। अक्षणादिव्याजेन भुजामूलार्धदृष्टस्तनप्रकटनमिति।

भावः। किं वार्धजृम्भणमप्यत्र ज्ञेयं। तदुक्तं। वामबाहुः शिरो लग्नो यत्र वा मस्तनोन्नतिः सालसकूचिला संचतदुक्तं लर्धजृंभणमिति। का सामित्यत आह। गोपीनां। किंभूतं तच्चेष्टया मुग्धमनोहरमिति। मुग्धानां मनोहरतीति तथा। किंलक्षणो हरिः। नवस्तरुणः। तरुणं दृष्ट्वा स्त्रीणां कामविकारो जायते इति। अथवा। नवः श्रीराधां दृष्ट्वा न्यादृग्जातः। अत्यद्भुतगुणप्रकटनात्। अथवा। नवः नूयते नायकगुणैः स्तूयत इति नित्यनूतन इति वा। नित्यानुभूतस्यापि नानुभूत इव प्रतीतेः। तथा। कुलवरतनुधर्मग्रामवृंदानि भिंदन्सुमुखि निशितदीर्घापांगटंकच्छटाभिः। युगपदयमपूर्वकः पुरो विश्वकर्मा मरकतमणिलक्षैः गोष्ठकक्षां चिनोति। निभृतवे संप्रकाशनमिति व्याख्याने साकूतस्मितेत्यादि चतुर्णामपि पदानां भावविशेषणत्वं। मुग्धमनोहरमिति च क्रियाविशेषणं चिरं चित्ते यन् श्रीराधामिति यावत्। इति श्रीतिप्रियजनानां॥

कंसारिरपि संसारवासनाबद्धशृंखलां॥ राधामाधाय हृदये तत्याज व्रजसुंदरीः॥१॥

क्लेशापहारीकेशवो यत्र तादृशः श्रीराधादर्शनेनाह्लादेन गतक्लेश इति वा॥१८॥ इति श्रष्टप्रबंधः॥ ॥इति श्रीगीतगोविंदे व्याख्यामां जयदेवकृत अक्लेशकेशवो नाम द्वितीयः सर्गः॥२॥ ॥सर्गद्वयेन श्रीराधायाः श्रीकृष्णविषयिणी मुत्कं गमुत्कासे प्रति श्रीकृष्णस्यापि तस्या माह। कंसारिरपीत्यादि कंसारिरपि श्रीकृष्णोपि व्रजसुंदरीः तत्याज्य त्यागेहेतुमाह। राधामिति। राधां हृदये आधाय आरोप्य सौंदर्यवती र्वह्वीरपि तत्याजेति। श्रीकृष्णस्य राधया मनुरागाजिज्ञायोध्वनितः। कीदृशीं राधां संस्कारविषयिणी पावासनासंस्कारः तस्य बंधाय शृंखलामिव। अनेनाभिलाषाख्या प्रथमावस्था कथिता। तल्लक्षणं कथितं। प्राक्। किंच। संगमोपायरचिताप्रारभ्य व्यवसायतः संकल्पेच्छासमुद्भूतिरभिलाषोत्र विक्रिया। प्रवेशनिर्गमौ तूष्णीं दृष्टिरूस्तध्यगामिनी। रागप्रकाशनपरा श्रेष्ठा स्वात्मप्रसाधनं। व्याजोकयश्च चिजं

इति स कार्यस्यास्य सर्वास्वप्यवस्थासु प्रवेशो ज्ञेयः। प्रथमकारणत्वात् प्रेम्णो माधुर्यप्रसंपा
दकत्वाच्चेति। अथवा। सम्यक् सारः संसारः आनंदचिन्मयमधुरास्वाद्य सरसः तन्मयं च तद्विषय
कत्वात्। तद्विषयिणी या वासना नित्यसंस्कारस्तस्मिन् बंधायेव शृंखलामिव निगडरूपामिवे
त्यर्थः। उक्तं च। आवेद चिन्मयरसप्रतिभाविताभिस्ताभिर्य एष निजरूपतया कलाभि
र्गोलोक एव निवसत्यखिलात्मभूतो गोविंदमादिपुरुषं तमहं भजामीति ब्रह्मसंहितायां।
अथवा सर्वात्मभाषणीभिसरणं श्रीराधाया इति संसारः तद्विषयिणी या वासना नि
रंतरा हृदयवृत्तिः तया बंधायास्वचक्रीकारायेशृंखलामिव। तथा च कं सुखं सारयति वि
स्तारयतीति कंसारिः। उणादिकइण्प्रत्ययः। कंसो पियस्माद्विभेतीति सामर्थ्यद्यो
तनाय कंसारिरिति वा। उक्तं च। भयात् कंस इति। शृंखला पुंस्करीवस्त्रबंधने निगडे पिचे विष्वः। १९

इतस्ततस्तामनुसृत्य राधिकामनंगबाणव्रणखिन्नमानसः।
कृतानुतापः स कलिंदनंदिनीतटांतकुंजे विषसाद माधवः। २०

पुनः किं तवान् तत्राह। स माधवः। कलिंदनंदिन्याः यमुनायाः तटांतकुंजे तीरप्रांतल
तापिहितोदरगृहे विषसाद विषादं चकार। अथ मा धव पदेन मा लक्ष्मीः तस्या धवः स्वा
मी यदि रहव्याकुलो बभूवेति राधयाः सौभाग्यध्वनितं किं कृत्वा। इतस्ततस्तेनुनेषु संके
तस्थानेषु। तामाखिलजनपरित्यागेन स्वहृदि विनिहितां राधिकामनुसृत्यान्विष्य। की
दृशः। अनंगः कामः तस्य बाणेस्य यद्व्रणं क्षतं तेन खिन्नं दुःखितं मानसं यस्य सः। पुनः
कीदृशः। कृतानुतापः पूर्वमेव कथं मया नानुनीतानीते दीनी हिना कथमवस्थातुं शक्य
तमिति पश्चात्तापः कृतो येन सः। अनंगपदेनानिवार्यत्वध्वनितं। अनेन श्लोके नवि
ताख्या द्वितीयाऽवस्था कथिता। तल्लक्षणं कथितं प्राक्। यथा वसंते वासंतीत्यादि
ना राधाया अनुसरणं कथितं। तथैवात्र इतस्ततस्तामित्यादिना श्रीकृष्णस्यानुसर
णं दर्शितं। २० इदानीं कृतानुताप इति यदुक्तं तदेव गीतेन वर्णयति। मामियमित्यादिना।

ध्रुवपदं। गीतस्यास्य गुर्जरादिरागः तालरूकप्रतिमठः तयोर्लक्षणं तु कथितं तु प्रा
क्। गीतार्थस्तु। हरहर हा कष्टं। सा मत्प्राणकोटिवल्लभा प्रख्यातगुणा राधा हतादर
तया न च बहुमानं तया कुपितेव गता। विरत्रेण कुपिते चेत्युक्तं। प्रणययोगेन सम
म कोपाभावात्। स्त्रियश्चिचारित्रभावोयं कोप इति ज्ञेयं इति ध्रुवपदं। ननु सा कुपि
ता गतेति कथं त्वया ज्ञातमित्यत आह। मामियमित्यादि। मां च वधूनिचयेन गोपव
धूसमूहेन वृतं वेष्टितं विलोक्य दृष्ट्वा चलिता प्रस्थिता। विलोक्येत्यव्यवहितं पू
र्वकाले क्त्वाप्रत्ययः। तेन गोपवधूवेष्टितं मां दृष्ट्वा अव्यवहितकाल एव यतश्चलिता ततो
ज्ञायते कुपितेति भावः। ननु सा गच्छन्ती किमिति त्वया न निवारितेत्यत आह। सापराधतयेति॥

मामियं चलिता विलोक्य वृतं वधूनिचयेन॥ सापराधतया म
या न निवारिता तिभयेन॥१॥ हरे हर हतादरतया गता सा कुपितेव॥१॥ध्रु

मया। अतिभयेनातित्रासयित भीत्या सा न निवारिता॥ अस्याः गतेः कथं च कुत्राख्यत इति भ
येहेतुमाह। सापराधयेति। अपराधो राधां विहायान्यगोपीभिः सह क्रीडारूपः तद्युक्ततया॥
१॥ किं करिष्यतीति। सा चिरं विरहेण चिरकालान मद्विश्लेषणा किं करिष्यति। विरहतां
पन्ना। स्पर्धकमुपायं करिष्यतीत्यर्थः। अनेन विरहमहाज्वालामवधार्य तद्दुःखाक्रांत
त्वेन सुष्टप्रणयोत्कर्षो दर्शितः। तथा। यत्ते सुजातचरणांबुरुहं स्तनेषु भीताः शनैः
प्रियदधीमहि कर्कशेषु। तेनाटवीमटसि तद्व्यथते न किंस्वित्कूर्पादिभिर्भ्रमति धीर्भवदा
युषां नः। इति। अथवा चिरं विरहेण तत्समां ज्ञाला किं मम गीकारं करिष्यति यथाकथं
चि।

व

दपीति शेषः। किमिति वितर्के। अत्र क्षणस्यापि विश्लेषे बहुकालस्फूर्तिः। दृष्टं तत्र श्रीभागवते। क्षणं युगशतमिव यासां येन विना भवेत्। अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यतामिति च। आदिमहानुभावस्यानुभावोऽयं चिरमित्यनेन कथितः। अथवा किं वदिष्यति अपराधक्षमापनार्थं चरणे निपतितं मां दृष्ट्वा किं कोपेन तिरस्कारवचनमपि कथयिष्यति। यद्वा किं मया सह कदाचिन्माधुर्यवर्षिण्या याण्यासद्वार्तां करिष्यति। किं मम सकथां वा वदिष्यति दोषान्वा वदिष्यतीत्यर्थः। अथवा मयि चाटुभिर्मिलिते किं कोपादिकं करिष्यति किं परुषं वा वदिष्यति। अपि तु कोपं विहाय प्रसन्ना सती मधुरमेव वदिष्यतीत्यर्थः। एवमानादि प्रकरणेऽस्मिन्

किं करिष्यति किं वदिष्यति सा चिरं विरहेण॥
किं जनेन धनेन किं मम जीवितेन गृहेण सुखेन॥२॥

रसे मुनिराह हारिचन्द्रो॥ जयदेवेन च अत्रैव श्रीकृष्णस्य रसास्वाद लीलामयमूर्तेर्बिरूपाचेष्टितं निरूपितं। तेन एषु व्याख्यानेषु कल्पनानानांकनीयानन्वेत्ता च तत्तस्यैव काव्यग्रहः अन्यगोपीजनानुशीलनेन चित्तव्यावर्तनं कर्तव्यमित्यत आह। किं जनेनेति। तया विना मम जनेन गोपीरूपपरिजनेन किं गोपांगनारूपः परिजनो ममाकिंचित्कर इत्यर्थः। जनेनात्र शेषपरिजनेन किमिति वा। तद्वियोगसर्वपरिजनत्यागात्। अपि च धनेन किं। धनेन पितुः श्रीव्रजेश्वरस्याखिललोकातिशायिन्या संपत्त्या मम किं न किमपीत्यर्थः। तद्विरहे विविधविचित्रालंकरणानामपि संतापकत्वेन परित्यागात्। अतः सैव मम भूषणरूपा महाधनरूपा वेति भावः। वक्ष्यति चाग्रे त्वमसी त्यादि। ननु धनं विना गृहसौख्यं न स्यादिति चेत्तत्राह गृहेन किं तया विना मम गृहे किं प्रयोजनमित्यर्थः॥

तद्वियोगेनवनवासांगीकारात्। ननुसुखास्पदंगृहंतेनविनासुखंनस्यादतआह। ममसुखे
नकिं। तयाविनाऽन्यसुखेनात्मसंबंधिसुखेनममकिंसुखंतद्दुःखानुभवेनसुखप्रदा
नामपिदुःखप्रदत्वात्। तत्सुखेनैवममसुखमित्यर्थः। गेहेनेतिपाठे। ममजीवितेनकिंदुः
खासहिष्णुतयाममजीवितमप्यकिंचित्करमित्यर्थः। स्मृत्याख्यातृतीयावस्थेयंकथिता॥
तदुक्तंरसार्णवसुधाकरे। अर्थानामनुभूतानांदेशकालानुवर्त्तिनां। सांतत्येनपरामर्शो
मनसःस्यादनुस्मृतिः। अत्रानुभावानिश्वासस्तध्यानरुदितविहस्तता। शय्यासनादिवि
श्लेषद्वेष्याद्याःस्मरकल्पिताः। इत्थंतांविनासर्वेषांदुःखरूपत्वंकथि

चिंतयामितदाननंकुटिलभ्रुकोपभरेण॥ शोण
पद्ममिवोपरिभ्रमताकुलंभ्रमरेण॥ ३॥

तिमिति। २॥ इदानींतद्दुःखाक्रांतस्यापिकुपितायाअपितस्याएवैवंचिंतनपरत्वेन
प्रेमसौष्ठवंदर्शयति। चिंतयामीति। अहंतदाननंचिंतयामिस्मरामि। कीदृशं। रोषभ
रेणकोपातिशयेनकुटिलभ्रुकुटिलाभ्रूर्यत्र। तादृशं। किमिव। उपरिभ्रमतासंचरता
भ्रमरेणाकुलंव्याप्तंशोणपद्ममिवरक्तपद्ममिव। अत्ररोषारुणेमुखेशोणपद्मतादा
त्म्यंबोध्यंवारंवाररोषवक्रीभवत्साभ्रूचापभ्रुमद्भ्रमरोपमाबोद्धव्या। अनेनगुणकीर्तना
ख्याचतुर्थ्यवस्थाकथिता। तदुक्तं। अंगप्रत्यंगलीलाभिर्वाक्चेष्टाहसितेक्षितैः। नतस्य
सदृशःकश्चिदित्यादिकगुणकीर्त्तनमिति। शोणःकोकनदच्छविरित्यमरः। अनेन
व्यभिचारिसौंदर्यंकथितं। क्रोधस्यापिशोभामात्रदत्वात्। किंचमाधुर्यंनामेतदेवतत्
तदुक्तं। माधुर्यंनामचेष्टितानांसर्वावस्थासुचारुतेति॥ ३॥ तामहमित्यादि। अहंवने

किं तामनुसरामि। किमिति तस्याः अनुसरणं करोमि। हे इ॥ किं वृथा विलपामि किमि
ति वृथा विलापं करोमि। हृदि संगतां हृदये लग्नां तामनीशं निरंतरं भृशमतिशयेन
रमयामि क्रीडयामि वियोगे संयोगस्फूर्तिर्महाभावविकारोयं। अथवा किंनाब्दः
प्रश्ने। अहं त्वां हृदि संगतां अनिशं किं रमयामि किं वनेतो अनुसरामि किं वृथा विल
पामि। इत्यर्थः॥ ४॥ तन्वीति। हे तन्वि कृशांगि तव हृदयं असूयया मयि दोषाविष्कर
णे खिन्नं खेदयुक्तं आकलयामि पश्यामि। अनामीत्यर्थः॥ इयं चोद्वेगावस्था। तदुक्तं
शृंगारतिलके। यस्मिन्रम्यं भरम्यं स्यान्न च हर्षाय किंचन विद्वेषः प्राणितव्येपि स
उद्वेगः स्मृतो यथेति। इयं तु श्रीराधायां युज्यते॥

तामहं हृदि संगतामनिशं भृशं रमयामि। किं वनेनुसरामि
तामिह किं विलपामि॥ ४॥ तन्वि खिन्नमसूयया हृदयं तवा
कलयामि॥ तन्न वेद्मि कुतो गतासि न तेनुनयामि॥ ५॥

तथा च मनसः स्वेदयुक्तत्वात् तन्वीति संबोधनमुचितमेवेति। तन्न वेद्मि त्वं कुतो ग
तासि तदहं न चेद्मि। तेन तव नते नम्रणत्या अनुनयामि त्वामित्यर्थः। क्वचिन्नुतेति पाठः।
तदा तेनुतेन तव स्तुत्यानुनयामि त्वामित्यर्थः। अथवा नु इति वितर्के। तेनेति लक्ष
णेव्ययं। तथा च यां मार्गलक्ष्मीकृत्य गतासि तन्न त्वां मार्गलक्ष्मीकृत्य गतास्या तेनुनयामि
तवानुनयं करोमीति संबंधमात्रविवक्षायां षष्ठी। अनेन विलापावस्था कथिता। त
दुक्तं शृंगारतिलके बभ्रमीति मनो यस्मिन्नसौ तु क्रुध्यादिनस्ततः। वाचः प्रियाश्रया एव
स प्रलापः स्मृतो यथेति॥ ५॥ दृत्यसरति अपि हे सुंदरि पुरेव पूर्वमिव ससम्भ्रमं सादरं भ
भंग्या सचकितं वा परिरंभणमालिंगनं किं किमिति न ददासि न प्रयच्छसीत्यर्थः॥

त्यसंभ्रममितित्स्वामिष्टेपिप्रियतमाश्लेषेत्त्वद्देगा।कि।व्यजनाद्विषकानुभावविशेषोध्वनि
नः।तदुक्तं।इष्टेपिमानवर्गाभ्यांविवेकःस्यादनादरद्दति।तद्यथा।प्रियोकिलक्षेणवि
पक्षसन्निधौस्वीकारित्तां।पदूयपदि।खंडमोलिना।न्नामातिवामाहृदयंगमामविरुजंददा
पायनिरासलीलयेति।यथावा।स्फुरत्स्वग्रेतिश्वन्सास्चित्तचमुखक्षिप्तनयनःप्रतीक्ष्यौदृत्वा
कृत्वायंभचदवसरस्याद्यदमनंगदृन्नार्वेगैग्रामोत्करणगुरुहेलागहनयावंसंतीवक्षी
बेलामिहवनमालारचयसीति।त्वंमेममपुरतोयत्नःदृस्यस्येगत्तागतंयातायातंविदधा
सिकरोषिविरहिणोहिचिंतानुषंगात्सर्वत्तस्तामेवपश्यति।यथा।प्रासादेसादिश्चिदि
श्चितुसापृष्टतःसापुरःसापर्यंकेसापथिचसातद्वियोगात्तरस्याहंहोत्चेतःप्रकृतिर
परानास्तिमकापिसासासासाजगत्तिसकलेकोयमद्वैतवादः।दी।क्षम्यतामिति॥ ॥

दृश्यसेपुरतोगतागतमेवदधासि।किंपुरेचसंसंभ्रमंपरिरं
भणंनददासि।दी।क्षम्यतामपरंकदापितवेदृशंनकरोमि।देहि
सुंदरीदर्शनंममममन्मथेनदुनोमि।७।वर्णितंजयदेवकेनहरे
रिदंप्रणतेनकिंदुबिल्वसमुद्रसंभवरोहिणीरमणेम॥८॥

त्ति।हेसुंदरिदर्शनीयरूपेक्षम्यतांइमपराधंक्षमस्व।कदापितवईदृशमपरंचिप्रियं
नकरोमिनकरिष्यामिइयंचोन्मादावस्थातदुक्तंरसार्णवसुधाकरे।अतस्मिस्तदितिभ्रांति
रुन्मादोविरहोद्भवइति।पुनःकिंचित्संजातविवेकःकथयति।देहीतिहेसुंदरिममेतिसंबंध
मात्रेषष्ठिदर्शनंदेहिप्रयच्छ।तदर्शनसंप्रदानत्वायोगापिलंममरूपयादर्शनंदेहितियो
पिनचतुर्थीज्ञेया।तेथाचसुंदरीति।संबोधनेनेप्रोत्साहयति।मन्मथेनकामेनाहंदुनोमि
संतप्तोभवामि।७।वर्णितमितिजयदेवकेनजयदेवेन।स्वार्थेकः।इदंहरेकैश्चरितंवर्णितं
कीदृशेनप्रणतेनअथद्धिरिभिस्तयंत्रिवणेनेतिपाठेहरिपरायणेनेत्यर्थः।पुनःकीदृशेन

रमणेन चंद्रेन यथा समुद्रो ऽसन्नेन चंद्रेण तस्योन्नतिः क्रियते। तथास्य कुलस्योन्नतिः। जयदेव
कृतेनेति चंद्रसाम्यं। किंदुबिल्वं नाम जयदेवकुलं। केचित्तु किंदबिल्वनामा कश्चिद्ग्रामवतः
समुद्भवः। कविश्च जयदेव पूर्वपुरुष इति कथयंति। ग्लौरिंदु रेणतिलको हरिरोहिणीशोऽ
त्रिहैरावली। तथा च पद्मावत्या उत्कर्ष कथनाय रोहिणीरमणे ऽस्फुटं॥ ॥ इति सत्यनप्रबंधः॥
इदानी कामए एव मे दुःखं प्रयच्छतीति तमेवोपालंभगोचरं करामीत्याह। हृदीत्यादि।
हे अनंग कंदर्प मयि न प्रहर प्रहारं मा कुरु। किमिति चित्तर्के। मय हरभ्रांत्या महादेवभ्रमे
ण क्रुधा क्रोधात्वं धावसीति किमु वितर्कयामि। अथवा। उद् इति हे अनंग हरभ्रांत्या मपि किं
किमिति धावसि। कीदृशे मयि प्रियारहिते विरहिते। हरः सर्वदा प्रियायुक्तेऽहं वधुना प्रिया
रविहितः इति मयि हरभ्रमो न युक्त इति भावः। यथा चोप्रियाविरहसंतप्ते मयि प्रहारो न॥

हृदि बिसलताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी कंठे न सा गरलद्युतिः।
मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर न हरभ्रांत्यानंग क्रुधा किमु धावसि॥ २॥

चित्तध्वनितं। कामः पूर्वं हरेणात च्छरीरं दग्ध्वांगरहितः कृत इति हरस्य कामस्य महद्वैर सूचना।
यानंगपदेन संबोधनं। भ्रमबीजं निरस्यति। हृदये बिसलतोयाः मृणाललतायाः हारः तद्वि
रहजन्यसंतापशांत्यर्थं धृतः। न तु भुजंगमनायकः सर्पराजो वासुकिः। यं च कंठे कुवलय
यदलानां नीलोत्पलपत्राणां श्रेणी पंक्तिः। शैत्याय धृता। न तु सा गरलद्युतिः। विषकांतिः। इ
दं सर्वांगे तापशांत्यर्थं धृतं मलयजरजश्चंदनधूलिः। न तु भस्मविभूतिः। अंगे लिप्तः। अत्रायं श्लि
लचंद्रनद्रवोपि विहार हत्तापशांत्यै धूलिभूत इति रजःपदेन सूचितं। तथा बिसलतायां शैत्य
दीर्घत्वादि दर्शनात् तत्र वासुकिभ्रमः। नीलोत्पलदलपंक्तौ श्यामत्वादि धर्मदर्शनाद्गरलभ्रमं।
चंदनरजसि भस्मभ्रमाच्च मयि महादेवभ्रमः तव न युक्त इति भावः। अयं च भ्रांतिमानलं
कारः। सादृश्याद्वस्त्वंतरप्रतीतिर्भ्रांतिमानिति तल्लक्षणात्। वितर्केकिंकिमूतत्वेस्यमर [illegible]
संबुधौ रुषा क्रोधे चेति विश्वः॥ २॥ कुसुमसायकत्वेन का[illegible]मः प्रसिद्धः अत इमानेव कृतमंज

81

रीरूपान्बाणान् धनुष्यारोप्यमांताडयिष्यतीतिशंकयापुनरपिकामायेचदैन्यंकरात्तिपा
णाविसादिना।हेमनसिजमदनअमुंपुरस्थितंचूतसायकमाम्रपुष्परूपबाणंपाणौह
स्ते माकुरु।वसंतकालीनपुष्पोद्गमंदष्ट्वाहस्तेचापंधनुमरोपय प्रसंचायुक्तंमाकुरु।यद्वा
चूतसायकंहस्तेमाकुरुहस्तेपिचेत्करार्षितदामुंसायकंमाअरोपयामुसंदेहीत्यर्थः।अ
त्रमनसिजपदेनमन्मसोजातस्यतेमसंतापकारिचमनुचित्तमितिध्वनितंहेक्रीडानि
र्जितविश्वाक्रीडयालीलयानिर्जितंविश्वंजगद्येनतत्तादृन्।।मूर्छितस्यमूर्छांप्राप्तस्यजन
स्यमादृत्रास्यआघातेनतवकिंपौरुषंअपितुनकिमपीत्यर्थः।अथवामूर्छितजानाघा

पाणौमाकुरुचूतसायकममुंमाचापमारोपयक्रीडानिर्जितविश्वमूर्छि
तजनाघातेनकिंपौरुषं।तस्याएवमृगीदृशोमनसिजप्रेंखत्कटाक्षाशु
गश्रेणीजर्जरितंमनागपिमनोनाधापिसंधुक्षते।।२२।। ।। ।।

षमित्यर्थः।मूर्छितत्वेहेतुमाह।तस्याएवेति।तस्याएवमृगीदृशोहरिणीदृशः।तस्याए
वेतिविरहाधिक्येनराधानामग्रहणाशक्तिःप्रतिपाद्यते।प्रेंखंतप्रसर्पंतोयेकटाक्षाःत
एवआशुगाःबाणास्तेषांश्रेणीभिःपंक्तीभिःजर्जरितंखंडखंडिकृतंमनोमनागपिस्वल्प
मपिनसंधुक्षतेनस्वस्थंभवति।अद्याप्यद्यपर्यंतमपिधुक्षधिक्षसंदीपनक्लेशान्जीवने
च्छितिधात्वनुसारात्नसंधुक्षते।नजीवत्यर्थः।इतिवा।तथाचातत्करासरूपबाणेरहंमू
र्छितः।संप्रतिमयिचूतमंजरीरूपेसायकप्रहारोमृतमारणमाचरंतीतिभावः।लीलयैवे
येनविश्वमपिजितंतस्यतेमूर्छितजनेषुप्रहारोयत्रोहनिकरदसपिध्वनितंसायकःशरख
ड्गयोरितिविश्वः।तथास्त्रियांधनुश्चापाविसमरःकिंपौरुषमितिद्वितीयव्याख्यानप
क्षेकिंक्षेपइत्यनेनसमासः।आशुगौमारुतेबाणेइतिविश्वः।।२२।।ननुत्वत्कटाक्षादिस्म

रणादेवनचुदुःखंभवतिकामस्यतत्रकोपराधइत्यतआह।भ्रूपल्लवमित्ति।किंमित्यास्तेपे।
यस्यांराधायोंस्मरेणकामेनअस्त्राण्यर्पितानिस्थापितानितितर्कयामि।नन्वस्त्राणि
वीरेणहस्तेस्थापयितुमुचितानिनत्वनेत्रइत्यतआह।निर्जित्तेत्यादि।निर्जितंजगत्त्रये
निस्तानि।तथाचैरवास्त्रैर्जमज्जयंस्वात्तत्रस्थापितानीतिभावः।नत्वत्रकिंमितिनस्थापि
तानात्यतथाह।अनंगेत्यादि।अनंगस्यकामस्यजयायजंगमदेवतायांगमनशीलदेवता
यां।तथाच।तयैवत्रैलोक्यजयास्यानिदत्तानि।अतोजातप्रयोजनानित्रैवस्थापितानीति
भावः।देवत्रयाणांदस्तेदीयत्तेतत्केनापिनप्रतिहंतुंशक्यतइत्तिध्वनितं।अहोदेवतायाःम
हात्म्यंअंगाविनैवयत्प्रसादेनजगज्जितमत्तएवानंगस्तज्जितवादेवदेवेशंश्रीकृष्णंविहायता

भ्रूपल्लवंधनुरपांगतरंगितानिबाणागुणःश्रवणपालिरितिस्मरेणतस्या
मनंगजयजंगमदेवतायामस्त्राणिनिर्जितजगंतिकिमर्पितानि॥२३॥

नित्तेयं।कानितान्यस्त्राणीत्यतआह।भ्रूपल्लवमित्यादि।भ्रूपल्लवमिचतदेवधनुः।अपां
गतरंगितानिकटाक्षस्यगतागतानिबाणाः।श्रवणपालिःकर्णलताप्रांतएवगुणःप्रसं
वाप्यनीलस्निग्धत्वादुवःपल्लवत्वेननिरूपणं।वक्रत्वेनधनुष्टेननिरूपिता।अपांग
मंगहीनेस्यान्नेत्रांतेतिलकेपिचेत्तिविश्वः।पालिकर्णलताग्रेसोपंक्तावंकप्रभेदयोरि
तिच॥२३॥संप्रतिराधांगविलसितान्येवस्मरबाणरूपाणिमांपीडयंतीतितस्याएवो
पालंकरोमीत्याशयेनकाममुपेक्ष्यपुरःस्थितामिवराधांसंबोध्याह।भ्रूचापेतिभ्रूचा
पेभ्रूरूपेधनुषिनिहित्तोर्पितःकटाक्षविशिखःकटाक्षरूपोबाणोममव्यथांममममं
पीडांनिमातुकरोतुधनुष्यारोपितस्याबाणस्यपरममर्मपीडनमेवधर्मइति।तदुचि
तमेव।अथचकुटिलोवक्रःश्यामात्मात्मात्मशामःआत्मास्वरूपंमस्यएतादृशःकबरी
भारोपिग्रथितवेणीकेशसंचयोपिमारोधमंमारायमारणायउद्यमंपराक्रमंक

रोतु। अथवा मारस्य कामस्य उद्यमं करोतु यो नर्मलिनं कुटिलश्च भवति। सोऽन्यमा
रणाय यततद्रूस्यपि नानुचितं अथ च। हे तन्वि अयं बिंबाधरो बिंबफलतुल्योऽध
रो मोहं मूर्च्छां तनुतां तनोतु। कीदृशो रागवान् रक्तता चित्रिष्टः इदमपि नानुचितं
यतो यो रागवान् मात्सर्ययुक्तः स परं मोहं करोत्येवेति। अयं तव सद्वृत्तो सद्वृत्तुलः
स्तनमंडलः कुचविस्तारो मम प्राणैः कथं किमिति क्रीडति प्राणग्रहणरूपां क्रीडां
किमिति करोति। सद्वृत्तस्य सच्चरितस्य परप्राणग्राहित्वमनुचितमिति भावः॥
विरोधनामायमलंकारः॥ सद्वृत्तरूपगुणस्य परप्राणग्रहणक्रियाविरोध
कथनात्। तदुक्तं काव्यप्रकाशे विरोधः सोवि

भ्रूचापनिहितः कटाक्षविशिखो निर्मातु मर्मव्यथां श्यामात्मा
कुटिलः करोतु कबरीभारोऽपि मारोद्यमं। मोहं तावदयं च तन्वि
तनुतां बिंबाधरो रागवान् सद्वृत्तस्तनमंडलस्तव कथं प्राणैर्मम क्रीडति॥ १४॥

रोधेऽपि विरुद्धत्वेन यद्वचः इति। विशिखः शलो मरे ना रह्द्रस्मरः। मारो मृत्यौ विशिखोऽनंगे
ति विश्वः। बिंबं फले बिंबिकायाः प्रतिबिंबे च मंडले। देहच्छायायामपि। रागो नु
रक्तौ मात्सर्ये रंजनेऽपि निगद्यते इति विश्वः। चरिते वर्तुले वृत्तमिति शाश्वतः। आ
त्मा देह मनो ब्रह्म स्वभाव धृति बुद्धिषु इति विश्वः॥ १४॥ ननु तस्या अपि नापराधो
न स्मरस्य किंतु तदंगस्पर्शादिविषयालाभात्त्वं च लंल्लवेत्तत्वादुःखीकरोतीत्य
तोऽनुभूयमानां तामन्वानः आह। तानीति। स्पर्शसुखानि तदंगस्पर्शजन्यानि
सुखानि इदानीं अनुभूयमानानि तानेव पूर्वानुभूतान्येव एतेन नवगिंद्रिय

विषयलाभः कथितः दृशोर्नेत्रयोः तरलाश्चंचलाः स्निग्धाः स्नेहगर्भा विभ्रमाः
विलासास्त एव पूर्वानुभूता एव। अनेन चक्षुर्विषयलाभ उक्तः। वक्त्राम्बुजसौ
रभं तस्या मुखपद्मसौरभं तदेव। अनेन घ्राणस्य विषयप्राप्तिरुक्ता। गिरां तद्व
चसां सुधाममृतं स्यंदते स्रवत्येवं रीति लोचवक्रिमा वक्रत्वमिदानीं श्रोत्रेण गृ
ह्यमाणः स पूर्वानुभूत एवानेन श्रोत्रेन्द्रियस्य विषयसान्निध्यमुक्तं। बिंबा
धरमाधुरी तस्याः बिंबफलस्याधरस्य माधुरी मधुरताऽधुना मया स्वाद्य
माना सैव पूर्वानुभूतैवानेन रसनेन्द्रियविषयलाभः उक्तः। इत्येवं प्रकारेण चि
य संगोपित तदिन्द्रियाणां स्वस्वविषयासक्तावपि माने

तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशो विभ्रमास्तद्वक्त्राम्बु
जसौरभं स च सुधास्यन्दी गिरां वक्रिमा सा बिंबाधरमाधुरीति वि
षयासंगेपि चेन्मानसं तस्यां लग्नसमाधि हन्त विरहे व्याधिः कथं

संमन्मानस्वं तस्यां राधायां लग्नसमाधि तदेकाग्रं अदि हन्तेति खेदे तदा विरहव्या
धिस्तद्विश्लेषजन्यो व्याधिः कथं वर्धते। अपि शब्दो विरोधालंकारसूचनार्थः। बा
ह्येन्द्रियविषयासंगे समाधेरसंभावाद्बाह्येन्द्रियवृत्तिनिरोधे सति मनसा यकाग्र
तायाः एव समाधिपदार्थत्वात् तथा च तत्तदिन्द्रियाणां स्वस्वाभिलषितविषयाला
भे एव विरहः संभवति मम च तत्तदिन्द्रियाणां विषयविच्छेदस्याभावान्मनसस्तच्चि
त्तैकपरत्वात्तया सह विश्लेष एव नास्तीति कथं विरहजन्यव्याधिसंभववृत्तिर्भा
वः। समाधौ व्याधेरनुद्भवद्वृत्तिर्ध्वनितं च एवार्थः। गंधरूपरसस्पर्शशब्दाश्च वि
षया अमी स्मरः। तस्मात्कोप्यद्भुतो दुर्विचिंत्यस्तत्प्रेमविवर्त इति सिद्धान्तः॥२५॥

इदानीं सर्गांतिआशिषमाशास्ते। तिर्यगिति। मधुसूदनस्य श्रीकृष्णस्य कटाक्षोर्मयः नेत्रांतदर्शनतरंगाः वः युष्माकं क्षेमं ददतु कल्याणं प्रयच्छंतु दुरितासद्भावेन क्षेमदातृत्वं संभवतीति दुरितदारुणसामर्थ्यद्योतनाय मधुसूदन एदोपादानं। अनिचापल्यसूचनायेति वा। किंलक्षणः मधुरे अमृतादपि मधुरिमाश्रये राधाया मुखबिंबे इंदुमिव तस्मिन्मृदुस्पदनी बच्चचलसंमुग्धमव्यक्तं सुंदरं वा यथा स्यात् एवं कंदलिता पल्लविताः। तथा चेंदुदर्शनातरंगा अतीव पल्लविता भवंतीति कटाक्षाणां तरंगसाम्यं। कचिच्च प्रेम्णा कंदलिताः सुमुग्धमधुरे राधाननेंदौ सुधासारे वो मधूसूदनस्य ददतु क्षेमं कटाक्षोर्मय इति पाठः। तदा किंविशिष्टे मुखेंदौ सुष्ठु

तिर्यक्कंठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्गीतिस्थानकृता
वधानललनालक्षैर्न संलक्षिताः। संमुग्धं मधुसूदनस्य मधुरे राधा
मुखेंदौ मृदुस्पंदं कंदलिताश्चिरं ददतु वः क्षेमं कटाक्षोर्मयः॥२४॥ द्वितीयसर्गः॥

मुग्धं च तन्मधुरं च तत्तथा स्मितं तस्मिन् वा प्रिये चेत्यर्थः। मधुरस्तु प्रिये स्वादाविति पुनः कीदृशे सुधासारे। ननु अन्यासु पश्यतीषु कथं राधामुखचंद्र एव पल्लवितास्तु मर्यय अत आह। वंशोच्चरद्गीतिस्थाने षु गानपदेषु स्वरग्रामादिषु कृतावधानैः समर्पितचित्तवृत्तिभिः। ललनालक्षैः कामिनीकदंबैर्न संलक्षिता नावलोकिताः। तथा च सकल एव कलत्रकदंबो वंशध्वनिमोहितो न किंचिदपश्यत् तत्रैव पल्लविता इति भावः। वंशापूरणे स्वभावमनुवर्णयति किंभूतस्य तिर्यक् वक्रः कंठो यस्य विलोलश्चंचलो मौलिः किरीटो यस्य तरलः उत्तंसः। तिर्यक्कंठश्चासौ विलोलमौलिश्चासौ तरलतंसश्चेति कर्मधारयः। तथाविधस्येत्यर्थः। गीतिर्गानं ललना तु निबिनीस्यमरः। उक्तं सर्वार्णसरेपि सुंद

रेनायकेपिचेतिधरणिः कंदर्लेतुनवांकुरे कलध्वनावुपरागेचनितांतुर्मिपीडालके
ष्कंठाम्रगप्रकाशावीविषुवस्त्रसंकोचलेखायामिति॥२६॥ ॥इतिश्रीगीत॰ मुग्ध
मधुसूदनोनामतृतीयः सर्गः॥३॥ पूर्वसर्गेश्रीकृष्णस्यविरहजनितावस्थावर्णि
ता॥अत्रतुश्रीराधाविरहावस्थांश्रीकृष्णंप्रत्याह॥यमुनेत्यादि॥राधिकायाः सखीमाध
वंश्रीकृष्णंप्राहवक्ष्यमाणमुवाच॥राधिकेत्यनुकंपायांकन्॥कीदृशी॥प्रेमभरेणरा
धाविषयकस्नेहाधिक्येनउद्भ्रांतंउत्क्षिप्तंचलनादिक्रियांकर्त्तुमशक्यं॥अतएवत
दन्वेषणंविहाययमुनायास्तीरेयद्वानीरनिकुंजंतत्रमंदेनिरुत्साहंआस्थितमा
सीनं॥अमंदमितिक्रिये नविशेषणं॥या॥अतिशयव्याकुलांराधांदृष्ट्वाअमंदसवे
गमाहेत्यर्थः मंदः खलेमंदगतंमूर्खस्वैरिणिरोगिणीतिविश्वः सप्रेमाभेदरहितं
यूनोर्यद्भावबंधनंइतिरसार्णवसुधाकरे॥२७॥तदेवगीतेन

यमुनातीरवानीरनिकुंजेमंदमास्थितं॥प्राहप्रेमभरोद्भ्रांतंमाधवंराधिकासखी॥२७॥
दर्शयति॥निंदतीत्यादिना॥ध्रुवपदमिदं॥गानस्यास्यकर्णाटरागः॥तल्लक्षणं॥कृपाणपा
णिर्गजदंतपत्रमेकंवहन्दक्षिणकर्णपूरे॥संस्तूयमानः सुरचारणौघैःकर्णाटरागःशि
खिकंठनीलइति॥एकतालीतालः तल्लक्षणंकथितंप्राक्॥विरहोत्कंठितानायिकाचेयं॥
नेहागतः समुचितेष्वपिवासरेषुप्राणेश्वरोहिगुरुवासरोहिगुरुकार्यवस्यनस्यात्॥
दुर्वारवृत्तविरहज्वरतापितांगीमुत्कंठितांवदतितांभरतः कवीद्रइति॥गीतार्थस्तु॥हे
माधवसाराधातवविरहेदीनादुःखिता॥भवान्सस्त्रीकएवेतिनतद्दुःखंजानाति
माधवपदेनकटाक्षितं॥हाकष्टंयदिदुःखितातर्हिकथंवर्त्तितेतर्हिकथंवर्त्ति
तदाह॥त्वयिलीनामग्ना॥कस्मादिवमनसिजस्यकामस्यविशिखाघाता॥त्वद्भया
दिव॥भवचेतोमनसोजातइतित्वयिलीनायानतद्भयमितिमनसिजेतिपदेनध्व

87

नितं। मनु मयि कथं लीनेत्यत आह। भावनयेति। भावनया सर्वविषयनिंदापूर्व
कत्वत्स्मरणेनेत्यर्थः। ध्रुवपदं। विषयनिंदामाह। चंदनं मलयजं निंदति विर
हिणां सुपतापकरो वृथा नो साधारणमिदं विक्षनीति निंदां करोति। किंचारं
दुकिरणं सुधांशुकरं अनुलक्षित्यखेदं कष्टं विदंति प्राप्नोति तत्रापि अधी
र मल्पं। धीरस्तु कुंकुमस्वल्पमनु निधैर्यवति त्रिष्विसमरः। अधीरं धैर्यरहितं।
यथा स्यात्तथा निंदति वा। अधीकमीरयति। कामतारान्प्रेरयतीति। इतिचंदन
विशोषणं वा। अपि च। मलयसमीरं। मलयासंबंधिवातं। व्यालनिलयमिलने
न व्यालानां सर्पाणां निलयो निवासश्चंदनवृक्षस्तस्य मिलनेन संसर्गेण गर
लमिव विषमिव कलयति मन्यते। चंदनवृक्षस्थितः सर्पैः पीतोद्गीर्णा एते
मलयवायवोऽत एव समीरयतीति स्या

निंदति चंदनमिंदुकिरणमनुविंदति खेदमधीरं। व्यालनिलयमिल
नेन गरलमिव कलयति मलयसमीरं॥१॥ सा विरहे तव दीना। माध
व मनसिज[illegible] विशिखभयादिव भावनया त्वयि लीना॥ ध्रुवपदं।

नास्थानो तरं वस्तु वालकस्वभावा द्विषमायाः। कथमन्यथा शरीरसंपर्कादेव मूर्छां
जनयतीति गरलमिव मन्यत इति भावः। तथा च। दुःखितस्य विरहिणो हि सुख
हेतवोऽपि दुःखायैव भवतीति ध्वनितं। विरहोत्कंठयेन स्मरणरूपां दशांच प्राप्नोति।
यदुक्तं शृंगारतिलके। शेषा यत्रान्यकार्येषु तदेकाग्रं च मानसं। श्वासैर्मनोरथैश्चापि
चेष्टा तत्स्मरणं यथेति। इंदुनिंदति। पद्मकंदलदलीतल्पं नवा मन्यते कर्पूरं किर
ति षयात्ति नरति प्रालेयधारागृहे श्वासैः केवलमेव खिद्यति तनूजाताप्यसौ
बालिका यत्कोपि युवा सखि स्मरसरवश्चेतस्य मुष्मिन् स्थितः। व्यालो भुजं
गमे क्रूरे श्वापदे दुष्टदंतिभीतिविश्वः। गरलं तु विषे नागे गरलं तृणपूलके ति॥१॥

अविरलेरेति। स्वकीये हृदये मर्म्मणि हृदयरूपमर्मस्थाने सजलनलिनीदलजालं जलसहितपद्मिनीपत्रसमूहं वर्म कवचं करोति। कीदृशं। विशालं किमर्थमिव। अविरलं यथा स्यात्तथा निपतितो यो मदनशरः। कामबाणः। तस्माद्भवद्वनाय च भवतो रक्षणायेव तस्याः हृदये त्वं सर्वदा तिष्ठसि अतो अविरलनिपतद्भिर्मदनशरैस्ते पीडा माभूदिति कमलिनीपत्रैः सन्नाहमिव करोतीति भावः। केचित्तु कीदृशं वर्म। अविरलनिपतितान्मदनशराद्भवनाय रक्षणाय भवदिव संपद्यमानमिवेति व्याकुर्वंति। भवतो रक्षणे प्रीता विचिंत्य प्रकारश्च। व्यथासहस्थलं ममेत्यपि विशालं विस्तीर्णमपि भवद्वनायेति प्रथमव्याख्याने सख्यास्नेहाधिक्यं सूचितं

अविरलनिपतितमदनशरादिव भवदवनाय विशालं। स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालं॥ धा कुसुमविशिखशरतल्पम नल्पविलासकलाकमनीयं। व्रतमिव तव परिरंभसुखाय करोति कु

तेन दूतिकर्मकुशलत्वमपि कथितं॥ धा कुसुमेति। सा कुसुमशयनीयं पुष्पशय्यां करोति रचयति। कीदृशं। अनल्पविलासकलायां बहुनक्रीडाकलायां कमनीयं कांक्षणीयं। एवंभूतावस्थायामपि त्वदागमनाशया अनुरागयत्नेन कुसुमशय्या मारच्य्य त्वन्मार्गं तद्दृष्टिरेव तिष्ठतीति भावः। किमिव। कुसुमविशिखः कामः तस्य ये शराः कुसुमरूपा। तेषां मल्पं शय्या यत्र तादृशं व्रतमिव। किमर्थं तव परिरंभसुखाय आलिंगनसुखप्राप्तये। तल्पं तु शयनीये स्यात्तल्पं मदृकलत्रयोरिति विश्वः। एभिश्चिह्नैः पदैरुद्वेगाख्या पंचम्यवस्था कथिता। सुखस्पर्शं पुष्पमपि बाणतुल्यं भवतीति ध्वनितं। अथवा सा अनल्पविलासकला कमनीयं कुसुमशयनीयं तव परिरंभसुखाय कुसुमविशिखशरतल्पं व्रतमिव करोतीत्यर्थः॥ धा वहतीत्यादि सा उदारं सुंदरं मानकमलं मुखपद्मं वहति। धारयति। प्रेमामृतोऽयं दानं तेन उदारमिति वा। कीदृशं। चलितेन मार्गप्रेक्ष

णायतिर्यक्ष्रा। सा रित्ते विलोच्चने नेत्रे एव जलधारो रसवर्षिणो मेघे यत्र तादृशं। तत्र नि
रंतराश्रुवर्षित्वेन नेत्रयो जलधरत्वेन निरूपणं कमिव चंद्रमिव। कीदृशं। विकरा
लाः विशालाः वा यो विधुंतुदस्य राहोर्दंतास्तैर्यद्दलनं पीडनं तस्माद्गलिता प्रच्युता
मृतस्य धारा यतः तादृशं। अत्र मुखस्य विधुना। नेत्रजलस्य चामृतधारया सादृश्या
द्वाक्योपमा बाध्या तथा चानेनैव वेण्या इति ध्वनितं चिकटः सरे प्रोक्तो विशाल वि
करालयोरिति विश्वः। नमस्तु राहुः स्वर्भानिसैंहिकेयो विधुंतुद इत्यमरः।४।। वि
लिखतीति। किंच रहस्ये कानेकुरगमदेन वस्तूर्याभवंतं लिखे

वहति च वलित विलोचनजलधरमाननकमलमुदारं। विधुमिव वि
कटविधुंतुददंतदलनगलितामृतधारं।।५।। विलखति रहसि कुरंगमदे
न भवंतमसमशरभूतं। प्रणमति मकरमधो विनिधाय करे च शरं नवचूतं।।६।।

ति। कीदृशं। असमशरभूतं कामरूपिणं तेऽधः आसनस्थाने मकरं विनिधाय करे तव क
रे नवचूतं नूतनाम्रमंजरीरूपं शरं बाणं च विनिधाय प्रणमति नमस्करोति। मकरवाहनस्त्व
मेव मां किमिति संतापयसीति प्रणम्य प्रेष्ठं त्वां याचते इति भावः। तथा च वाहनारूढ प्रियत
मः शीघ्रमागमिष्यतीति वाहनं लिखितमिति ध्वनितं विरहिणी व्यापारश्च कथितः
न दाहभरतः। देवतापूजनं कुर्याद्विधाद्गलिभुजे बलिं। लिखेत्कांतप्रतिकृतिं पाठयेच्छुकसा
रिकाः। गणयेच्चावधिदिनं गीतं गायेत्तदाश्रिकं। एवंविधवियोगेन नयेत्कालं वियोगि
नीति। मृगनाभिर्मृगमदः कस्तूरि गंधकोरवरेति हारावली। यद्यपि वियोगिन्याः का
ममूर्तेर्लेखनं न घटते तथाप्यत्र श्रीकृष्णस्य कंदर्परूपत्वात्तदाक्रांतचित्तत्वेन तद्रूपेण
लेखनं।।५।। प्रतिपदमिति। प्रतिपदमितस्ततश्चलंती पदं पदं प्रतिवचनं प्रतीत्तिवा
रतिनिगदितिजल्पति। हे माधव तव चरणे अहं पतिता त्वां न मामि सद्यः। त्वयि विमुखे

चिक्लिष्टे सति सुधानिधिरपि जमृतविधिरपि चंद्रोपि तनु धां हमखारिसंतापं त-
निते विस्तारयति अतनुदाहं स्मरतापं वा। अतनुयतः स्यात् अथवा तनुदं लक्ष्म्या हं
मायाः लक्ष्म्याः धवः स्वामी चंद्रः समुद्रोत्पन्नत्वात् लक्ष्म्याः सहोदर इति त्वयि निकट-
स्थिते सति लक्ष्मी सपत्न्यपि मे किमप्यपकर्तुं न शक्नोति त्वयि प्रातिकूल्ये च सति स्व-
गिनी सापत्न्यं मयि स्मरन्‌ सुधानिधिरपि मे तनुदाहं तनुत इति माधवपदेन ध्वनि-
तं सुधानिधेः तापकारित्वं विरुद्धमिति विरोधनामायमलंकारः॥ द्वौ॥ ध्याने त्यादि। अ-
तिन्यायेन दुःखेन प्राप्यं अतीव दुरापं भवंतं ध्यानलयेन एकाग्रतया परः परिकल्प्य
अग्ने लिखिता। अथवा। अतीव दुरापं भवंतं दोस्यादिना अतीव दुर्लभं त्वां। ध्यानलये
न। ध्यानं चिंतनं तत्र यो लयः तत्परत्वं तेन पुरोग्रे परिकल्प्य साक्षात् त्वं प्रथमपक्षे तु
विलिखति रहसि स्फुरत्वात् पुनः कल्पना॥ सा विलपति। कुत्रापि तु

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं। त्वयि विमुखे
मयि सपदि सुधानिधिरपि तनुते तनुदाहं॥ द्वौ॥ ध्यानलयेन पुरः परिक- ॥०॥ पद
ल्प्य भवंतमतीव दुरापं। विलपति हसति विषीदति रोदिति चंचति मुंचति

स्वजं वचः॥ ८॥ इयत्काले यदर्थं विलंबितोसि तत्रैव गच्छेत्याप्युत्का हसति उपहसति। वि-
षीदति। पुरःस्थितोपि चरणौ गृहीत्वा नानुनयति। सर्वे विषादं प्राप्नोति। पुनः कथमयं
वश्यः स्यादिति रोदिति। तदुक्तं। रुदितमुत मन्त्र योषितां विग्रहे स्थिते। चंचति चाटु कि-
भिरनुसृतं दृष्ट्वा गच्छति। पश्चादनुनीयालिंगिता तापं मुंचति। स्वविश्लेषदुःखं त्यजति।
यद्वा। रोदितिपश्चादनुनयंतं प्रणयरोषान्मुंचति तिरस्करोति अत एव तापं वंचति तापं प्रा-
नोति सर्वः। अलंकारोत्र दीपकः। बहतीसारभ्य उन्मादावस्था कथिता तदुक्तं। श्वासप्ररोद-
नोत्कंपवसुधाल्लषणैरपि। व्यापारो जायते यत्र स उन्मादः स्मृतो यथा॥ किल किंचिताख्यश्चा-
यं भावः तदुक्तं दशरूपके। क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिंचितमिति। अलंकारलक्ष-
णं काव्यप्रकाशे। सैव क्रिया सु बह्वीषु कारकस्येति दीपकः। अस्यार्थः। बह्वीषु क्रियासु कारकस्य

वसहते गदीपक इति ॥६॥

श्रीजयदेवेति। श्रीजयदेवेन भणितं यदि मनसा नटनीयं अभिनेतव्यं भवनया
स्यादनीयमित्यर्थः। तदार्द्रैः कामस्तं ददातीती दं श्रीकृष्णेनादृत्य। भिलाषप्रदमित्यर्थ।।
अतएवाधिकं कं सुखं अधिकस्य वर्तमाना। हरिविरहाकुलाया बल्लवयुवतिः तस्या
यासखीदूतित्वेन प्रेषिता तस्याः कचनं पठनीयं।। ०॥ नितिं ईे अष्टमप्रबंधः।। ८।।
सात्वां विनो कुत्रापि निवृत्तिं न लभत इत्याह। आवासेति। त्वद्विरहे साहरणी रूपायते
मृगीरूपमिवाचरति। विश्लेष व्याधिजनित पांडुवर्णो हरिणीरूपमिवाचरतीति वि
श्लेष आधिजनित पांडुवर्णा हरिणीरूपेणोपमीयते। तथाच। यथा मृगाधू वने
समंतात्सदीप्तदावाग्नि ज्वालोद्विग्ना व्याघ्रेण त्रासिता। अग्रे व्या

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयां। हरिविरहा
कुलबल्लवयुवतिसखी वचनं पठनीयं।। ०।। आवासो विपिनायते
प्रियसखीमालापि जालायते तापो विश्वसितेन दाववदहनज्वाला
कलापायते। सापि त्वद्विरहेण हतहरणीरूपायते हा कथं कंदर्पो
पि चकैंलायमानये विरचयन् शार्दूलविक्रीडितं।। २८। ५६

धजाले वितते पतयंती। दश्यादिशाः चकितचकिता विलोकमाना कापि त्राणं न लभते तद्व
त्। तदेव दर्शयति। आवासो मंदिरं विपिनायते अरण्यवदाचरति। प्रियः सखीपंक्ति
र पि जालायते। वियोगदुःखासहिष्णुतया प्राणमपि त्यक्तुं प्रवृत्तायाः तद्रोधकत्वा
त्। यद्वा। तापस्यास्यर्थे प्रियसखीदत्तामालापि ज्वालायते। यथा हरिणीबंधनार्थ जा
लं क्षिप्यते। तद्वदाचरति। तापो विरहजनितः संतापो विश्वसितेन निःश्वासेन साह
येन श्वासवायुना वनाग्निज्वालावलीवाचरति। एवं खेदमभिनयं स्याह। हा हा कष्टं
सा कथं वर्तते। यतः कंदर्पोपि शार्दूलविक्रीडितं विरचयन् कृतांतवदाचरतीति।

हा कथं परमानंदजनकोपि कामस्त्वदिश्लेषे विपरीतमिव चरति हरिणीशब्देन एवंभूतायामवस्थायां मसख्याः मृग्या इव लक्ष्या पि स्नेहाधिक्यमिति ध्वनितं। शार्दूलविक्रीडितं छंदः।२८। प्रथमपदे तद्धगाख्यावस्थाविशेष अष्टमी व्याधवस्था केथिता। तल्लक्षणं। अभिष्टसंगमाभावाद्व्याधिः संतापलक्षणः। अत्र संताप निःश्वासो शीतवस्तुनिषेधनं। नोत्तरं भाषते प्रश्ने नेगतेन श्रृणोतिचेति। तदेव गीतेन प्रपंचयति। स्तनविहितमपी गीतस्यास्य देशाख्य रागः। तस्य लक्षणं। आस्फोटनाविष्कृते रामहर्षाविनि।

स्तनविनिहितमपि हारमुदारं। सामनुते कृशतनुरतिभारं॥१॥

राधिका विरहे तव केशव॥ ध्रुवपदं॥

युद्धसन्नधविशालबाहुः प्रांशुः प्रचंडद्युतिरिंदुगौरो देशाख्यरागः किल मल्लमूर्तिरिति। एकतालीतालश्चलक्षणः गीतास्य स्तु। हे केशव तव विरहे सा राधिका अनुकंप्या राधा। स्तनविनिहितमपि स्तनयोरुपरि धृतमपि उदारं मुनोहरं संभोगादौ स्वागसंसर्गित्तियादेत्तं हारं। अथवा। पूर्वं येन स्वकंठधृतेन तव संगमः प्राप्तस्तं अत एवोदारं बहुप्रदमपि अतिभारं मनुते। तत्र हेतुः कृशतनुर्यस्या इति। अति कृशैयासखीजनैः प्राणरक्षार्थं वक्षसि समर्पितं तद्धारणे अशक्या सा त्वया प्राणनीयेति भावः। अत्तेन कार्श्यरूपो व्याधिरुक्तः। कृशतारूपोनुभावश्चायं। तथा चार्कं सुखं तस्येशो नियंता केशः सर्वेषां सुखप्रद इत्यर्थः। कं अमृतं मृतयुतिजीवने तद्रूपः केशाश्वासो वश्च केशवः। एतादृशेन त्वया एवंभूता प्रणयिणी मत्सखी दुःखिता भवतीत्यनौचित्यमिति केशवेति संबोधनेन ध्वनितं॥१॥ सरसमिति। अपि च सा मलजपंकं चंदनद्रवं वपुषि दे

हेसद्गाकं यथास्यादेवं विषमिवपश्यति। कीदृशं। सरसमसृणं स्निग्धार्द्रमपि। सृणो कर्कशोस्निग्धेति मेदिनीकारः। पंकः कदर्पमपाएयोरितिविश्वः। सरसः सोद्बोधकइतिवा॥२॥ श्वसितपवनं श्वासवायुं वहतिधारयति। कीदृशं। अनुपमं परिणाहं उपमारहितः परिणाहो दैर्घ्यं यस्य तं कमिवा कामाग्निमिव। कीदृशं सदाहं। सदाहं यथा स्यात्तथा वहतीनिवा॥३॥ दिशिदिशीति। सादिशिदिशनयननलिनं नेत्रपद्मं किरतिक्षिपति। कीदृशं। सजलकणजालं जलकणजालैरश्रुजलकणिकासमूहैः सहितं। किमिव विगलितनालं यस्य एवंभूतं नलिनमिव। आर्यासाश्रुस्थानोद्धृतं निर्भूतमाय

सरसमसृणमपिमलयजपंकं पश्यतिविषमिववपुषिसशंकं॥२॥ श्वसितपवनमनुपमपरिणाहं। विरहदहनमिववहतिसदाहं॥३॥ दिशिदिशिकिरतिसजलकणजालं। नयननलिनमिवविगलितनालं॥४॥ नयनविषयमपिकिसलयतल्पं। कलयतिविहितहुताशनकल्पं॥५॥ त्यजतिनपाणितलेनकपोलं। बालशशिनमिवसायमलोलं॥६॥

नयनावलोकनेननस्यक्तनालसजलप्रक्षिप्तपद्मेनोपलक्षितं। तथाचास्नेहास्यनेत्रपद्मेनत्वदागमनमार्गरचनंकरोतीत्यपिध्वनितं॥४॥ किंच किसलयतल्पं नचपल्लवचशायनीयं। विहितोहुताशनस्याग्नेर्विकल्पः संशयो यत्र तादृशं कलयति। किंभूतं नयनविषयमपिदृश्यमपिप्रसक्तोपलभ्यमानमपीनिवा। अथवादृग्गोचरमपि एवंभवतिस्पर्शेकिंवक्तव्यं। तद्विश्लेषमसख्यासक्तशायनादिकमित्यपिध्वनितं। उद्वेगावस्थाचेयंकथिता॥५॥ त्यजतीति। सासायंसध्यासमयेपाणितलेनकपोलंनत्यजति। कीदृशं। अलोलं अचलं दिवसस्तु यथाकथंचिन्नीयते रात्रिस्तुयुगायमानाकथंनेतव्येति। कपोलंपाणिकृत्वासायंचिंतयतीतिभावः। कमिवबालशशिनमिव प्रतिपच्चंद्रमिवप्रतिपदि ग स्याद्दृश्यते। अथवा द्वितीयाचंद्रमिवमुख्याक्षियकरतलकतत

या। अर्धस्पृश्यमानतया विरहेण पांडुतया सायमुदयेनालोनयास्त्वालेन च द्युतिर्तायाश्चंद्रसा
म्यं। इयं च जडावस्था। तदुक्तं। मंत्र ध्यायति निःसंज्ञं जडता सा प्रकीर्त्तिता। अत्र स्पर्शानि भिज्ञ
ले विवर्णयन्निश्चिलांगता। अकांडहुंकृतिस्तंभनिश्वासकृशतादय इति॥ हरि हरि इति। सा
निकाम मन्नितरायेन हरि हरि इति हरि इति जपति केवा विरहेण त्वद्वियोगेन विहित मारभ्रंमर
णं यस्याः सेवा। कथं यथास्याः सेकामं सा भिला र्घा इवकृमादृशाम्यवस्थांयां प्राप्तायामपि
सा भिलाषमिति। तवानुरागं कुर्वाणा भिन्ने व शरीरे तव संगमामृतं कायय मा णा चि
तामणिरूपस्य सर्वस्वभूतं तव मंगलरूपं नाम जपति। परमेष्टमंत्रवदावर्तयतीत्यर्थः।
मनोहर गुणविशिष्टत्वाद्धरि हरि इति अखिलक्लेशाहरणाद्वा। अत्र प्रासभावे। अन्यथा ज
न्मांतरे स एव वल्लभो भूयात्। अंते मतिः सा गतिरिति न्यायात्। एवम॥

हरि हरि इति हरि इति इति जपति सकामं। विरह विहित मरणेव निकामं॥ ७॥

नुरागेदशावस्थाः कथिताः। तदुक्तं। अलोकालापसंभूढरागाकुलितचेतसोः तयोर्भवि
दसंप्राप्तौ दशावस्था स्मरोयथेति। अभिलाषोथ चिंतास्यी स्मृतिश्च गुणकीर्त्तनं। उद्वे
गोथ प्रलापः स्यादुन्मादो व्याधिरेव च। जडता मरणं चेति दशमी जायते क्रमात्। असंप्रा
सोभवस्थला स्तयोर्दशा दशायथेति श्रृंगारतिलके। अत्र तु निसानंदरूपयोः मधुररस
विग्रहयोः नवावस्था एव संमताः। अनुरागकाष्टांदर्शयन्नूतदाभासो त्रदर्शितः। साक्षातुके
षव। श्रीकृष्णस्य माधुर्यभरदर्शनाय ऐव शुकादिभिस्तादशजनेन निरूपितं। तेन नवा
नामिह लक्षणं कृतं। तत्र व्याधिलक्षणं। संतापवेदना प्रायो दीर्घश्वाससमाकुलः। तनू
ततनुर्व्याधिरष्टमो जायते यथेति। शेषाणां भिदा पूर्वमेव दर्शिताः। यद्यपि कटुपरिणामा
इव एते प्रभासंते तदप्यानंदरूपानुरागमूलत्वात्परमानंदनिधानश्रीमद्भगवदाश्रय
त्वात्। चमत्कारि महानंदरसविकारित्वाच्च नतोष कत्वाच्चानंदसंदोहा एव चैते भावा इ
ति सिद्धांतः। वस्तुतस्तु न दुःखमयाः। ७। श्रीजयदेति। इत्यमुना प्रकारेण श्रीजयदेवभ

णितं श्रीराधिकासख्या गीतं श्रीकृष्णं प्रत्युपनीतं प्रापितं केशवपदं सुखयतु त्वरया
श्रीराधायाः स्मरणेन श्रीकृष्णस्य चरणं प्रति नीतं विदधातु। अथवा। यत् सख्याः श्रीकृ
ष्णं प्रति कथितं तदेव श्रीजयदेवेन रागताला दिना बद्धं गीतं गायतां शृण्वतां सुखयतु
केशवपदं उपनीतं समर्पितं। केशवस्य पदस्थानं वैकुंठलोकं तत्रोपनीतं वा वैकुंठ
लोके तु गीयत इति भावः। अथवा उपनीतं उपस्थितं तं गीतं केशवपदं केशवः पदं
स्थानं त्राणं वा यस्य स वैष्णवः तं सुखयतु। केशवस्य पदस्थानमिति वा पदस्थान
चनाकयं च संनिधि व्यवसाययोः। त्राणेपि पदमाख्यातमिति विश्वः॥८॥ एवं दश
व्यवस्थापर्यंतं विरहाद्रेकं श्रुत्वा निरूपाय मत्स्य स्यं च कितं चितं प्रत्याह। हे स्वर्वैद्य
तिमास्वर्वैद्यः धन्वंतरिः संप्रति मां प्रति बिंबियस्य तादृशरूपश्याधिभिर्विरहव्या
धिर्चिकित्सकत या त्वं प्रसीदसि प्रसन्नो भवसि तदा एता च स्यत नु ज्वरे

श्रीजयदेवभणितमिति गीतं सुखयतु केशवपदमुपनीतं॥८॥ राधि॰

कामसंतापो साचरतनुः तत्थोगा। सौदयदिविः श्रेष्ठतनु यस्याः सा तेरसान्तू संभो
गशृंगाररसरूपाधरामृत संजीवन महौषधा किं न जीवेदपि जिवेदेव। अन्यथा त्वद्र
सव्यतिरिक्तत्वेन तयाहस्तको पि सक्तप्रायो भविष्यतीत्यर्थः। संप्रति मूर्च्छ्यां चक्रु मपा
रयस्यातयाहस्तकेनत्सुखवपुव्यवहिते। तं संगमाभावसोपि सजतीति भावः। अथवा।
अन्यथापरोहस्तकः हस्तः क्रियाप्रकारः वैद्योपचारः स कः इत्यर्थः। कृचिवतोन्यथानां
तकइतिपाठः। तदा अन्यथा यदि न प्रसीदसि तदा त्वत्तः तवापेक्षया न कोन्योपि त्वमेवात
कईत्यर्थः। तदेव कामन्त्वरजनितचेष्टितमनुवर्णयति। सा रोमांचती सादिरोमाचति
पुलकोद्गमयतीत्यर्थः। सीत्करोति सीत्कारोति सीत्कारनाञ्चमनुकरोति। मामिला सरोमा
दमोद्गमन कंठध्वनि करोतीत्यर्थः। विलपति राधानामिलितः इत्यादि विलापं करोति

तक

विशेषणो कंठ्यास्वद्गुणानुलपयति कथयतीतियावत् पुंथेमयस्य विश्लेषसोढव्यः
तिकंपयुक्तोसती तांपेतिलग्लाना भवति अनन्वेपधुर्ने वेण्य रूमश्वसा सिकः कथितः।

ध्यायत्ति कम्पं लभ्यते ज्ञि चिन्तयत्ती त्तीव्रचितया उद्गमात्ति उद्गमं करोति

अनेनउन्मादः कथितः॥ तस्यचिह्नाणानि॥ प्रमीलती बालप्रक्रमेण चक्षुर्मीलितं कृत्वा
त्वयिमनो धारयति॥ हृदि स्फुरितिउपाति गच्छति॥ कौसुमेने क्षीणतयाप्रमतति
लेय्य प्राप्तेमूर्छांप्राप्नोति॥ अनेन मूर्छिकथिता॥ अपिशब्देन एतावस्थामप्यवस्था
यां सकलगुणगणालयं अशेषनायकशिरोरत्नं त्वामेव परमरसज्ञा सा पुलकादि
भिः सात्विके सीत्कारादिभिरनुभावे श्चितनादिभिर्व्यभिचारिभिरभिलाषाधवस्था
भिश्च संगारसोदयेन कामयते॥ सा सर्वथैव त्वया प्राणनीया॥ तथा च तस्याः संगमेद्र
न मधुररसोत्सवः॥ आस्वादनीयइति॥ भावः वरतनुरनेन त्वयापितद्विरहं सोढुमशक्या
क्यइति ध्वनितं ज्वरव्याधावेवं विधानि लक्षणानि भवंती॥ ति॥ शीतादिना रोमाचति

सा रोमांचति सीत्करोति विलपत्युत्कंपते तान्यति ध्यायत्युद्भ्रमति प्रमील
ति पतत्युपाति मूर्छत्यपि॥ एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं तेरसात्स्ववै
धप्रतिम प्रसीदसि यदि त्यक्तोन्यथा हस्तकः॥ स्मरातुरां दैवतवैद्यहृद्य
त्वदंगसंगामृतमात्रसाध्यां॥ विमुक्तबाधांमुचेद्र वज्रादपि दारुणोसि॥ ३०॥

लपति मोहात्किंचिद्वदति॥ कंपयुक्ता भवति चिंतयति॥ कथंजीवामि॥ सादित्रमचि
ग्लानिमाप्नोति॥ अबलत्तया क्षितिं निमीलति भूमौ लुठंति॥ दाढ्येन वाते नोद्भ्रछति
मूर्छाप्राप्नोति एवं विधेपिज्वरे महावैद्य प्रमुक्तसिद्धरसा जीवदेवान्न थात्वसंगम
रसादस्यापि जीवनमित्यर्थः॥ क्रियादीपकोयमलंकारः शार्दूलविक्रीडितं छंदः॥
अपीति ज्ञेयं॥ २९॥ स्मरातुरेति॥ हे दैवते वैद्यहृद्य देववैद्यौ अश्विनीकुमारौ ताभ्यामपि
मनोहरमूर्त भृतयच तिजीवनरसज्ञेति वा॥ अस्माकमिष्टदेवता रूपमनोज्ञवैद्य॥ पुनः
पुनः विरहव्याधेः रक्षणात्॥ ३ पैसमीपेस्मिन्नेव वने नीकटे वर्तमानां राधां कथंभू
तां स्मरातुरां कामेनरुग्णां भग्नां विमुक्तबाधां विगतपीडां नकुरुषे न करोषि॥ इं
द्रवज्रादपि दारुणोसि कठिणोसि॥ अथवा हेउपेंद्र

वज्रेणाप्यनुपाक्यं कर्मयेन त्वया साध्यते। अतः स्वरक्षणार्थमिंद्रेण त्वं नुतः। तेन वज्रादपि क
ठिनदुःसाध्यः। नन्वौषधं विचार्य संपादनीयं किमेवत्वमुपालभ्यसे आह। त्वदंगसंग एव य
दमृतं परमानंदरूपं जीवनौषधं तन्मात्रसाध्यं नदकंप्रतीका। अथवा त्वदंगसंगः त्वचा
गसुखमिति वा संगसुखं तथासक्तिरिति रत्नकोशः। उपेंद्रवज्रा नाम एतत्छंदोपि॥ २॥ न
नु या च दहमागमिष्यतां च छीतोपचारैरुपचर्यैतामिसत आह। कंदर्पेत्यादि। आहो अश्च
र्यं आस्याश्चमेतां श्रितं चंदनचंदमकमलिनीचिंता सुमलयजसुधांशुपद्मिनीस्मरणे
पि संताम्यति ग्लानिं प्राप्नोति। तत्रापि चिरं। किं

कंदर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमः
कमलिनीचिंतासु संताम्यति। किंतु क्लांतिरसेन शीतलतरं त्वा
मेकमेव प्रियं ध्यायंती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति

भूतायाः कंदर्पज्वरेण यः संज्वरः संतापः तेनातुरतनोर्व्यथितदेहायाः विरोधोयमलंकारः
न त्वेतादृशसंतापेन कथं जीवतीति। अन्यदप्याश्चर्यं महत्। किं त्विति। रहस्येकांते स्थिता
त्वामेकमेव प्रियं एवा द्वितीयं अन्यनिरपेक्षमित्यर्थः। प्रियं मा त्वमेव वल्लभं अत एव क्लां
तिरसेन शीतलतरं अननुभूतपूर्वतापेन अतिशयेन शीतलं तथाभूतमपि त्वामेव एक
मेव प्रियं अन्यवल्लभामिनिवां ध्यायंती कथमपि महता कष्टेन क्षीणा कृशा क्षणं प्राणि
ति क्षणमात्रं जीवंति। अस्मान्नेव क्षणे त्वया तत्समीपे गंतव्यमिति भावः। पुनस्तस्याः द
र्शनमपि ते दुर्लभमिति त्वरयति। अथवा। क्षणं प्रतिक्षणं ध्यायंतीति योज्यं। यस्य चिं
तनेन जीवति। तस्य दर्शनेन निरुजा भविष्यतीति किं वक्तव्यं। शीतलात्ताम्यति जीव
ति चेत्याश्चर्यं दर्शितं। क्लांतिवशेन शीतलतनुमिति पाठ क्लांतिवशेन श्रमाधिनाद्दनह

प

प्रभो॥ क्लांति चक्रोन्निति वारुनः सूर्यन्नपेपस्यावितिविश्वः। श्रीन्नलीकामज्वर जनितसंतापहरात् नु यस्य नामितिज्वरे विरुद्धवीतलापपिजीवती त्याश्चर्यं त्वं शार्दूलविक्रीडितं छंदः॥३१॥ पुनरपि तद्दीपनविभावेन चिरहोद्रेकमाह। ययोश्रीराधयोत्तवसंगमेपि ते विरहः क्षणमपि न सेहे न सोढः। कथंभूतयानयनयोयन्निमिलितं निमेचत्ते न खिन्नया खेदयुक्तया। किमिति धात्राचक्षुषो निमिषः सृष्टो यतः प्रियतमावलोके प्रस्त्रहो भवतीति तदुक्तं। जतदीक्षतां पक्ष्मकृद्वन्नामिति। सा सो चिरविरहेण रसालस्यान्नस्य तत्र खां पुष्पितोग्रभागो यस्यास्तां दृष्ट्वा वसत्ते कथं श्वसिति।

क्षणपि विरहः पुरा न सेहे न यन नि मीलन खिन्नयायया तेऽश्वसिति कथमसोरसालत्राखं चिरविरहेण विलोक्य पुष्पिताग्रां॥३॥ वृष्टिव्याकुला वनरसादुधृतगोवर्धनद्विषत्रबल्लववल्लभाभिराधिकानंदाच्चिरं चुंबितः। दर्पणेव नदर्पिताधरतरीसिंदूरमुद्रांकितो बाहुर्गोपतनोतु भवं

केन प्रकारेण जीवेत् दुःखचलितानि निःश्वसितानि वहतीमिवा। छंदोपि पुष्पिताग्रा नामकमिति॥३॥ वृष्टिव्याकुलेति। कंसद्विषः श्रीकृष्णस्य बाहुः भवतः श्रुष्कन्नो श्रेयांसं कल्याणानि तनोतु विस्तारयतु। अन्योपि वस्त्रो। नैदि सितं प्रयच्छतीति बाहोः कर्तृत्वया मर्ध्यसूचनार्थमत्र कंसद्विट्पदोपादानं। कथंभूतस्य गोपतनोः परमोदारश्रीगोपराजकेलोमन्नस्य दातृत्वे दंत्रायिति। उध्दृत्य गोपवर्धनं गिरिं विधृत्य तु। कुतः वृष्ट्याव्याकुलं यद्गोकुलं तस्य यदवनं पालनं तत्र रसोरागो वा यच्चात्तस्मात्। कथंभूतो बाहुः। बल्लववल्लुवाभिः तत्प्रियाभिः। अधिकानंदाच्चिरं चुंबितः। पुनः कीदृशः दर्पेण सोऽधरतटप एव सिंदूरद्रकास्ताभिरितिवा॥ शार्दूलविक्रीडितं वृत्तं॥ इति श्रीगीतगोविंदे नवमप्रबंधः॥९॥ श्रीगीत॰ त्निग्धं मधुसूदनो नाम चतुर्थ॥४॥

टी॰॥ श्रेयांसि कंसद्विषः॥३१

गीत०
५०

पूर्वसर्गे श्रीराधायाः प्रेमचेष्टितं निरूप्येदानीं पञ्चमसर्गे श्रीकृष्णचेष्टितं वर्णयति। तत्र प्रियाः चिरहं चरितं अश्रुताताप भिसख संकेतनिकुंजे स्थितः स सापराधया राधया क्रमनेहृदयः स्वयमगच्छन् विरहदुःखानि वेदनानुनीयानीसता मितिसखीमहितवान्। अहमिस्यादि। इति मधुरिपुणा एवं प्रकारेण स्वयं नियुक्ता आज्ञप्ता सखी एत्य राधां इदं वक्ष्यमाणं जगद तवाचा स्वयं मधुरिपुणेति यातिसरः कथितम् इति कांत्व राधायाहि गच्छ मद्वचनेन सा मनुनीय। मनु सा मानवती स्वयमेवागत्वा अनुनीयतो कृतापराधेन मया क्षौसो वक्तुं न शक्यते अतस्त्वं अनुनयेति भावः। चानयेथाः म सीमीप मानय। ननु कदाचित्सा यदि आयास्यता चपलस्त्वं न लज्जसे चेत तत्र दैन्य माह। अहं तदेकनिष्टः इहैव तां बहुकालं मतीक्षमाणास्तिष्टामी ति॥२४॥ यत्सौसे जगद तदेव गीतेन कथयति। वहतीत्यादि।

अहमिह निवसामियाहि राधामनुनय मद्वचनेन चानयेथाः इति म
धुरिपुणा सखी नियुक्ता स्वयमिदमेत्य पुनर्जगाद राधां॥३४॥ वहति म
लयसमीरे मदनमुपनिधाय। स्फुटति कुसुमनिकरे विरहिहृदयदल
नाय॥१॥ तदविरहे वनमाली सखिसीदति॥ ध्रुवपदं॥

गीतस्यास्य वराडीरागः। रूपकतालः। रागलक्षणं तु। विनोदयंतीदपितं सुकेशी सुककणाञ्चामरचालनेन कर्णे दधाना सुरपुण्यगुच्छं वराङ्गनयं कथिता वराडी ति। उद्दीपनविभावैः विरहोद्रेकमाह। हे सा। वनमाली श्रीकृष्णस्तव विरहे त्वद्वियोगे सीदति अवसानो भवति। सुरतो सवे बहुयनादिभिः प्रासां त्वदंगसंसर्गिणी मालां धारनूलथि ध्रवणः सीदत्यत स्व मभिसरेति वनमालीपदोपादानं। अथवा सकान्यसगः तव संकेतमनोरमनिकुंजे वनमालाचितीयावतति अतो वस्य गंतव्यमिति भावः। ध्रुवपदं। कं सति। मलयसमीरे मलयाचलसंबंधि वात वहति। किं कृत्वा मदनं कामं उपनिधाय समीपतिनक्ष

५०

दहतीति। किंच द्विजाधिरमयूखे हिमकरे दहति सति संतापं जनयति सति मरणमनुकरोति। दशाम्यवस्थाजनितपीडामनुभवति। मुरचानुभवेति तिरस्कृतश्चंद्रः समस्तजनसंतापहरोपि ल[?]द्विश्लेषेण [?]स्सर: दहतीति भवः। अनुकरोतीत्यनेन अनिष्टं वारितं। दशाम्यवस्थासदृशीं पीडामनुभवतीति त्वत्प्राप्त्याशया कष्टेन जीवितं धारयतीति सर्वः। अथ च मदनविशिखे पतति सति कामबाणे मारयति सति विकलतरोति विलपत्यनेन्यायेन विलापं करोति। हा प्रिये कासि रक्ष रक्षेति। २। किंच मधुपसमूहे मधूपिबंतीति मधुपा भ्रमरास्तेषां समूहे ध्वनति गुंजति सति श्रवणं कर्णांचपिदधाति हस्ताभ्यामाच्छादयति। एतेपि कामानुगाः मधुपानेन मत्ताः कामजयघोषं उद्घोषयन्ति अतस्त्रस्तः कर्णमुद्रणं क

दहति शिशिरमयूखे मरणमनुकरोति। पतति मदनविशिखे विलपति विकलतरोति। ३। ध्वनति मधुपसमूहे श्रवणमपिदधाति। मनसि वलितविरहे निशि रुजमुपयाति। ४। वसति विपिनविताने त्यजति ललितधाम। लुठति धरणिशाय

दिविषयत्यागं न त्वामेवाहनिशं कामयत इति भावः। महामधुरमोहनं ते वचनामृतं निपीयकेनान्यत्राब्दः श्रुतिगोचरः क्रियते इति वा। ननु दिवा दृष्टिश्रुतिनोर्द्विगतसक्तेन्द्रियविषयः हृदि रात्रौ सुरपि स्यात्तत्राह। वलद्विरहयुक्तेन मनसि रात्रौ अधिकपीडामुपयाति प्राप्नोति निशि विरहव्याधेरुद्रेकात्। निशीति तदुपलक्षित्प्रायेण क्षणस्यापि युगायमानत्वात्। ५। वसतीति। ननु बोद्धुभिरपेक्षितो सौ तैः कथं न सुखी क्रियते तत्राह। ललितं मनोहरं धाम पितुर्व्रजराजस्य व्रजरूपं स्थानं गृहं वा त्यजति जहाति। विपिनविताने वनविस्तारे वसति संतिष्ठते। सकलजनपरित्यागेन योगीव कांतारे निगूढं वसतः नैकुतः सुखमिति भा। अथवा धामशरीरं आखिललावण्यास्पदं श्रीविग्रहमपि त्वां विना नानात्त इत्यर्थः। धामदेहगृहरश्मोस्थानेजन्मप्रभावयोरिति विश्वप्रकाशः। धाम शब्दार्थानु सर्वानपि त्यज तीति ध्वनितं। ननु किं प्रमाणं मय्येवैतावती प्रीतिः तदनुभा

101

वेनदर्शयति। सतवचवल्लभः धरणिशयने भूमिशय्यायां लुठति। त्वच्चरणारविंदमकरंदसं
सिक्त श्रीवृंदारण्यभूमौ लुठनं करोति। अपिच। तव नाम। हे प्राणेश्वरि प्रियेराधे इति। ए
वं बहुवारं विलपति विशेषेण लपति अन्यसाधनं साध्यं सत्त्वदेकनिष्टः त्वयानंदानी
यतिभाव:।४। भणतीति। कविजयदेवे भणति कथयति सति विरहविलसितेन वियो
विलासेन हरिः उदयतु अविर्भवितु अर्थात् गायतां शृण्वतां मनसि। कीदृशो मनसि रभ
सः प्रमोत्साहः तस्य विभवः प्राचुर्यं यत्र तादृशे। केन सुकृतेन सुदृभगवदाराधनभूतान्च
रणं सुकृतं तेन। अथवा शोभनयज्जयदेवकृतं गीतितेन। परमप्रेष्ठदःखश्रवणामहि
षणातयाकुलचित्ता श्रीराधां दृष्ट्वा सखीस्थ गितवाक् वभूवेति पंचपदीयं दशामी॥५॥
इतिश्रीगीतगोविंदे दशमप्रबंधः॥१०॥ ॥पूर्वं यदुक्तं त्वदेकनिष्ठ॥ ॥ ॥

भणंति कविजयदेवे विरहविलसितेन। मनसि रभसविभवे हरिरुदयतु
सुकृतेन।५॥ पूर्वं यत्र समं त्वयारतिपतेरासादिताः सिद्धयस्तस्मिन्नेव निकु
ंजमन्मथमहातीर्थे वसन्माधवः। ध्यायंस्त्वामनिशं जपन्नपि तवैवालो
पमंत्रावलीभूयस्त्वत्कुचकुंभनिर्भरपरिरंभामृतं वाञ्छति॥२५॥ ॥

त्वामेववांछति। तदेव श्लोकेन दर्शयति। पूर्वमिति। हे सखि माधवः श्रीकृष्णो भूयः पुनः
त्वदीयौ कुंभाविव कुचौ तयोः निर्भरं गाढं यः परिरंभः आलिंगनं तदेवामृतं आमृतवत्स्वा
दु जीवनं संपादकं परमानंदसंदोहलक्षणं वांछति। अनेनामृतरसपूर्णाविमृतमयस्व
र्णकलशाविति ध्वनितं। माधवपदेन पूर्वोक्तिगुणविशिष्टापि त्वया वशीकृतः सन्त्वा
मेव भजत इति तस्याः सौभाग्याधिक्यं सूचयन्नभिसारयितुं त्वरयति। ननु मया कथं वशी
कृतः कथं चेष्टदेवताराधनव्यतिरेकेण परमानंदं कामयते इत्यत आह त्वामेवेष्टदेवतां
मुनिरिव निरंतरं ध्यायन् अपिच। तवालापा एव महामाधुर्यवर्षिणो रहसि संभाषणानि त
एव मंत्रा हृदि मनुरिवावर्तनत्वात्तेषां आवली श्रेणीं जपन्। ननु जपादिकं इष्टदेवतासंबंधि
तीर्थे कृतं झटिति सिध्यतीत्यत आह। निकुंजमन्मथमहातीर्थे मनो मथ्नातीति मन्मथः तद्रूपो

हितादरः मन्मथस्य विलासः साध्यते यत्रेति वा तन्महातीर्थं स्फटति सिद्धकरं च तस्मिन्वस
सन्। महत्त्वं दर्शयति। पूर्वपरा यत्र यस्मिन् तीर्थे त्वया प्राणकोटिवल्लभया सह रति
पतेः कामस्य सिद्धयः आसादिताः प्राप्ताः मंत्रावलीपदोपादानान् मालामंत्रत्वमस्य प्रति
पादितं। तेन सिद्धत्वात् तत्कालफलप्रदानसामर्थ्यं च। निकुंजे स्यनेनापि दुक्तं। स्वप्नप्राप्ते स्त्रि
यां दत्ते मालामंत्रे तथैव च। वैदिकेषु च सर्वेषु सिद्धारीन्नैव शोधयेत्। गृहगोष्ठ च नाराम
नदीनगसुरालये। समीपे वा गुरोस्तस्य सिद्धिः स्यादुत्तरोत्तरेति एवं शब्देन निश्चाद स्थिती।
च सन्निति यावत् सिद्धिस्तावत् स्थैर्यं च। एवं सदैव देवतां ध्यायन् सिद्धक्षेत्रे सिद्धमंत्रान् जप
न् सिद्धक्षेत्रं सिद्धमंत्रान् जपन् अनन्य स्थिरः आशु सिद्धं प्राप्नोतीति ध्वनितं इदं चतुरसोद्बोध
कं वर्णनं चानुयंति यो स्त्र मुख्यः शृंगार एव रसः॥ ३५॥ ॥ ॥ ॥ ॥

रतिसुखसारे गतमभिसारे मदनमनोहरवेषं। न कुरु नितंबिनि गमन
विलंबनमनुसर तं हृदयेशं॥ १॥ धीरसमीरे यमुनातीरे वसति वने वनमाली॥ ध्रुवं॥

एवं स्वविषयकानुरागं कृत्वा प्रसन्नां तां अभिसारयितुं उद्दीपनं विभावं दर्शयतीति श्रीकृ
ष्णस्याभिसारमाह रतिसुखे स्यादिना। गीतस्यास्य गुर्जरी रागः। एकताली तालः। गीता
र्थस्तु। हे नितंबिनि प्रशस्तनितंबवति। हृदयेशं प्राणकोटिप्रियं अनुसर अनुगच्छ। यथा
श्रीकृष्णो न त्वां विना क्षणमपि स्थातुं शक्नोति तथा समर्पितेन वशीकृतचित्तासीति हृदये
शमित्यनेन ध्वनितं। तव हृदयमीशो यस्येति वा। तं तव हृदयानुवर्तिनमित्यर्थः। किंच।
हे नितंबवति मंदगामिन्यास्ते विलंबनमकार्यमिति नितंबिनीति संबोधनेन। अतो ग
मनविलंबनं अभिसारामकालातिक्रमं न कुरु मा कृथाः। कीदृशं अभिसारे गतं अ
भिसार्यते यस्मिन्निति सोऽभिसारः संकेतस्थानं तत्र गतं प्राप्तं। कीदृशेऽभिसारे रतिसुखे

संभोगसुखं संसारमुक्तं यत्र तादृशे। अथवा संभोगसुखाय सारो यूनो सुरतसंपत्तिसंपाद
नेन सर्वस्वरूपेत्यर्थः। कथंभूतं मदनः जगन्मोहनकाः तथापि मनः चित्तं हरतीति तं तथा
भूतो वेषो ऽभिसारोचितमंडनक्रियायस्य तं किं वक्तव्यं मंगसौष्ठवमित्यर्थः। अथवा मद
नं काममनश्च हरतीति तं तथा तं। अथवा। मदनं व्रजांगनानां गं अनोहरवेषं नाटभंजनमूर्ति।
अनेन वीर्यवानिति नायकगुणउक्तः। मदनादपि मनोहरो वेषो यस्य तं तिका। व्रजांगनानां
गत्येन महाचितौं कलाछीघ्रमभिसरणीयमिति भावः। संकेतस्थलं दर्शयति। यमुनाया
स्तीरे वने गहने वनमालीकृतवनमालादिवेषः वसति। अन्योषाभिसारिकाः वंचयित्वा वन
मालाद्वितीयः त्वत्प्राप्तिनिमित्तमात्मानं संगोपयत्य गहने संतिष्ठतइत्यर्थः। वनमालीसने
नालिंगनौत्सुक्यं ध्वनितं। कीदृशे। धीरो मंदः समीरे वायुर्यत्र तादृशे यमुनातीरे वनेस्यने
नत्रैस्यं सौगंध्यं च कथितं। त्रैगुण्यवयुनात्रेषितइत्यर्थः। धीरश्चतुरो वा। भवतां सेवनाय गु
णैः सावधानवृत्ति। धीरपंडितमंदयोरितिदृति क्रवपदं।१॥ ननुकथं मदर्थं सिवाभिसार
तिष्ठति। मय्यनुरक्तश्चेत्तत आह। नामसमेतमित्यादिना। संप्रति तव वल्लभो मृदु अन्या
माजानात्वेवं नामकीर्तनाद्रंचिततया पूर्वमाण वात्कोमलं यथा स्यात्तथा च त्वांध्वनतीये।
नवांनुरागानुभावोयं। अभिसारसंकेतं दर्शयति। हेराधे प्राणेश्वरीति त्वं नाम सहितं यथा
स्यादेवं कृतः संकेतः संगोपनार्थं संज्ञागीतादिना यत्र तादृशं मया सह कृतः संकेतो यत्रे
तिवा तादृशं तवाभिसारायानुनयपूर्वकं वादयतइत्यर्थः। अथवा। नामसमेतमित्या
दिना तव सौभाग्यख्यापनायैव साम प्राणं कोटिवल्लभात दर्थनिवाभिसारे ति छंभी
ति यन्यामायानुसारसमाद न्यत्र मायाः लितिवादयते। किंचनन्विति संबोधने। तेन
नु संगतः खुदंगसंबधीयः स्वल्पमपि संबंधी वायथाकथंचिद्दृस्त्रादि संसर्गवानू
पवनो वायुः तेन स्वभावादेव चलितं ननु तव प्रेरणा तत्रापितवाटव्याः रेणुमपिव

कर्ष

व

हुमनुते। यदृच्छया प्राप्तमप्यिच्छिकं यथा स्यादेवमाद्रियते। धन्योहं तत्संसर्गिमरुता स्पृष्टन
रजसा यत्स्पृश्यते मादृशो जन इति। यद्येवं तथा किं वक्तव्यं त्वदंगमरुतः। तच्चिन्ति
पाठे। हे तनु। हे तान्वि तत्तनूशब्दस्य संबोधने ह्रस्वः। अथवा। पूर्वं बहु मनुते ततश्च तनु
ते तानप्रतानमुद्रया शीतः परमानंदप्रदश्चायं रेणुरिति गायति। अतश्च नलं[illegible]था
भवेदेवमिति क्रियाविशेषणं च॥२॥ किं च तस्य सर्वेंद्रियाणां मनसश्च वृत्तिस्त्वय्य
पिता ऽस्तेइत्याह। पततीति समोहनः परमकोमलपल्लवैः पुष्पदलैश्च परमसुकुमारा
भ्यां स्वकरपल्लवाभ्यां त्वदर्थं शयनं कंदर्पलीलोचितां शय्यां विविधां विचित्रसांगंध्य
संसिक्तोपधानादिभिः रचयति निर्माति। रसावेगेनार्या। सचकितनयनं चंचला
वलोकं सहितं यथा स्यादेवं तव पंथानं त्वदागमनवर्त्म पश्यति। एतैंद्रियाणां तत्सर नचक्षु

नाम समेतं कृतसंकेतं वादयते मृदु वेणुं। बहु मनुते ननु ते तनुसंगत
पवनचलितमपि रेणुं॥२॥ पतति पतत्रे शंकितभवदुपयानं। रच
यति शयनं सचकितनयनं पश्यति तव पंथानं॥३॥

संकल्पिता तदेवाभिनयेन दर्शयति। कथंभूतं पंथानं। शंकितभवदुपयानं। शंकितं भव
त्या उपयाने समीपे गमनं यत्र तादृशं सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः इति भवदिति शब्द
स्य पुंस्त्वं। कसति। पतत्रे पक्षिणि पतति वृक्षाद्वृक्षांतरं गच्छति सति। पुनः कसति। पत्रे वृक्ष
पत्रे विलसति। अनेन मनसस्तादात्म्यं दर्शितं। यथा कृष्णाभिसृतस्तथा त्वमप्यभिसा
रोचितव्यापारयती भवेत्याह। मुखरमिति। हे सखि कुंजं चल गच्छ। नीलनिचोलं प्रच्छदप
टं शीलय परिधेहि। सतिमिरपुंजं यथा स्यात्तथेति। क्रियाविशेषणं। उद्योते हि अभिसा
रप्रतिबंधः स्यादिति। अथवा कीदृशं कुंजं तिमिरपुंजेनांधकारसमूहेन सहितं। तिमिर
पुंजं नीलनिचोलादिभिरभिसारानुकूलरसपोषकसामग्री कथिता। गोरा ग्यालयानी
लवस्त्रादिभिः शोभाविशेषतया मोहनस्यापि मोहनं संभविष्यतीति ध्वनितं। प्रतिकूले वा रय

105

मंजीरं नूपुरं त्यज। कीदृशं। अधीरं अमंदं अप्रगल्भमित्यर्थः। अत एवाभिसारे मुखरं वाचा
लं। समयोचितं न जानातीति तथाभूतं। न केवलमेवं किंतु केलिषु लोलं चंचलं। केलिसु
लोलमिति पाठे केलौ क्रीडायामतिचंचलमित्यर्थः। कमिव रिपुमिव संभोगक्रीडान्तरगोष्ठी
सुधास्वादप्रतिबंधकत्वात्। रिपुमिव त्याज्यमिति भावः। केचित्तु शृंगारोपयोगित्वान्नूपुरम
उद्धारणतात्पर्यमिति॥४॥ ननु मंडनत्यागेन शोभाहानिः स्यादिति परस्परमीलितैर्भूष
णभूषणांगैरेव परमशोभा भविष्यतीत्येकं जनयन्नाह। उरसीति। हे पीतेन चपुरटगौर
गि। मुरारेः। मुरयति वेष्टयति स्वभुजाभ्यां गाढमालिंगनेन तृष्णयेति। मुरवेष्टने औणादि
क आरिप्रत्ययः। मुरारिः श्रीकृष्णः तस्य उरसि वक्षसि राजसि राजिष्यसीत्यर्थः। वर्तमान
सामीप्ये वर्तमानवद्वेति। लृट् योगे लट्। कदा रतीति विपरीते पुरुषायितसुरतसमये॥

मुखरमधीरं त्यज मंजीरं रिपुमिव केलिसुलोलं। चल सखि कुंजं सतिमि
रपुंजं शीलय नीलनिचोलं॥४॥ उरसि मुरारेरुपहितहारे घन इव तरल
बलाके। तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके॥५॥ ॥

किंविशिष्टे। उरसि उपहितहारे पुंभावमापन्नया त्वया त्वदालिंगनव्यवधानरूपदूषणरहित
स्वकीयकंठस्थितः। आलिंगनचातुर्यणिवशोभाविशेषदर्शनाय उपहितः समर्पितः हारो
मुक्ताहारो यस्मिन् तादृशे। तत्रोत्प्रेक्षते। कीदृश्यौ इव घन इव तरलबलाके। तरलाचला बलाकाव
लपंक्तिर्यत्र तादृशो घन इव मेघ इव च पुंभावचलितेन हारस्यापि चाचल्यं ध्वनितं। केवल इदिव।
विचित्रविविधचमत्कारवती विद्युदिव दृष्टांतेनानेन सुरतकौशलं ध्वनितं। अभूतोपमेयं
कथितेति। विविधमंडितसजलमेघोपरि चचलात्रकपंक्तिः तदुपरि बहुकालस्थैर्यवती
विविधविचित्रचमत्कारवती च विद्युद्यदि स्यात्तदा एवं भवति। तदभावात् तत्राल्यदपि
प्रलोभनीयं। विशेषणमाह। कीदृशे उरसि सुकृतविपाके। सुकृतस्य शोभनाच
रितस्य विपाके विचित्रफलरूपे इत्यर्थः। विपरीतरतौ सुकृतस्य सुष्टु चिलासरूपाच:

रितस्य विपाको यस्मिन्निति वा। तरलबलाक इत्यादि पदान्यपि तद्विशेषणानीति वा। तरला तरला चचला बलाका कामुकी संभोगरसाक्रांता वरस्त्री यत्र तादृशे। पुनः कीदृशे। पिते गिरिधातुभिः कुंकुमादिना वा मंडिनला न्तकोसाक्रान्तवाद्वार इति विपरीते स्त्रिया पुरुषायितं यव तादृशे सुकृतविपाके। तस्य सुकृतस्य विपाकः श्रीराधायाः तादृशाचेष्टितरूपैव फलासिद्धिर्यस्मिन्निति वा। अथवा नायिकायाः संबोधनानि। उपहितहारे इत्यादि उपहितः प्रथमसमागमे श्रीकृष्णेनोपहारीकृतः हारो यस्याः तादृशे। अनेन दानादिको पायो दर्शितः तथा च। तवकंठधृतः तदुरसि तस्मिन्समये तादृशा शोभा प्रदोप्तविष्यतीति भावः। पुनः कीदृशे रतिविपरीते रसि विपरीतं पुरुषायितं यस्याः तादृ

१ विगलितवसनं परिहृतरसनं घटय जघनमपिधानं॥ किसलयशयने पंकजनयने निधिमिव हर्षनिधानं॥ ३॥ धीर स०॥

तस्य सुकृतस्य परमफलरूपेते नाभिप्सितत्वात्। विपरीतरते इत्यस्यैव विशेषणानीति वा। तदा सुकृतविपाके उभयोः पुण्यपरिपाकत्वेपेतत्र हेतुः तरलबलाके एव उपहितहारे इति। बलका बकपंक्तौ स्याद्बलाका बिसकंटिका। बलाका कामुकी ज्ञया बलाकश्च बको मत इति शाश्वतः। विपाक कीर्यते स्वादोपरिणामे च दुर्गता विति विश्वः। ५। पुरुषायितं निरूप्येदानी नायककर्तृकं केलं सूचयति। विगलितेत्यादि। हे पद्मनयने। श्रीकृष्णरचितनवपल्लवशय्यायां जघनमारोपय। कीदृशं जघनं विगलितं वसनं विशेषेण स्खलितं स्वयमेव कंदर्पकोटिरमणीयं कातस्य संगमे परमरसज्ञायाः शृंगाररसविक्रमेण वस्त्रयस्मात् अतोपिधानं मावरणं तद्रहितं। पुनः कीदृशं परिहृतरशनं। पंकजरूपेण नयनेन मन्मथशरमथितचितेन प्रेष्ठेन दूरीकृतो क्षुद्रघंटिका यस्मात् तादृशं। तेनेव वा विगलितवसनमिति वा। पुनः कीदृशं हर्षनिधानं परमानंद

स्यावाभिचारिगृहंकमिव निधिरिव। नायकशिरोमणिरभिष्ट धनमिव अथवा। वि
परीतरतमेव वर्णयिति। सदाहहे सखि किसलयशय्यायांपंकजनयने श्रीकृष्णेपरि
हृतरत्नानादिलक्षणं स्वजपनं तस्मिन्योजयेत्यन्वयः। तादृशावसरेर्षं हायमानरत्न
नायाअनुपयोगित्वा द्विगलितयसेनमित्यपियुक्तमेवा। अन्यसमानं॥ ६॥ वि
लंबमाना दृष्ट्वाभेदभेदरूपमुपायदत्तयिति। हरिः सुंदरवरः अभिमाना अभित
सर्वतोभावेन वाप्रियांमानयती अभिमानि त्वय्यति येन्नो नत्रेमणा भिमानवान्नि
तिवा। अयमर्थः यथात्वं अस्यातुलितवल्लभाहाभितिमानवती। तथासोपायंममा
तीववल्लभाममाभिलषितंपूरयिष्यतीत्यभिमानवानिति। अतोमधुरिपोमधु
र्वसतः तक्षोभकत्वेन रिपुयस्यतादृशस्यकामंवद्रमणरूपाभिलाषंपूरयपरिपू

हरिरभिमानीरजनिरिदानीमियमपियातिविरामं। कुरु
ममवचनेसत्वररचनंपूरयमधुरिपुकामं॥ ७॥ ग॥

पुणाक्रांतः प्रियसहायेनानंदितः त्वयावशीकृतोभविष्यती। तिभावः। मधुव्रतरसामधुव्रत
इव। मधुररसास्वादातुरस्यमधुरिपोरितिवा। अपिचाइयंरजनिः रात्रिरपिइदानींसम
तिविरामंयाति। अवसानंगछति। मद्वचनंयद्वाक्यंकुरु। कीदृशंसत्वररचनंत्वरासाहितं।
गमनेरचयती तितादृशं। सत्वररचनंयथास्यादेवं। चुलसखिकुजभित्यादिलक्षणंमयु
क्तंकुर्विंतिवा। एवभूतश्रेष्टाभिलाषापूरणेनरजन्यवसानेचयदितवदुराग्रहेणऔदा
स्यमाचरेत्तदाअहेतुकविरहदुःखज्वालाजालेपतनंभविष्यतातिभदोदशितिः। केचि
च्चाभिमानीदर्पवानिति। व्याचर्वतितत्तु। राधायामनुकूलत्वाधृष्टनायकगुणविरोधे
नरसभंगः स्यादितितन्नयुज्यते। कचिच्चहरिरतिमानीतिपाठस्तदानायककर्तृकसुर
तनिरूपणेन किंमयैवंतस्यनेरपेक्ष्येणैवकर्तव्यमतआह। कामकंदनंहरतीतिहरिः सचासौरति
श्चसंभोगस्तं बहुमानयतीत्यर्थः रजनिश्चविरामविशेषेणरामममाभिरमणंयातिप्राप्नोतिएवं रसपोषं

108

३ श्रीजयदेवेति। हे वैष्णवाः उक्तलक्षणं हरिं नमत। प्रणमत एवंभूतचरितानुशीलनेन भजते त्यर्थः। कीदृशं प्रमुदितमानंदयुक्तं हृदयं यस्य तादृशं प्रियासमागमोत्सुक्येनेति भावः। तेनाप्यतिदयासहितं भक्तप्रियत्वात्। अतिहरिं सर्वेतिमं सर्वेति मानायिकाप्रसंगेन परिपूर्णगुणप्रकाशनीत्। अतिशायेन सर्वेषां मनोहरणात्। सदयं सतां अयः शुभावहो विधिर्यस्मात मिति। स्वानुभूतं वर्णितं। यथा लोके प्रसिद्धिरनया१ध्य प्याह। रिर्जयदेवस्य गृहे प्रकटीबभूवेति। कसति। श्रीजयदेवे परमरमणीयं परमः परमानंदस्वरूपत्वाद्रमणीयः रसवलितत्वात् परमश्चासौ रमणीयश्च परमरमणीयस्तं श्रीराधामोहनयोश्चरितं भणति सति। कीदृशे जयदेवे। कृतहरिसेवे। ह्य

श्रीजयदेवे कृतहरिसेवे भणति परमरमरमणीयं। प्रमुदितहृदयं ह

रिमतिसदयं नमत सुकृतकमनीयं। ८। विकिरति मुहुः श्वासानाशा

पुरो मुहुरीक्षते प्रविशति मुहुः कुंजं गुंजन्मुहुर्बहु ताम्यति। रचयति

मुहुः शय्यां पर्याकुलं मुहुरीक्षते मदनकदनक्लांतः कांते प्रियस्तव वर्तते। ऋद्धि

ताहरः उक्तलक्षणा सेवा येन तादृशे। कीदृशं। सुकृतकमनीयं। सुकृतैः शोभनाचरितैः कमनीयं कांक्षणीयं। कोटिसुकृतैः काम्यते तस्य दयमेव महत्प्रसंगेन प्राप्यतं इत्यर्थः। हरेरेव विशेषणं वा। परमरमणीयमिति। सुकृतकमनीयं च। सुकृतैः शोभनैश्चरितैः कमनीयं सुंदरमित्यर्थः। अभिसारिका चात्र नायिका तल्लक्षणं। मदनानलसंतप्ताया भिसारयति प्रियं ज्योत्स्नी तमस्विनी रात्रियोग्यावरचिभूषणा। स्वयं वाभिसरेद्यानु साभवेदभिसारिकेति। ८। एकादशः प्रबंधः ११। पुनरप्यभिसारगतस्य अन्यचेष्टितं निरूपयति विकिरतीति। हे कांते स्वकांत्यावशीकृतवल्लभे। तव प्रियमदनस्य कामस्य तद्वियोगेन कदनं पीडनं तेन क्लांतो ग्लानो वर्तते। तथाविधः स किं करोतीत्यत आह॥

१०९

मुहुर्वारंवारं त्वदागमनं चिंतयाश्वासान्संतापनिःश्वसितानि विकिरति क्षिपति। पुरोग्रे
मुहुः आशादिशः ईक्षते विलोकयति। आकुलतया कस्या दिशः कदा वा आगमिष्यतीति
युगपदेव सर्वा दिशः पश्यतीत्यर्थः। तत्रापश्यन्मुहुः संकेतनिकुंजं प्रविशति। केनापि मा
र्गेण कुंजं प्रविष्टो भविष्यतीति मार्गं निरीक्ष्य कुंजे प्रविशति। एकत्र्या चातिशयो निरूपि
त इति भावः। कीदृशं निकुंजं गुंजद्द्रुमरे शब्दं कुर्वत् अतो बह्वधिकमस्याः स्थास्यान्तथा ताम्य
ति ग्लानो भवति। एवंभूतापि त्वदनुरागेण मुहुर्वारंवारं केनाप्यद्भुता क्रियाविशेषेण शय्या
रचनं करोति। तत्रापि परितः। आकुलं यथा स्यादेवं मुहुरीक्षते। क्वचिच्च विचरति मुहुः श्वा
सानाशाः पुरो मुहुरीक्षते प्रविशति मुहुः कुंजं कूजन्मुहुर्बहुतान्यतीति पाठः। तदा तासां
पुरो मुहुरीक्षते त्वां ध्यायति कूजन्मुहुः हा प्रिये हा

त्वद्वाम्येन समं समग्रमधुना तिग्मांशुरस्तं गतो गोविंदस्य मनोरथेन
च समं प्राप्तं तमः सांद्रतां। कोकानां करुणस्वरेण सदृशी दीर्घा मदभ्य
र्थना तन्मुग्धे विफलं विलंबनमनोरम्योभिसारक्षणः॥२७॥

प्राणेश्वरीति मुहुरार्तनादं कुर्वन् बहुताम्यतीत्यर्थः। हरिणीछंदः। दीपकोयमलंकारश्च॥२६॥
इदानीं सांप्रतमेव गंतुं सांप्रतमिति हेतुमाह। त्वद्वाम्येनेति। हे मुग्धे सौंदर्येण वशीकृतवल्ल
भे। सुंदरि। स्वकार्यसाधनाज्ञानान्मूढे वा मुग्धे इति संबुद्धिः। तत्तस्माद्धेतो विलंबनं काला
पनयनं विफलं हस्तगतसौख्यं प्रतिबंधकमित्यर्थः। असावभिसारक्षणः अभिसारयो
ग्यः समयः रम्योति मनोहरः। तं दर्शयति। त्वद्वाम्येन समं वक्रतया सह तिग्मांशुः सूर्यः स
मग्रे सामस्त्येन तथा स्यादेवमस्तगतः। अथवा। समग्रमधुना आरंभावसानमाधुर्ययु
क्तानुनयवचसा तिग्मांशुः तवचित्तकाठिण्यं वियोगापादनेन संपादकत्वात्। तमस्तिमि
रं गोविंदस्य मनोरथेन समं वांछया सहितं सांद्रतां निबिडतां प्राप्त। गोविंदस्य मनोरथाः

धकारश्च निबिडो जात इत्यर्थः। अंधकारस्योद्दीपनविभावत्वात् प्रियागमनहेतुत्वाच्च मनोरथस्य निबिडत्वमदभ्यत्वं नाम घ्रांचादीर्घविरहकालिकी कीदृशी कोकानां चक्रवाकानां करुणस्वरेण सदृशी तुल्या। विरहाधिक्येन कृपाविषयत्वप्रापकस्वरात् तुल्यदेकनिष्ठः सोत्कंठः कोतः निबिडांधकारः चक्रताच्च। ताअहमप्यनुकंपनीयेति विलंबो न युक्त इति भावः। सहोक्तिनामायमलंकारः। इतेक्तं दंडिना। सहोक्तिः सहभावस्य कथनं गुणकर्मणोरिति। यथा। सहदीर्घा मम श्वासैरिमाः संप्रति रात्रयः। शार्दूलविक्रीडितं वृत्तं। २७॥ यदुक्तं रम्याभिसारः क्षणः तदेवांधकारस्याति निबिडतया विविधरसचमत्कारनिरूपणेन प्रलोभयन्वर्णयति। आश्लेषादिति। इहतमसि दंपत्योर्जायापत्योः व्रीडाविमिश्रो लज्जासमन्वितः कः रसः रसराट् म

आश्लेषादनुचुंबनादनु नखोल्लेखादनु स्वांतजप्रोद्बोधादनु संभ्रमादनु
रतारंभादनुप्रीतयोः अन्यार्थं गतयोर्भ्रमान्मिलितयोः संभाषणैर्जा
नतोर्दंपत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः॥२८॥ ॥ ॥

शृंगारो न भवति न अपितु भवत्येवेत्यर्थः। किंभूतयोः दंपत्योः। अन्यार्थं सुरतादितरस्त्रयोजनमुद्दिश्य गतयोः भ्रमान्मिलितयोः परिभ्रमणा संगतयोः। सांद्रे तमसि परस्परालापे

व

जानतोर्ज्ञानेत्तोः। अमेहेस्याः पत्निः। अयं मम भर्तेति। स्वरभंगादिलक्षणैः सात्विकविकारैः भावावगमाद्वा संभोगाभिप्रायमिति। नयोश्चेष्टितमाह। आश्लेषादनु चुंबनात्। तदनुस्मरकामक्षोभार्थेनोन खोल्लेखनं नखक्षतं तदनु पश्चात्तस्य स्वांतजस्य कामस्य उद्बोधः उत्कटत्वं तदनु संभ्रमः कामोद्रेकान्नीव्यादिस्पर्शाव्यग्रता इतेनु रतारंभः कामशास्त्रप्रणीतबंधादिना संभोगारंभः तदनु प्रीतयोः समकालमेव लब्धानंदयोः तदुक्तं भरतेन। आश्लेषचुंबनाून खक्षतकामबोधशीघ्रत्वं मैथुनमनंतत सुखप्रबोधः। प्रीतिस्ततो चिरसंभावनमेव कार्यमेवं नितांतचतुराः सुचिरं रमंतेइति। अथवा। कः कः रसो न भवतीति न अपितु सर्व एव रसो भवतीत्यर्थः। तत्र गाढांधकारे भयव्यंजनादाश्लेषः। ततो भयस्यापि भावत्वभयानकः। हठाच्चुंबनेनशोकमेवानुकर्षन् करुणत्वा। विभावैः नखक्षता

दिन्नाउत्साहात्मा वीरः एवमपूर्वसुखानुभवइति संभ्रमाद्विस्मयसहचरोद्भुतः कामो बाधनहास्यः
रनारंभात्सकलेरसचक्रवर्तीरिति संख्यातृंश्रृंगारं श्चस्यसमुल्लसति। तथा चोक्तं। रनिहसि
श्चशोकश्चक्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चामास्थापि भावाः प्रकीर्तिताः। नेजुजु
गुप्साक्रोधश्चामाः श्रृंगारविरोधान्ननिरूपितः। उक्तलक्षणानामप्यत्रतत्पोषणत्वेनैव ग्रह
णं न तु स्वातंत्र्येण। तथा च दंपत्योरपि अन्यप्रयोजनमुद्दिश्य गतयोरपि तमसस्त्वादन्नारसे
न्नादकत्वकथनेन रससर्वस्यरूपयोः भवतोः मिलनविलंबनं मकार्यमिति ध्वनितं।
केचित्तु अन्यया नायिका नायकनिमित्तं गतयोः प्रमाद्वात्सा। इयं मम अभिसारिका अयं
मम अभिसारक इति मिलितयोः परस्त्रीपरपुरुषत्वेन संगतयोः संभोगानंतरं संभाषणे जानतोः

सभयचकितं विन्यस्यंतीं दृशौ तिमिरे पथि प्रतितरुमुहुः स्थित्वा मंदं प
दानि विचिन्वतीं॥ कथमपि रहः प्राप्तामंगैरनंगतरंगिभिः सुमुखि
सुभगः पश्यन्स त्वामुपैत्ति कृतार्थतां॥ २१॥

पश्चादुभयोः व्रीडाविमिश्रीरसः भवतीति व्याकुर्वंति। तन्न समीचीनं तस्याः भगवत्प्रिया
या आगे ग्राम्यरसकथनासंभवात्। शार्दूलविक्रीडितं वृत्तं॥ ऊ॥ इदानीं तस्याभिरेवतस्य
सर्वस्वमित्याह। हे सुमुखि सुंदरवदने सुभगः श्रीकृष्णः त्वां पश्यन् कृतकृत्यतां प्राप्नोति।
तवदर्शनादाविर्भूतसमस्तभागः स्यादिति भावः। उक्तं च। ताभि विधूतश्चाकोभि भगवान
च्युतो वृतः। स्परोचितोऽधिकतानपुरुषः शक्तिभिर्यथेति। कथं भूतां त्वां तिमिरे धकारे पथि
वर्त्मनि। सभयचकितं यथा। स्यात्तथा अभिसारसंभ्रमणं भगान्नाच सदृशौ दृशौ नेत्रे विन
स्यंती दिक्षु दिक्षु पर्यंती। अनेन विलकेन मलोचनसौंदर्यं ध्वनितं। पुनः किंलक्षणां। प्रति
तरुवृक्षं वृक्षेप्रति मुहुर्वारं वारं स्थित्वा समे प्रियतमोऽत्रैवागमिष्यतीति पुनः मंदं यथा
स्मादेवं प्रकृतिश्चोभनगत्या पदानि विचिन्वती चरणारविंदं धारयंती। पुनः कीदृशीं॥ क
थमपि भाग्योदये न रहः प्राप्तां। अनंगस्य तरंगउद्बोधोयेषु। कामोल्लासा ये वर्तिरंगैः

अवयवैरनुपलक्षितता। अगौरिति विशेषणे तृतीया। अंगैरनंगतरंगिभिरिति सौंदर्याधिक्यान्नि रवयवानामप्युल्लासमिति ध्वनितं। सुभगाः सुमुखीति चासमानरूपत्वेन श्रीतियोगत्वं सगैति कविरासिशमात्रास्ता राधेति। देवकीनंदनः श्रीकृष्णः त्वामवतु रक्षतु किंभूतः। श्रीराधायाः मुग्धसुंदरं यन्मुखारविंदं तत्र मधुपः। मुखारविंदे माधुर्यमातिरक्षति। नित्यानुकूलतया वृद्धिं प्रापयतीत्यर्थः। तन्माधुर्यपातिरक्षति। नित्यानुकूलतया वृद्धिं प्रापयतीत्यर्थः। तन्माधुर्यमात्रतृष्णयापिबतीति वा। त्रिलोक्याः यामौलिवंदाटवीत तदलंकारा ग्रोचिंतनीलरत्नं त्रामसुंदररूपमित्यर्थः। त्रिलोक्यामेवाखिलकामानां मौलीस्थलीति वा। उक्तंच। अहोमधुपुरी धन्या वैकुंठाच्च गरीयसीति।

राधामुग्धमुखारविंदमधुपस्त्रैलोक्यमौलिस्थलीनेपथ्योचितनीलरत्न
मवनीभारावतारक्षमः। स्वच्छंदं व्रजसुंदरीजनमनस्तोषप्रदोषश्चिरं
कंसध्वसनधूमकेतुरवतु त्वां देवकीनंदनः। ५०। श्री गीतगोविंदे अभिसा

गीत० टी० ५

पृथिव्या भाररूपोऽवतारो येषामसुराणां तेषां अंतको नाशकः। अतएव कंसस्य ध्वंसने धूमकेतुः। तद्धि नाम्ना पिशुनग्रहः। जातमात्र एव तस्य नाशं सूचितवानित्यर्थः। अथवा धूमकेतुः अनलः स्वयमेव विनाशकः। अनेन स्वर्गकेलिप्रतिपादनाय सामर्थ्यरूपो नायकगुणकथितः। तदेवाह। स्वच्छंदं व्रजसुंदरीजनमनस्तोषाय चित्ताभिलाषपूरणाय चिपरमपारं प्रदोषा रजनीमुखमिवाचिरं नित्यमेवावसितिवा तथा च। देनाम्नी नंदभार्यायायत्रा द्वादेवकीत्यपि। अतः सख्यमभूत्तस्या देवक्या यशोदा जाययेति। केचित्पुराणे वचनं पठंति। ५०। इति श्री गीतगोविंदव्याख्यायां अभिसारिकावर्णने साकांक्षपुंडरीकाक्षानाम पंचमसर्गः। ५।

श्रीराधानुरागोज्जृंभितसंगमाभिलाषेण मन्मथाक्रांतनयनः श्रीकृष्णो यत्र तादृशः पंचमः कामबाणतुल्यः। एवं पंचमे श्रीकृष्णस्योत्कंठां अभिसरणं च निरूप्येदानीं षष्ठेस्मिन्कंदर्पशरीरपिडितां गंतुमशक्तां श्रीराधां मनोरमसंकेतनिकुंजे संस्थाप्य तच्चेष्टितं सखी श्रीकृष्णं प्रत्याह। तदेव दर्शयति अथेति। अथशब्दो मंगलार्थः। अनंतरार्थो वा। सखी तच्चरितं तस्याश्चेष्टितं गोविंदे गोविंदं विषयीकृत्य प्राहोवाच। कीदृशे मनसिजेन कामेन मंदे व्यथिते कामो मंद स्तु छाय समान् वा कोटिकंदर्पस्वरूप इत्यर्थः। किं कृत्वा तां श्रीराधां लतागृहे कुंचित्लतामंडपे चिरं बहुकालं व्याप्यातुरतां दृष्ट्वा। आसीनां च निकुंजे समावस्य मामनुनेष्यतीति एवं ज्ञात्वेत्यर्थः। कीदृशीं। अंगैर्न विक्रिया ततः गंतुमशक्तां चलितुमसमर्थां। अथवा गोविंदे नुरक्तामिति व्याख्येयं। तेनैव बहुकालात्प्रियात्तु मसमर्थामित्यर्थः॥५७॥ सखी यदाह। तद्गीतेन कथयति। पश्यतीति। ध्रुवपदं। गीतस्यास्य गुणकरी रागः। रूपकतालः॥

अथ तां गंतुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा। तच्चरितं गोविंदे मनसिजमंदे सखी प्राह॥५७॥ पश्यति दिशि दिशि रहसि भवंतं। त्वदधरमधुरमधूनि पिबंतं। नाथ हरे विरहे सीदति राधा वासगृहे॥ ध्रु०॥

रागलक्षणं। एकोत्सुका कांतपथि प्रतीक्षानो पालयंती मृदुपुष्पतल्पात् उत्तस्तनः प्ररिक्तदृष्टिः ज्ञाताश्यामा तनुर्गुणकरि प्रसिद्धेति। तालस्तु कथितः प्राक्। गीतार्थस्तु। हे नाथ हे हरे राधा वासगृहे संकेतितनिकुंजमंदिरे सीदत्यवसन्नाभवति। विरहे दुःखापहारायात्राहारेनि संबोधनं। नाकथेति। नाथनाद्धृया आपताप ऐश्वर्याशीःषु इति हे स्वामिन्समर्थं न त्वया स्वीयानां दुःखाशांतिर्नोचितेति दैन्योक्तिः। ध्रुवपदं। अथ पदानि। तदद्भुतानुरागविवर्तं दर्शयति। रहस्येकांते भवतं त्वामेव दिशि दिशि प्रतिदिशं पश्यति। कीदृशं तत्तस्याः राधायाः मदधरं तदेव मधुरमधूनि स्वामतानि पिबंतं। तदधरसंस्पर्शनमधुराणि मधूनि यमान्यक्षराणि तानि शृण्वंतमिति वा। अत्यादरेण श्रवणेपानमित्युच्यते। केचित्तु दधरेत्यादि पठितं। तच्छंदस्य अन्यपरत्वादन्यस्याधरे मधुरमधूनि पिबंतमपि तन्मयं विरह इति॥१॥ नन्वेवं चेत्तर्हि किमिति नागतेत्यत आह। त्वदभिसरणे तयाभिसा

रयोरभसउत्साहस्तेन वलंती आपिमुखीभवंती कियंति पदानि कतिपयानि पदानि च
लंती गच्छंती सती पतति तद्विरहमूर्छया नानुभससमर्थेत्यर्थः ॥२॥ हा कष्टमेवं चेद्राका
हिं कथं जीवतीत्याह । परं केवलं सा तव रतिकलया पूर्वानुभूततवरतेराकलनेन संग
मप्रतीक्षया तव रतेः कलावृद्धिस्तया जीवति जीवनं प्रवर्तयतीत्यर्थः । कीदृशी । विहि
ताः कृताः सखीजनैस्तापनोदने विशेषेण हिताः पथ्या इति का । विशदाः शुभ्रा बिस
सं केलया मृणालांकुराए च वलया कंकणानि यस्याः सा तादृशी । कलना कालयोर्वृद्धौ
कलेति विश्वः ॥३॥ किंच मुहुर्वारंवारं वीक्षिता मंडने बर्हमुकुटमकराकृतिकुंडला

त्वदभिसरणरभसेन वलंती । पतति पदानि कियंति चलंती ॥२॥
विहितविशदबिसकिसलयवलया । जीवति परमिह तव रतिक
लया ॥३॥ मुहुरवलोकितमंडनलीला मधुरिपुरहमिति भावनशीला ॥४॥

दिभिर्लीलातवानुकृतिर्यया सा । अहं मधुरिपुरिति भावनशीला चिंतनपरा । रहसि
तव वेषं विधाय अहमेव मधुरिति । चिंतनस्वभावेत्यर्थः । लीला च हास्यविशेषः । तदाह
वास्यायमः । प्रयोजनस्य चेष्टयानुकरणात् । न्यायेन याक्रियते नुकृतिः सेयं लीलोक्ता
मुनिसत्तमैरिति । तथा चोक्तं श्रीभागवते । गयानरागस्मितविभ्रमेक्षितैर्मनोह
रालापविहारविभ्रमैः आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मि
काः ॥ गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः । असावहं त्वि
त्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमा इति । मधुरिपुरिति तस्य कठि
णचित्तस्य चित्तेन न दृष्टचिह्नतया कालक्षेपं करोतीति सख्या कटाक्षति । मधो
वसतस्य रिपुः तया सह विलासं विना व्यर्थकारिति वा ॥४॥ तद्वापापभायाआ

115

तत्संगमार्त्तिमाह। त्वरितमिति। हरिः सर्वचिन्तापहारी विरहसंतापहर्ता त्वं वा। अभि-
सारं संकेतस्थलं त्वरितं शीघ्रं कथं कस्माद्धेतोर्नोपैति नागच्छतीति अनुवारं वारं स
खीं वदसि॥५॥ अपि च। सा मंदना मदभ्रांता त्वया विशिष्टचिता हरिरुपगतः प्राप्त इ
ति वध्या ऽनल्पमधिकं बहुमाममनीयवा तिमिरमंधकारं श्लिष्यत्यालिंगति चुंबति चा अ
नल्पं यथा स्यात्तथेति वा। कीदृशं सजलमेघसदृशं॥६॥ भवतीति। सच त्वय्यपि विलंबिनि
विलंबं कृतवति सति। विगलितलज्जा गतलज्जा सती विलपति हे निष्कृपा कथमेतावदेवा
तो स्यं मयि त्वया चरितमिति विलापं करोति। रोदिति। अश्रुणि मुंचति। सा वासकसज्जा सके
ली लागृहे कांतसंगमाय

त्वरितमुपैति न कथमभिसारं हरिरिति वदति सखीमनुवारं॥५॥
श्लिष्यति चुंबति जलधरकल्पं हरिरुपगत इति तिमिरमनल्पं॥६॥
भवति विलंबिनि विगलितलज्जा विलपति रोदिति वासकसज्जा॥७॥
श्रीजयदेवकवेरिदमुदितं रसिकजनं तनुतामतिमुदितं॥८॥ ना०

सज्जा संभृतसकललीलोपकरणा। भर्त्ता यत्स्त्रीणां वासस्तु वासकः। अस्य वासकवन्नात्कां
ते समेष्यति गृहं प्रति। सज्जीकरोति यात्मानं या सा वासकसज्जकेति। वासकसज्जेयं नायिका।
तथा चोक्तं। शृंगारतिलके। भवेद्वासकसज्जासौ सज्जितांगारतालया। निश्चियागमने भर्त्तुर्द्वा
रेक्षणपरायणा॥७॥ श्रीजयदेवकवेः इदमुदितं कथितं गीतं रसिकजनं शृंगाररसभावभा
वितांतःकरणं अतिमुदितं अतिशयेनानंदितं तनुतां विस्तारयंतु। शृंगाररसाभावविशिष्ट
मतया स्वादचतुरेणा स्वादनीमिसर्थः॥८॥ द्वादशप्रबंधः॥१२॥ विपुलेति हे कितवधूर्त्त सामृ
गाक्षी मृगशावलोचना तव मंदकंदर्पकोटिरमणीयमूर्तेः तत्संबध्यनल्पकल्पस्यया नल्पाकंद

र्पचिंतावासमम प्राणकोटिवल्लभः कदावागमिष्यतीत्याद्येवंरूपा तां विधाय हृदि स्वाध्यानेनलग्ना त्वयि संगता सती। रसजलधौ शृंगार रसे समुद्रे मग्ना बभूवेत्यर्थः। रससागर मग्नायाश्चेष्टितं वर्णयति। कीदृशी। विपुलाप्रचुरापुलकपालिः रोमांचपंक्तिर्यस्याः सा। मग्नयो स्याद्ररिणर्थमिव गृहीतां केयात्वदगस्पर्शोद्भूत सात्विकविकारेत्यर्थः। किं कुर्वंती। तस्पर्शोन्मद मदनोन्मथितचित्तस्य तव स्तनालंभनालपनाधरपाननीवीबंधनोन्मोचनासक्तिमाकत्वव्यकाकुव्याकुलं काकध्वनिविकारविशेषेणाकुलं यथास्यादेवं व्याहरती। कुट्टमिता रव्यहावमाश्रिता मुंच मुंच न न मा मेत्यादि कुपितेव निषेधकं वाक्यं कथयंतीत्यर्थः। उक्तंचाकाकुं स्त्रियां विकारोयः शोकभीत्यादिभिर्ध्वनेरिति। कुट्टमितलक्षणं। केशाधरादिग्रहणे मोदमानापि मानसे। दुःखितेव बहिः कूर्याद्यत्र कुट्टमितं हि तदिति। पुनः कथंयथास्यात्तथा॥

विपुलपुलकपालिः स्फीतसीत्कार मतर्जनितजडिमकाकुव्याकुलं व्याहरन्ती।
तवकितवविविधायामंदकंदर्पचिंतां रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी॥४४॥

स्फीतः प्रवृद्धसीत्कारो यत्र एवं यथास्यात्तथा। नखोल्लेखनादिने बाहृट सीत्कारं करोतीत्यर्थः। बाह्यविकारान नुवर्ण्येदानीमंतर्विकारमाह। पुनः कथंयथास्यात्तु। अंतःश्रितेन जनितो जडिमा जाड्यस्तंभः। आनंदविकारस्तद्यथा स्यात्तथा। अनेनरता स्व्याभावोउक्ता। एभिर्भावैः रसजलधौ गग्नलमुक्ता। स्तंभश्चेष्टाप्रतीघातः। इत्यानंदावाप्तिलक्षणं। जडतारव्यानवस्यावस्थर्यइतिभवः। अन्यस्यापि जलधिनिमग्नस्यांतर्जाड्यं रोमांचसीकरत्रुटयदूर्णाभीषणकाकुनिर्गमनचिंताश्च भवंतीति॥४४॥ ननु मया सह रमणं जातमेव। किमर्थं तत्र गमनेनेत्येवं रममाणपिसाक्षात्त्वां विना वक्ष्यमाणव्यापारव्रत्यापि निर्गानेतु न समर्थाभविष्यतीत्याह। अंगेष्विति। हे श्रीकृष्ण एषा वरतनुः सुंदरांगी त्वया विनोत्तामृतेनिशां रात्रिंचनेष्यति। प्रभातं प्रापयतु न समर्थाभविष्यतीत्यर्थः। कीदृशी। इत्यनेन प्रकारेण अकल्लोलाकारः विकल्पस्त्वदागमनशंका नतलंशय्यारचनादूतोप्रेक्षणा द्विवदागमनोपायचिंतनाएभिः संकल्पा मनसोरतिरित्यादिलीलाश्याव्या सक्ता वितत

र्ति। अंगेष्विति। अंगेष्वाभरणमलंकारं तव मुख्याय मंगलाय यया बहुशोनेकप्रकारेणैव
रोती सा कल्पः कथितः। पत्रपि संचारिणि वृक्षपत्रपिपक्ष्यादिना चलैतिसति। वौशासमा
तं परिशंकते सर्वतः वितर्कयतीत्यर्थः अनेन विकल्पः। अपि च। नवकामकेलिनिमितश
य्या वितनुते विविधचित्रविचित्रोपधानादिभिर्नानाप्रकारैर्विस्तारयतीति। एवं तल्पः। चिरं बहु
कालं ध्यायतीति त्वदागमनोपायं चिंतयति। रचनेयं दर्शिता। एभिर्व्यापारैस्तवागमनोत्त्री
या कालं नयतीत्यर्थः। अग्रमल्पता ख्याहृचः। तदुक्तं। अल्पता सा तु कथिता प्रियस्यागम
ने सति। दिदृक्षयोः यास्तादृक्संभ्रममलंकृतिरिति। आकल्पवेषो नेपथ्यमित्यमरः।
तकौचिकल्पः शंका चेति। संकल्पः कर्म मानसमिति। ४श्रासगंतिकविराज्ञिषं प्रयुक्ते।।
किमिति। श्रीगोविंदस्य गिरः वाण्या।

अंगेष्वाभरणं करोति बहुशः पत्रेपि संचारिणि प्राप्तं त्वां परिशंकते वि
तनुते शय्यां चिरं ध्यायति। इत्याकल्पवितल्पचेरेना संकल्पलीलाशतव्या
सक्तापि विना त्वया वततेरे नुनैषा निशां नष्यति।।४३।।

जयंति सर्वोत्कर्षेण वर्तति। भावगर्भितया वक्रुचैदग्ध्याख्यापनेन तत्वेन च गुरुजनवंचनया
संभोगसंपत्तिसंपादनात्। किंभूता गिरः। सायमतिथिप्रश्नस्य गर्भाः। सायंकाले येऽति
थयस्ते प्राप्तस्य संस्थागमनादि प्रश्नं साधन्या ममतिथिर्गृहिणी पुण्यासादकः। वस्तुतस्तु
प्रियाभिसारसंकेतज्ञापनादयं बहुसुखप्रदातेति गर्भोऽभ्यंतरे यासां ताः। प्रश्नोस्याभ्यंतरे
अभिप्रायविशेषयुक्ताः इत्यर्थः। व्याजोक्तिरलंकृतिरियं। कीदृशस्य गोविंदस्य नंदांतिकेपि
तुः समीपे नादकृसंकेतसूचनारूपआध्वागमुखान्निःसृतं श्रीराधायाः वचनं गोपतेः
संगोपनं कुर्वतः। किंतदिति। हे पांथ तः पथिकश्रांततरिति कोमलामंत्रणे। श्राडिरभूमी
रुहि वटवृक्षे किं विश्राम्यसीति विश्रामं मा कथाः। तत्र हेतुः कृष्णाम्भोभिर्भवनो। कृष्णश्रा

सो भोगी च तस्य भवने कालसर्पावासोपक्षे शृंगारिणः स्त्रीमत्सुंदरस्य विलासगृहोपक्षद्वयेपि नेहस्थेयमिति त्रातपदोपादानं श्लेषालंकारश्च अत्र कृष्णः केत्राभोनिलयोरिति धरणः भोगी कोमुकसर्पयोरिति विश्वः न तर्हि कया भीतेसेअहा दूतो वटा सानंदसकलर्द्धिमतु नंदस्य आस्य दं मंदिरं नयासि अपितु याही ति शून्यस्सर्पायासपरित्यागेन श्रीमद्गृहातिथ्येन च निर्वृतो भावि ष्यत्सर्पः दूरे भविष्यतीत्येत आह दृष्टिगोचरमिति आसन्नमेवा पथिकवचनेन संकेत सूचनात् श्रीकृष्णस्य तादृग्वा भिवप्रकटनेन श्रीराधाया वाचोजयंती सपिध्वनितं अ

> किं विश्राम्यसि कृष्णभोगिभवने भांडीरभूमिरुहि त्रातर्यासि
> न दृष्टिगोचरमितः सानंदनंदास्पदं राधाया वचनं तदध्वगमुखा
> न्नंदांतिके गोपतो गोविंदस्य जयंति सायमतिथिप्राशस्त्यगर्भा गिरः ॥७४॥ षष्ठसर्गः

दिगुणविशिष्टो राधा मोहनायालंबनो स्वयंदूती च नायिका निशामुखवटाद्युद्दीपनविभावाः । एवं रसराट् शृंगारो निरूपितः ॥७४॥ इति द्वादशः ॥ इति श्रीगीतगोविंदे दासकसज्ञावर्णने धन्य वैकुंठो नाम षष्ठः सर्गः ॥६॥ श्रीराधानुरागास्पदत्वेन धन्यः स चासौ विगतविरहमूर्छश्च विकुंठो हरिर्यत्र तादृशोयं सर्गः समाप्तिमगमत् ॥ ॥ पूर्वं तावदुभयोरनुरागं निरूप्य दानीं रसांतरत्र वैशिष्ट्यनरसविशेषवैचित्र्यभावोद्रेकं प्रगटयन् पुनरपि हेतुपूर्वकं विप्रलंभाख्यशृंगारमव तारयति ॥ अत्रांतरेति ॥ अत्रांतरे अस्मिन्नेवावसरे दुःखद्रोण्युज्वालैः किरणसमूहैर्वृंदावनां तरं च वनमध्यमदीपयत्प्रकाशितवान् ॥ अनेनालौकिकश्चंद्रोयं श्रीमहदायनांतरं प्रका शितवान् । न त्वन्यत्रेति परमनिबिडस्यांतरव्यापकत्वेन प्रकाश बाहुल्यमुक्तं अथवा वृंदा

वनांतरवर्त्तिनो नागरीकिशोरयोरंगैर्नमुद्दीपयन्नित्यर्थः। कामसहचरत्वात् चंद्रस्योद्दीपकत्वमाह। कीदृशः। दिक्पूर्वदिक् सैव सुंदरी तस्याः वदने चंदनबिंदुमंडलाकार सकुंकुमघृष्टश्रीखंडतिलकः। श्रीराधावदने तिलकादिनिर्माण स्पृहा श्रीकृष्णस्यास्य दर्शनेन भवतीति भावः। विप्रलंभत्वहेतुत्वं दर्शयन् विशिनष्टि। कीदृशः। स्फुटा प्रकटीभूता लांछनश्रीः चिन्हविशेषशोभा यस्मिन् तादृशः। नन्वेतत्संभवति कुलटाकुलस्य श्रीकृष्णाभिसारिकासमूहस्य यो वर्त्मपातः संकेतआगमनमार्गप्रतिबंधकस्तेन संजातमुत्पन्नं पातकं यस्य तादृशः इत्युक्तं॥

अत्रांतरे च कुलटाकुलवर्त्मपातसंजातपातक इव स्फुटलांछन
श्रीः। वृंदावनांतरमदीपयदंशुजालैर्दिक्सुंदरीवदनचंदनबिंदु

रिंदुः॥

चा किमुत्तीर्णः पंथा कुपितभुजगीभोगविषमो विसोढा भूयस्य किं भित्तिकुलपालीकटुगिरः। इति स्मार स्मारं दरदलितशीतद्युतिरुचौ सरोजाक्षी शोणं दृशि नयनकोणं विकिरति। अत्र रूपकोत्प्रेक्षे अलंकृती केचित्तु श्रीवृंदावनेश्वर्याः विप्रलंभमसहमानाः पूर्वसर्गांतसंयोगमनुवर्णयंस्तत्र सर्वसमैवैचित्र्यविलंब प्रभास्य मद्भुतरसविवर्त्तं निरूपयंती। तत्रैव सर्गांतिः पूर्वसर्गे स्वयंदौत्येन संयोगः अग्निमाष्टपद्यां प्रेमविलापः। ननु अज्ञानेसादृश्या विषाद व्यंजनेन स्वीयमेव रमितमन्यामुद्दिश्य प्रबंधद्वयेन श्रीराधायां निरूपितं। सर्गांते प्रणमालोकामृतं नीपीयत संगम चिन्हैरेव नागरीमौलिः तस्या अग्रे प्राक् नीलनिचोले सादित जोष्टमंडदंड भाव मदविकलया नोगर्भीकृतानुनयविनीतस्यापि याहि याहीति तिरस्कारः। मदग्रसुगम एवतदीयानां परितोषायैवेदं व्याकृतं तत्क्षतव्यं तदानेन श्लोकेन श्रीराधयाक्रीडत्ति गोविंदेन्याभिसारिकानां रोधकत्वं वर्णितं अतएव लांछनश्रीरिति तासां वर्त्मघातपातकेन जातकलंकस्यापि तयोः प्रांसापादनेनत्रो भावभूचे सर्थः। अन्यत्समानं॥४५॥

विप्रलंभस्य हेतुं प्रदर्शयितानीतं दर्शयति। प्रसरतीति। सा राधा उच्चैः स्वर्थं विरचितैः कृता नाना विधः कोसि कांत कथं गच्छामि उपैमि इत्यादि विलापो यत्र एवं यथा स्यात्तथा परितापं चकार कृतवती। किंभूता विधुरा विरहदुःखिता। किं सति शशधरबिंबे चंद्रमंडले प्रसरति। पुनः किं सति माधवे नायकशिरोमणौ विहितविलंबे सति। संकेतागमनं प्रति कालातिक्रमं कृतवति सति। माधवपदेन चंचलरूपा लक्ष्मीर्वा। पक्षांतरे च समीपे वर्तमाने पि श्रीकृतद्वौ ध्यायविहितविलंबे सति। प्रेमकौतुकदर्शनाय सखीभिः सह संमतं विधाय तत्रैव निलीय स्थिते सतीत्यर्थः। उद्दीपनविभावनं ॥१५॥ यदुक्तं विलापं चकार तदष्टपद्या वर्णयति। कथितसमयेपीत्यादि। गीतस्यास्य मालवरागः प्रतिमंठस्तु तालः तल्लक्षणं त्री

प्रसरति शशधरबिंबे विहितविलंबे च माधवे विधुरा। विरचितवि
विधालापं सा परितापं चकारोच्चैः ॥४८॥ कथितसमयेपि हरिरहह न
ययौ वनं। मम विफलमिदममलरूपमपि यौवनं ॥१॥ यामि हे कमि
ह शरणं। सखीजनवचनवंचिता ॥ ध्रुवपदं ॥ ध्रु ॥ ध्रु ॥

विप्रलब्धा चात्र नायिका। प्रेष्य दूतीं स्वयं गत्वा संकेतं नागतः प्रियः। यस्यास्तेन विना दुःस्था विप्रलब्धा तु सा मतेति। गीतार्थस्तु। हे सखि इहास्मिन्समये त्वां तद्दुःखपरिहाराय कं जनं शरणं यामि। अथवा कं जलं तापग्रस्ते शरणं यामि। तेन विना जलादिषु प्रविश्य यामीत्यर्थः। किंभूताहं सखीजनवचनवंचिता। सख्य एव जन इतरजनवदुपेक्षणीयः तद्वचनैर्वंचिता प्रतारिता। वारं वारं स्वामिमतो घमेकृतेहं नानाप्रकारं वाक्यैः वारितेत्यर्थः। कः स्याद्ब्रह्माणि लोकेषु गमने सर्वनाम्नि च पावके च मयूरे च सुखशीर्षज्जलेषु कामिति विश्वः। शरणं गृहरक्षित्रोरित्यमरः। ध्रुवपदं केवलं सखीजनैर्वंचिता किं अपि कोरि प्राणाभीष्टे नापीत्याहाहा हरिस्मरणमंत्रेणैव सकलदुःखहर्तापि कथितसमयेपि कथि तसमयेपि कथितो यः समयः कालः तस्मिन्नेवावसरे सर्वथैव मया संकेतस्थलमागंतव्यं।

अहह खेदात्तदापि वचनं संकेतकुंजे न यया यो न प्राप्तवान्। अत्ता मम भेदं यो चनं नवीनाद्रु
तताऽरुण्यं अमलरूपमपि निर्मलसौदर्यमपि यद्द्वयं विफलं अकृतार्थमिस्यर्थः। यौवनं
लक्षणं नितं कोविपुलमध्यं कृत्रामं गंवरद्युतिपीनो कुचो चुरुयुगरं भामंपूर्णयोचनं
तन्माधुर्यो न चित्रस्त्ता कांते त्राति सुचात्तिरासीन्मुखरूचादधारस्तोभिस्य प्रणयघनद्द
ष्यात्त चनकाः व्रजेन्नीष्याकामूल्लहितेवकलाया। मितिहरे निकुंजस्वाराज्येत्व मसि
सिकापट्टमहिषीति। भूषणा भूषणाप्याहि चमत्कारेण नेत्रयोः परस्परस्मृत्तमुद
ममलं तत्स्रकीर्तितिमति ॥१॥ अपिचाऽयघस्य श्रीकृष्णस्यानुगमनायानुसरणायवि
न्निरात्रो गहनमपि वनमपि चिन्नीलितं अनुभूतं। अथवा गाहनमपिपक्रुथमपिन
क्रियत्ततल्लतं। तेन श्रीकृष्णेनानि

यदनुगमनाय निशि गहनमपि शीलितं। तेन मम हृदयमिदमसम
शरकीलितं ॥२॥ मम मरणमेव वरमतिवितथकेतना। किमिह विषहामि वि

मित्तभूतेन ममं इदं हृदयं असमसरेण विषयबाणेन त्रभय कोटिल्यं न कीलितं विद्धं। असम
शरेण कामेन वा। एवं चिंतायाः मम मरणमेव वरं श्रेष्ठं न तु देहधारणं। किं लक्षणा हा। अ
तिवितथकेतना अतित्रायेन वितथं मिथ्याभूतं केतनं शरीरं यस्यास्ता दृशी। अकृतकार्य
त्वात्। अथवा। अतिक्रांत वितथं मत्संकेतनं लाछनं चिह्नि गियं मानवती प्रेष्ठासेक्ष्या पिजीवती
तियस्यास्तादृशीति अथवा। अतिवितथं निःफलं केतनं श्रेष्ठ संगमनं भविष्यतीति। सखी
नामुपनिमंत्रणं यस्यास्तादृशी। अथवा। अतिवितथं अतित्रायेन निरर्थकं जातं केतनं बहुप्रे
मणा चिरकालमनोरथशतैर्निर्मितं त्वाख्यादिभिः। निकुंजरूपं गृहं यस्यास्तादृशी इति हेतो
रिहवने अचेतना ज्ञानशून्या। अथवा। श्रीकृष्णे चेतनं यस्यास्ता दृशी अथवा। एवं विधायो
अपि श्रीकृष्णे चेतना बुद्धिर्यस्या सा तादृशी। विरहानलं विरहाग्निं किं किमिति विषहामि। स
हामि तस्मात् सूर्यं निश्चितं मे मरणमेव वरं मनागिष्टं यत्तदेहांतरं पितस्य त्राप्तिस्यात्। न्याय्ये श्रे

तो मनागिष्टमतं वरमिति धरणिः। चित्तं चेतनं तं वचडसमरः। केतनं लांछने काये गात्रे चोपनिमंत्रणे इति विश्वः। अतिचितं अचेतनेति। क्वचित्पाठः। तत्राति विश्वौ तं यं अति अर्थे चेतनं प्रत्याज्ञायस्यां सेत्यर्थः। चेतनं भूपदे चेस्यां तस्यां ज्ञायां च चेतनमिति विश्वः॥३॥ मामित्यादि अहह इति खेदे। इयं मधुरा सरसा मधुयामिनी वसंतरात्रिः मां परमसख रूपामपि विधुरयति विकलयति। कापि कृतं सुकृतं यया ता दृशी कामिनी सफलकामा योषा। हरिस्तस्याः पीडां हरती ति तथाभूतमनुभवति आलिंगनादिनेति शेषः। विधुरं विकले विश्लेषे भूषणे क्लेते इति विश्वः। मधुरं सरसं ज्ञेयं स्वादुन्यपि मनोहरे इति धरणिः॥४॥ अहह इत्यादि। अहह इत्यद्भुते॥

मामहह विधुरयति मधुरमधुयामिनी। कापि हरिमनुभवति
कृतसुकृतकामिनी॥४॥ अहह कलयामि वलयादिमणिभूषणं।
हरिविरहदहनवहनेन बहुदूषणं॥५॥ कुसुमसुकुमारतनुमनु
नुनार लीलया। स्रगपि हृदि हंति मामति विषमशीलया॥६॥

वलयादिमणिभूषणं कटकादिकं विविधशोभादिगुणयुक्तरत्नखचितमलंकारं मयं वा। हरिविरहदहनबहुनेन श्रीकृष्णविरहाग्निधारणेन बहुदूषणं कलयामि पश्यामि मदंगतापेन तादृशीनामपि तापकत्वमिति भावः॥५॥ कुसुमेति। स्रगपि पुष्पमालामि अतनुनार लीलया कामबाणविलासेन मां हृदि मनसि हंति ताडयति। कामबाणविलासेन बाण्यच स्रगपि पुष्पमय्येव अतो तल्लीलये उक्तं। कीदृश्या लीलया अतिविषमशीलया अतिशयेन विषमं शीलं स्वभावो यस्यास्तया। तदुक्तं। अतिपूर्वयं धनुर्विधाय मन्मथस्य महात्मनः। नारीमक्षतं कृत्वा भिनत्संतगतिं मनइति।

बाणस्तावदन्यक्षिप्तोन्यं हन्ति अयं तु येन धृतस्तमेव विध्यतीति वा। अथवा। अतनुशरीर लीलया स्थूलबाणचेष्टया। अतनुशरीररहितः प्रविशति न तु दृश्यते। अतो दुर्निवार इति वा। कीदृशीमां। कुसुमकुसुमार तनुकुसुमादपि सुकुमारा तनुर्यस्यास्तादृशी। स्वजातीयेन स्वजातियस्य हननमपीति विषमत्वमेव प्रतिपादितं। पीडासहना सामर्थ्यं च ध्वनितं। कुसुमसुकुमारतनुरितिपाठे। किंभूता स्त्रक्पुष्पमयी सुकुमारा च तनुः सूक्ष्मा चेति। अत्रापि विषमत्वे तात्पर्यार्थः। शीलं स्वभावे सद्वृत्ते स्यमरः॥६॥ किंच। अहमिहेति अहं दुःखिता पितदेकनिष्ठा।

अहमिह निवसामि न गणितवनवेतसा स्मरति मधुसूदनो मामपि न चेतसा॥७॥ हरिचरणशरणजयदेवकविभारती॥
वसतु हृदि युवतिरिव कोमलकलावती॥८॥ ६ ६॥

इह निकुंजे निवसामि तिष्ठामि। कीदृशी न गणिताः न संभाविताः वनवेत्रलताश्रयया। अनेन दुर्लंघ्यमप्युल्लंघितमिति सूचितं। अथवा। शिरश्चालनेन गणिताः न मन्येषयं स्यापरिसंख्याता वनवेतसवृक्षाः यया सा। गणितवणवेतस्याहं इह नवनसामि किं अपितु निवसाम्येवेत्यर्थः। मधुसूदनः श्रीकृष्णो मां च तसा स्मरत्यपि न। मधुसूदनपदेन कठिनत्वं चापलं च सूचितं। मधुवसंतं मधुररसं वा नाशयतीति मधुसूदनः स्वाधीनचेतो मात्रसाध्यं यत्र स्मरणमपि न करोति। तत्र स्निग्धेन मनसा कुतो मिरं तरं ममानुवृत्तिरतिचेतसेत्यनेन ध्वनितं मन्यथा स्मरणस्य चेताजन्यत्वेन चेतसस्य स्य वैयर्थ्यापतेः॥७॥ हरिचरणेति। हरिचरणौ शरणं यस्य एतादृशो यो जयदेवकविः। तस्य भारती वाणी हृदिये वसतु अर्थाच्छ्रीकृष्णभक्तानामिति। हरिचरणशरणेत्यनेन न यायमडरि

लौकिकत्वयुक्ता। कीदृशी कोमला ऽकठिणवर्णा कोमलत्वं सुखोच्चारस्पष्टार्थपरिभूषित इतिकलावती कवित्वकलायुक्ता। केच युवतिरिवा कीदृशी कोमल मृद्वङ्गी। कलावचतुः षष्टिकलाकुशला। अथवा हे कोमल रसश्रोतः हरिचरणशरणेत्तिवा। कलावती कलो अतिक्रान्ता ईलक्ष्मी मोक्षादिसंपत्तिर्यया सा। यां भारती गायतां शृण्वतां मोक्षादिकमप्या दरो न भवतीत्यर्थः। युवतिरपि कलो प्रणयकलहे मानादिभंग्यातिक्रान्ता लक्ष्मीर्यया सा। अथवा। कलो प्रेक्ष्यमानतातु अधिका लक्ष्मीः शोभाकाम्यसंपत्तिर्यस्याः सा इतिवा। अथवा हे कोमल भक्तवात्सल्येन परममृदुल श्रीकृष्ण तव भक्ता स्यभारती श्रीराधावर्णनरूपवा णीयथा युवतिः पूर्वोक्ता वल्लभा श्रीराधा चत्तच्चेतसि वसति तथैवेयमपि वसत्तित्यर्थः॥८॥ इतिश्री गीतगोविंदे त्रयोदस्य प्रबंधः॥१३॥ ॥ तदेव मनया ऽष्टपद्या वि

तत्किं काममपि कामिनीमभिसृतः किंवा कलाकेलिभिर्बद्धो बंधुभिरंधका
रिणि वर्णाभ्युपगमे किमुद्भ्राम्यति। कान्तः क्लांतमना मनागपि पथि प्रस्था
तुमेवाक्षमः संकेतीकृतमंजुलवंजुललताकुंजेपि यन्नागतः॥४७॥ ॥

वंजुल

त्र लब्धायाश्चेष्टितमनुवर्ण्य दानीतस्याः श्रीकृष्णविकातिप्रेमदर्शनायतदनंतरमपुलकं ठां वर्णयति। तत्किमिति। कान्तः कमनीयवलभः श्रीहरिः संकेतीकृतो यो मंजुमनोहरः वंजु लः लताकुंजो यत्र लतागृहं। तत्रापि यत् प्रत्ताहेतो नागतस्तत्कामपि कामिनीं कामातुरां किं अभिसृतः तदभिमुखं गतः। कामिनीपदेन स्वसौभाग्याधिक्यं कटाक्षयति। सः स्व भावतस्तु मामेवाभिसरतितयाबलात्किं माकृष्ट इतिभावः। ननुत्वां विहाय कथमन्यामभि सरिष्यतीत्याह किंवेति। यद्वा। नित्यप्राप्तसंगमैर्बंधुभिर्मित्रैः कलाकेलिभिः क्रीडाकौशलैः बद्धो रुद्धः। इदमपि न घटते। मद्विलासे स्पृहा स्तरोह मत्राकोस्तत्राहा चि। मुचिनर्के मामभिसरन् संकेतस्थमलभमानः अंधकारिणि घनतरुछाययानिबिडांधकारवनोपान्ते संकेतीकृतविपिन समीपे भ्राम्यति परिभ्रमणं करोति किं। ननु नागरशिरोमणेः सहस्रशोनुभूतस्थलभ्रमः कथं भविष्यतीति किंवियाह कुंतमना

गीत

यं

इति क्रांतं मद्विश्लेषदुःखेनोपतप्तं मनो यस्य तादृशः मनागपि पथि मार्गे त्र स्थातुमेवाक्षमः तेन चलितुमेवासमर्थ इत्यर्थः। उक्ता त्वियं नायिका। उत्का भवति सा यस्याः संकेतं नागतः प्रियः। तस्यानागमने हेतुं चिंतं साकुलाय येति। तल्लक्षणं। संशयाक्षेपालंकारो यं। तदुक्तं दंडिना। किमयं शारदं भोदः किं वा हंसकदंबकं। रुतं नूपुरसंस्पर्द्धि श्रूयते तन्न तोयदः। इत्येषसंशयाक्षेपः संशयो यन्निवर्त्यते। धर्मेण हंससुलभेनास्पृष्टघनजातिनेति। चितर्क किं किमूते चेसमरः। उपांतसंविधे चेति विश्वः। ५७। अथानंतर धाए तद्दृश्यमाणं दृष्टवदाह। स्वयमवलोकितमिव कथयति। किं कला सखी माधवमंतरेण श्रीकृष्णं विना आगतां वीक्ष्य दृष्ट्वा। किंभूतां सुखी विषादमूकां। दुःखातिशयेन वाचा त्तीवकुमशक्तां। कीदृशी जनार्दनं श्रीकृष्ण

अथागतां माधवमंतरेण सखीमियं वीक्ष्य विषादमूकां। विशंकमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह। ५८। स्मर समरोचितविरचितवेषा गलितकुसुमभरविलुलितकेशा॥१॥ कापि चपला मधुरिपुणा विलसति

कमानातर्कयंती। जनस्यार्दनस्वभावो यमतस्तस्य मम संतापकत्वमुचितमिसभिप्रायेण जनार्दनपदोपादानं। उपेंद्रवज्रावृत्तं। पक्षांतरे च। श्रीकृष्णं संकेतनिकुंजे ऽलक्षमाना तत्रापि व्याकुलां श्रीराधां निरीक्ष्य सखी विषादमूकां तां वीक्ष्येत्यर्थः। ५७। यदाह तद्गीतेन दर्शयति। स्मरसमरेति। ध्रु०। गीतस्यास्य वसंतरागः एकतालीतालश्च। गीतार्थस्तु। कापि युवतिः मधुरिपुणा श्रीकृष्णेन सह विलसति क्रीडति। किंभूता अधिकगुणा। अधिकाः सौंदर्यादयो गुणा यस्याः सा युवति विलसति। इति नायिकाकर्तृत्वे विपरीतमुक्तं। तेन चान्याभिमुखस्य बलाद्रमणे नाधिकगुणेति। न्यूनगुणे साकूतमपि व्यज्यते मधुरिपुणेति मधुरः सा न भिन्नेन च पलेनचेति कटाक्षितं च। ध्रुपदं। तद्विपरीतरतचेष्टितमाह। किंलक्षणा स्मरसमरः कामसंग्रामः सुरतमिति यावत्। तत्रोचितो योग्यो विरचितः कृतो वेषः प्रसाधनं यया सा। पुनः कीदृशी गलितानि कुसुमानि येभ्यस्तादृशा ईषद्विलुलिताः स्रस्ताः श्रीकृष्णेन सकचग्रहचुंबनादानेन केशा यस्याः सा। विपरीतरते नायिकायाः केशग्रहणपूर्वकमेव चुंबनं कार्यमिस्तु केशाकू

क

कथयि नायिका मामितं विकं गो

कुसुमभरे निपतिते गलितः कुसुमभरेण स्पर्शाद्व्याविप्लुलितकेशाः

हरेपरिरंभणे नालिंगनेन वलितो जातो विकारः अनंगविक्रिया यस्याः सा कुचावेव कलशौ तयोरुपरि तरलितः चंचलीभूतो हारो यस्याः कुचयोः कलशत्वेन तदुपरि हारस्थापनेन निर्विघ्नसुरतोत्सवनिर्वाहाय मंगलकलशस्थापनमिव कृतमिति ध्वनितं कामकेलौ हरिणा दूरीकृतत्वात् संभोगकौशलेन तद्धर्षितापहरणाद्वा ॥३॥ क्रीडावशात् चलद्भिश्चंचलैः अलकैः चूर्णकुंतलैः ललितो मनोहरो आननचंद्रो मुखचन्द्रो यस्याः सा लीलिया चालकानां मुखे चलत्सकलंकचन्द्रमसः प्रतीतेः पुनः कीदृशी तस्य श्रीकृष्णस्य अधरपानरभसेन वेगेन कृतात्तेन्द्रा तत्सुखानुभवेन नेत्रमीलनं यया सा अतिमादकाधरपानेन मम तया अस्तपूर्णे स्पर्धः ॥३॥ चंचलेति ॥ यां विना क्षणमप्यहं स्थातुं न पारयामि तामेव मम प्राणवल्लभेति ॥

हरिपरिरंभणवलितविकारा कुचकलशोपरि तरलितहारा ॥३॥ चिचलदलकललिताननचंद्रा तदधरपानरभसकृततन्द्रा ॥४॥ चंचलकुंडलललितकपोला मुखरितरशनजघनगतिलोला ॥५॥ दयितविलोकितलज्जितहसिता बहुविधकूजितरतिरसरसिता ॥६॥

एवं तस्यानुनयं श्रुत्वा धूर्तज्ञातो स्येयं कथयंत्यस्याः स्त्रीरभ्यालनेन क्रीडावेगेन वा चंचले लोचे ययोस्ताभ्यां कुंडलाभ्यां ललितौ कपोलौ यस्याः सा ॥ पाठांतरे दलितो मृदितो वा तिगतागतेन परमसुकुमारत्वात् ॥ किंच मुखरिता शब्दायमाना रशना क्षुद्रघंटिका यत्र तादृशस्य जघनस्य गतागते न लोलाचंचला ॥ यथा संग्रामे विविधवाद्यैः शूराणां चापलं भवति तथास्यापि सुरतसंग्रामाति चापल्यरशनायाः मुखरत्वमिति भावः ॥५॥ दयितेति दयितस्य श्रीकृष्णस्य विलोकितेनाभिप्रायविशिष्टनिरीक्षणेन लज्जिता लज्जावती हास्ययुक्ता चेत्यर्थः पुरुषायमानायाः तस्याः अधःस्थितस्य अंगायमानस्य तस्यावलोकनात् ईषद् उत्पन्नलज्जायाः सुरतेनुपयोगित्वात् संभोगावेगेन हस्यमेवाभूदित्यर्थः उक्तं च सुरतादन्यत्र लज्जा परमभूषणमिति ॥ बहुविधपिकस्त्रीखीकुलहंसादीनामिव नानाप्रकारकूजितं शब्दितं यत्र तादृशो यो रतिरसः संभोगानुरागः तेन रसिता हृष्टा बहुविधं परावतादीनां यत्कूजितं तद्वद्रतिरसेन रसितं

द्वितं यस्याः सेति वा रसितं तद्धेतुकं हृष्टेति ॥५॥

विपुलेति। विपुलाः प्रचुराः ये पुलकाः रोमांचास्तेषां पृथुर्महान्यो वेपथुः कंपस्तस्य च भंगास्तरंगाः यस्याः सा। रोमांचकंपयोरुत्तरोत्तरोत्पत्त्या तरंगसाम्यं। भंगास्तरंगे भेदे च भंगो जयविपर्यये ति। विश्वः। अपि च एवंभूतसुरतसुखानुभवविच्छेदो माभूदिति सुरतायासेन विश्वसितं निश्वासः परमानंदावाप्तिसान्निध्यसूचकानुभवः अनंदावाप्त्या च निमीलितं अक्षिमुद्रणमिति श्वसितनिश्वसितनीमीलिताभ्यां विकसन्प्रकटीभवन् अनंगः कामः रेतो लक्षणो यस्याः सा। तदुक्तं। मुहुः स्वजघनाश्लेषः सीत्कारोचितलज्जता। हुंकारो घूर्मितं नार्याश्चीजसान्निध्यसूचकमिति। रतिरहस्ये। मूर्छना मीलनं चाक्षणोः श्रुतिकालस्य लक्षणमिति। श्रमजलेति। कीदृशी श्रमजलकणभरेण सुरतायासप्रस्वेदबिंदुसमूहेन

विपुलपुलकपृथुवेपथुभंगा। श्वसितनिमीतविकसदनंगा॥ध्रु०॥
श्रमजलकणभरसुभगशरीरा। परिपतितोरसि रतिरणधीरा॥७॥
श्रीजयदेवभणितहरिरमितं। कलिकलुषं जनयतु परिशमितं॥८॥

सुभगं मनोहरं मुक्तास्रकसंशोभांद धच्छरीरं यस्याः सा। किं च। उरसि श्रीकृष्णस्य वक्षसि परिपतिता पुनः सुरताय कृष्णोत्थानशंकया स्वभुजाभ्यां तमाचृत्य पतितेत्यर्थः। पतितेति। निःसहत्वं कथितं तेन च सुरतांतं सूचितं यदुक्तं। अंगस्वेदः श्लथिवंच केशाच श्वासादिसंयत्तिः। जाते चुति सुखे नार्या विरामे छान्वजायते। बंधश्चायं हंसलीलकं इति। नारी पादद्वयं कृत्वा कांतस्योरुयुगोपरि। कटिमांदोलयेदाशु तद्बंधो हंसलीलकं इति। कीदृशी रतिरणे सुरतसंग्रामे धिरास्थिरा चतुरा चालचलेत्याकपाणवद्रुसमरः सुश्रगो सुंदरश्चेति विश्वः। तथा च सप्तभिः पदैर्नायकस्य नेरपेक्षेणैव तावकायाः क्रियाकथना सूर्वोक्तं न्यूनगुणत्वमेव सिद्धमिति भावः॥७॥ श्रीजयदेवेति श्रीजयदेवकवेः भणितं यद्धरेः रमितं क्रीडितं तत् कलेः कलियुगस्य कलुषं पापं हरिभजनवैमुख्यरूपं अर्थाद्गायकानां श्रोतॄणां च परिशमितं त्रनयतु निःशेषेण शांतिं जयं नेतु॥८॥ श्रीगीतगोविंदे चतुर्दशप्रबंधः॥१४॥ ॥

संप्रति चंद्रोदय अधिकतरं व्यथयतीत्याह। विरहइति। अथेति विषादे। अयं दृश्यमान
श्चंद्रो मम हृदये मदनव्यथां कामपीडां अतीवाधिकं तनोति विस्तारयति। कीदृशः वि
रहेण मद्विश्लेषेण पांडु धूसरं यं मरारेः श्रीकृष्णस्य मुखांबुजं वदनकमलं तस्य द्युति
रिव द्युतिर्यस्य तादृशः। मदनव्यथा कथं विस्तार्यते। पांडु तन्मुखस्मरणं दुःसहा व्य
थाजायतइति भावः। किं कुर्वन्। वेदनां ज्ञानमपि तिरयन्। तिरोहितं कुर्वन्। चंद्रस्तदर्शये
धमपि विस्मार्य चित्तनोमूलनमपि करोतीत्यर्थः। व्यथाजनकत्वे हेतुमाह। मनोभुवः काम
स्य सुहृन्मित्रं चंद्रस्येश्वरमनोजन्यत्वेन कामस्य च मनसिजत्वेन सोदरत्वात् तेनमपिस्तु
ध्वस्य कामस्य सहाय्यं चिकीर्षता चंद्रेण व्यथा जन्यतइति भावः। चंद्रमा मनसो जातइति

विहरे पांडु मुरारिमुखांबुजद्युतिरयं तिरयन्नपि वेदनां। विधुर
तीव तनोति मनोभुवः सुहृदये हृदये मदनव्यथां॥४९॥ ॥ ॥

वेदनाज्ञानदुःखयोः। अयशब्दो घविषादेव सबुद्धे स्मरणे पि चेति विश्वः। तिरोंतर्द्धौ तिर्यग
र्थइतिच। तिरयन्नमकटी कुर्वन्निति वा। यमकालंकारश्चात्र। तदुक्तं दंडिना। एकद्वित्रिच
तुः पादैर्यमकानां विकल्पना। आदिमध्यातमध्यापाद्यंतां ते सर्वएव चेति। पक्षदृ
येप्येवं। तथापि द्वितीये व्याख्यानांतरं तद्वायेति स्मरणे अये हन्त स्मरामि यत् श्रीकृष्णे
नमयेव क्रीडत्तमिति वेदनां दुःखं तिरोहितं कुर्वन्नपि किंतु संप्रति तं न पश्यामीति मनो
भुवः सुहृत् मां व्यथयतीत्यर्थः॥४९॥ पूर्वगीतेन कस्याश्चिद्रमण्याने रूपदानी स्वाधी
नभर्तृकांतां स्वमनोरथेनैव वर्णयति। समुदितेत्यादिना गीतस्यास्य गुर्जरी रागः ए
कतालीतालः। गीतार्थस्तु। विजयी मंडनादिकोद्गालेन सर्वातिशायी निःशंकइति वा
तद्गुणे न पराभूतो वा। मुरारिरिति तद्वधकार्कश्येन रसाभावं सूचयति। पश्चात्तरे मुरा
रीपदेन सामर्थ्येन निर्भयक्रीडने। मुरयति वेष्टयति नारीः स्वभुजाभ्यामिति पुन

रपितनोत्सुकत्वं वा। अधुना सांप्रतं यमुनापुलिनवने यमुनायाः सैकते मदनं तस्मिन् भ्रमति क्रीडति। अनेन संभोगश्रमहरणभोगयोग्य देशसंपत्तिर्दर्शिता॥ ध्रुवपदं। क्रीडामाह। रमणीवदने रम्यत्वे तस्या मितिरमणीत्तस्या मुखे सपुलकं रोमांचसहितं यथास्या देवं मृगमदतिलकं कस्तूर्याविशेषकं लिखिति॥ नानावैचित्र्यनिर्माति। कीदृशे वदने। समुदितः सम्यगुरुतानकूलकथनायककरस्पर्शेन कामो यत्र तादृशे। अथवा। श्रीकृष्णस्य समुदितो मदनो यस्मात्तादृशे।

समुदितमदने रमणिवदने चुंबवलिताधरे। मृगमदतिलकं
लिखति सपुलकं मृगमिव रजनीकरे॥१॥ रमते यमुनापुलिनवने विजयी

स्मात्तादृशे। पुनः कीदृशे। चुंबनाय। अधरपानाय वलितः सन्मुखीकृतस्सकोचितः। श्रीकृष्णेन तयैव वा तन्मुखचुंबनायाधरो यत्र तादृशे। अथवा। चुंबनाय कुरेण वलितः सेवितः। सिंदूररेखादिरचनाव्याजेन चिरमुपासितोधरो यत्र तादृशे। चुंबनाय बहुदैन्येन याचितो वा। वलितं याचितं पि स्याद्वलितं सेवितेपि चेति विश्वः। कस्मिन् किमिव। रजनीकरे मृगमिव। पूर्णचंद्रे हरिणमिव। कीदृशे चंद्रे। समुदितो मदनो यस्मात्तादृशे। अतो चंद्रदर्शनाद मृतमिवाधरपाने प्रवृत्तिरिति। अत्राल्हादकारिमुखस्यालकसामीप्यं भजमानस्य निशाकरसाम्यं कस्तूरीतिलकस्य च मृगसाम्यं प्रथमपक्षे। समुदितमदने चुंबनवलिताधरद्वयेनेन तस्याः भावोद्रेकः कथितः न तु नायकस्येति कटाक्षितं रजनीकरसादृश्येनापि शोभायाः न स्थैर्यमिति। निसमेव श्रीराधायामानुकूल्येन स्थिरानुरागतातस्या एव प्रतिक्षणं सौभाग्यस्य शोभाया वृद्धिः॥१॥

किंच घनं चयेति। तस्याः चिकुरे केशपाशे जाता येकवचनं कुरबककुसुमे पीतपुष्पविशेषं झिंटीति पर्यायं अम्लानशोण पुष्पं वा रचयति। यथा मिन्या समर्पयति। कीदृशे चिकुरे घनचयरुचिरे मेघपटलवन्मनोहरे। पुनः कीदृशः रतिपतिः कामः स एव मृगः करी तस्य कानने निवासवने अस्य काननस्योद्दीपनविभावत्वेन कामोपि कामयमानः स्त्रीसहित एव केशबंधनपाशे निबद्धो भवति निश्चती तिरतिपतिपदोपादानं। पुनः कीदृशे तरलिततरुणानने। तरलितः चंचलीकृतः ततणाननः तरुणश्रेष्ठः श्री..

घायेन कामबोधस्यार्थः। तादृशे तरलितो विविधोत्प्रेक्षाभिः तद्गुणवर्णनेन मुखरीकृतः तरुणस्तस्य नित्यकिशोरस्याननं मुखं येनेति वा याज्यां तदा तरलितान्यद्भुतानि बालवृक्षाणां पुष्पादिरूपाणि... ननानि यस्मिंस्तादृशे। कामोबाधकत्वात् सुणविकाशः सग्रथित कुसुमैके शेषसाम्यं युक्तं। कीदृशं कुसुमं चतिशायितायस्यतत्॥

घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने। कुरबककुसुमं चपला

सुषमं रतिपतिमृगकानने॥ ४॥ ॥ टीका। चपला सुषुमं चपलायाः विद्युद्रूपकालंकारश्चात्र। अन्यनायिकारमणपक्षे रचयंतीस्यमेनत केशादिगुंफने करकंपाद्यनुभूत्या नायकस्य तस्यामनासक्तिरिति ध्वनितं। तद्यथा। मा गर्वमुद्वह कपोलतले चकास्ति कृष्ण स्वहस्तलिखिता नवमंजरीति। अन्यापि किं न सखि भाजनमीदृशीनां वैरिणाचेद्भवति वेपथुरंतरायइति मृगपाशोकुरंगे च करिनक्षत्रभेदयोरिति। कुसुमं पुष्पफलयोरिति। सुषुमा परमा प्युता चितिः। चिकुरः कुंतलो बालकचः केशास्त्रिरोरुहइत्यमरः॥ ४॥ अपि च। कुचयुगमेव गगनं तस्मिन्नमलं निर्मलं मणिसरं मुक्ताहारं तदेव तारकपटलं नक्षत्रसमूहं घटयति योजयति। आकाशास्थितशोभामत्र निर्माति। कीदृशे सुघने सुतरां पीने अतिकठिण इत्यर्थः। पुनः कीदृशे सुधेने मृगमस्यकस्तूर्या रुचिः दीप्तिस्तया रुषिते व्याप्ते पुनः कीदृशे नखपदं नखांक स एव शशांकः तेन भूषिते लंकृते। नखक्षतं चेदमर्धेंदुसंज्ञं बोध्यं। तदुक्तं पंचसायके। अर्धेंदुसंकाशमिदं नखाग्रे रर्धेंदुसंज्ञं कथितं समासात्। कक्षानितंबस्तनपार्श्वकंठेनात्यमेतत्सार

जं संदेवेत्ति अतोत्र तुरीपदमस्यार्थ चंद्रपरं गगनपक्षेपि कीदृशे गगने सुघने गतिविस्तारव
ति अभूतोपि मार्गश्रोभनाघनामेघायस्मिन्निति वा। पुनः कीदृशे मृगमदकांतिशोभिते
चंद्रार्धश्वालंकृते विमलतारकापटलेच। यत्रैवं कविसंप्रदाय। आकाशस्य श्यामत्वेनै
व निरूपणा। सागरूपाकारत्वमत्रज्ञेयं। घनः सांद्रदृढे दार्ढ्ये विस्तारे लोहमुद्गरइत्ति विश्वः॥
गुणितरूषितेत्ति विश्वः। कुजयुगयोः गगनमिति केचित्तदा सुघने शोभन विस्तारवति।
अन्यत्समानं॥ शोजितेति। मृदुभुजयुगुले तस्या कोमले बाहुयुगुले मरकतवलयं
इंद्रनीलमणिकंकणं तमेव मधुकरनिचयं भ्रमरसमूहं वितरति अर्पयति। कीदृशे भु
जयुगुले निजमार्दवेन गौरतयाच लितमभिभूतं विसकलं मृणालखंडयेन त
दृशे। पुनः कीदृशे करतलमेव नलनीदलं पश्चिनीपत्रं यत्र तादृशे॥

घटयतिसुघने कुचयुगगगने मृगमदरुचिरूषिते। मणिसरममलं
तारकपटलं नखपदशशि भूषिते॥ जितबिसशकले मृदुभुजयुगुले क
रतलनलिनी दले। मरकतवलयं मधुकरनिचयं वितरति हिमशीतले॥
॥रतिगृहजघने विपुलापघने मनसिजकनकासने। मणिमयरशनं तो

पुनः कीदृशे हिमशीतले हिमादप्यतिशीतले। संतापहरत्वात्। यद्यपि कविसंप्रदाये कापि
करतलस्य पश्चिनीपत्रत्वेन वर्णनं नास्ति तथायत्र भुजस्य विसरूपत्वान्न विरुद्धमति। किंवा
अरविंदाधिक्यादिव मृणालदंडए वं भ्रमरमंडली स्थितेति भाव। नलिनी पद्मिनी पद्मव्यो
मा सिंधु सरोवर इति विश्वः। मरकती नीलमणिरिति। कंकणे वलयो भवतइति धरणिः। वि
श्राणं वितरणं दानं च प्रतिपादनमित्यमरः। रूपकालंकारायं॥ रतिगृहेति। रतेः शृंगार
स्य गृहे आश्रये जघने मणिमयरशनां मुक्तामयीं मेखलां विकरति क्षिपति। ननु बध्ना
तीति ध्वनितं। कीदृशे जघने विपुलापघने। विपुलो विस्तीर्णापघनो अवयवो यस्य तादृ
शे अतिमांसलइत्यर्थः। अथवा। विपुलं महत्वं मुक्तं अपगतो घनः काठिण्यं यत्र तदपघनं
कोमलं तच्च तच्च तथा तस्मिन् महत्त्वसौकुमार्ययुक्ते इत्यर्थः। विशिष्टं पुलं पुलकाय स्मिन्स

विपुल (?) ... (marginal note, partly illegible)

विपुलं सादृशोऽपघनः शरीरावयवस्तो इदितमाणिक्यकारि (vertical margin, partly illegible)

तिवा। पुनः कीदृशे मनसिजे कर्णिकासने। कामस्य सुवर्णमिराज्यपीठे। कीदृशे मणिमयरसनं तोरणस्य मांगलस्रजः हसनं तपहासो यस्मात्तादृशे। अन्योपि यदा सिंहासने तु पविशति तदा तत्र परिजनैः चंदनमालिनाबध्यते। अतो मनसिज सिंहासनीभूते तस्याः जघने। क्षुद्रघंटिकारूपमांगल्यस्रजमयं निबध्नातीमवः। पुनः कीदृशे जघने। कृतं वासनं तदनुरूपनृत्यादिकादिकं वस्त्रे यत्र तादृशे। कृतं वासनं श्रीकृष्ण वशीकरणाय शृंगाररसोक्तधूपविशेषो यत्रेति। अथवा। कृतातत्कांतिदर्शनात्श्रीकृष्णे वासना भोग यस्य तादृशे। अथवा। कृतं वासने कामनस्थानं यत्र तादृशे। यद्यपि मनसिजकनकासने नैव कामस्थापि नित्यं प्राप्ते यस्यानियंतसान्निध्य सूचनये तदुक्तं। अंगप्रतीकोवयचोपपद्यनाथ कलेवरद्वयमरः। वासनावसने चाथ स्थाने ज्ञाने च धूपन तिविश्वः। फलं स्याः स्थूलकच्चेति। रतिकामस्य भार्या यांस्या द्वागे सुरतं पिचेति। रूपकालंकारः। ५। चरणकिसलयेद्वृति। चरणाकिसलये चरचरणकिसलये कमलानिलयेनखमणिगणपूजिते। बहिरपवरणं यावकभरणं जनयति हृदि योजिते। ६। णएवकिसलयं ताम्रत्वा कोमलत्वाच्च स्वच्छपदपल्लवे यावकभरणं अलक्तकपूरणं करोति। कीदृशे। कमलायाः श्रियः निलये आश्रये कांसानिवासे स्यर्थः। पुनः की० नखा एवमणिगणाः मणिसमूहास्तैपूजिते लंकृते। श्रीमन्नंदनंदनस्य दुःप्राप्यतया श्रीः स्वविभूतिरूपैमणिभिः तस्त्रियाञ्चरणं संपूज्य आत्मानं भगवसर्पणायतत्चरणसौदर्येलीनाबभूवेति भावः। कीदृशे। यावकभरणं बहिरपवरणं। बहिर्भूतमपवरणं संचरणं यस्य तादृशे स्पष्टमित्यर्थः। चरणस्य स्वभावरक्तत्वान्नावरकमितिवा। पुनः कीदृशे चरकिसलये। हृदियोजिते स्ववक्षस्यनुरागातिशयेन योगप्रापिते। स्वहृदये तच्चरणपल्लवं निधाय यावकं रचयतीत्यर्थः। अथवा। किंभूते हृदि। कमलश्रियाः गृहे। पुनः कीदृशे नखान खक्षतान्येवमणिगणाः तैवपूजिते भूषिते श्रियायुक्ते पिहृदियदायं चरणं धारयंतीतितस्याः सौदर्याधिक्यं सौभाग्यातिशयं च कथितमितिभावः। पक्षांतरे कमलायाः वरस्त्रियः श्रीराधायाः निलये निवासे तथा च तन्नखक्षतयुक्ते वक्षसि स्वयमेवालक्तं करञ्चरणाय योजिते दाक्षिण्ये न यावकभरणं जनयति सामान्यः करोति। न तु चित्रादिरचनेनातो बहिर्भूतमयञ्चरणमितस्ततः स्खलितेमित्यर्थः। चरणकिसलये नखमणिगणपूजितेरक्तत्वकिसलयमणिगणयोः

रूपकमिदं।तदुक्तं दंडिना॥ इदं मंदस्मितं ज्योत्स्नास्निग्धनेत्रोत्पलं मुखमिति। ज्योत्स्नोत्पलयोरयोगा
दितिअयुक्तं नामरूपकं। नखः कररुहे सौंडे गंधद्रव्येन संमत्तमिति विश्वः। दीरमयती। ति। एव
कामपि सुदृशं शोभनेदृशौ नेत्रे यस्यास्तां। खलो दुर्जनो हलधरसोदरो बलभद्रस्य भ्राता श्रीकृ
ष्णः तस्मिन्सुभृशं अतिशायेन रमयति सति। हे सखि वद कथय। इह विटपोदरे कुंजमध्ये चि
रं सरसं रहिते यथा स्यात्तथा ऽतएवाफलं च यथा स्यादेवं चिरं बहुकालं व्याप्य किं मित्यवसंस्थि
तास्मीत्यर्थः। हलधरसोदरेति तं ग्राम्यत्वनोपालभति। विटपो द्रोलवणे धूर्तमूर्खके खदिरे पिच्चे
ति विश्वः। अथवा इह विटपोदरे विटपोत्ति धूर्तस्तादृशस्य चोदरमभ्यंतरं यस्य तस्मिन्नेवं
विधधूर्जनिमित्तं निमित्तसप्तमीयं। इहस्थले विरसमफलंच कमिसव

रमयति सुभृशं कामपि सुदृशं खलहलहलधरसोदरे। किमफलमव
सं चिरमिह विरसं वद सखि विटपोदरे॥७॥ इह रसभणने कृतहरिगुण
नमधुरिपुपदसेवके। कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके॥८॥

समेवेत्यर्थः। पक्षांतरे। सप्तमिः पदैः सख्योक्तमिदमित्यपि व्याकुर्वंति। दृशं ते कामपि सुदृशं राधा
भिधां खल हलधरः बलभद्रस्तस्य भ्राता तरिदुष्ट मदन समर्थं बिकवतीत्यर्थः। विटपोदरे च चतु
र चूडामणौ रमयति इह वने किमफलं चिरं सेवा। अवसं अपि तु सफलं सरसमेवेत्यर्थः। नि
र्भयकलि संपादनाय हलधरसाहचर्यं ध्वनितं।७। इह एतत्काव्यकर्तरि कवीनां नृपे जयदे
वके। कलियुगे चरितमाचरितं दुरितं कलियुगेन चरितं कृतं वान वसतु। न तिष्ठतु। कीदृ
शं रसस्य शृंगाररसस्य शृंगाररसस्य भणनं कथनं यस्य तादृशे। पुनः कीदृशे। कृतं
हरेः गुणानां चिंतनं येन तादृशे मधुरिपोः श्रीकृष्णस्य पदसेवके दुरितध्वंसनसा
मर्थ्यद्योतनाय मधुरिपुपदोपादानं।८। ॥ इति श्रीगीतगोविंदपंचदशः प्रबं
धः॥१५॥

हेदूतिदौत्यकर्मकुशलेनिर्दयोदयारहितोनतुएतत्रशठःकृतगूढमपराधोयदिनायातःतन्
हित्वंदूयसेकिंकिमितिदुःखिताभवसि।केवलंशठोनभवतिकिंतुधृष्टोपीत्याह।स्व
छंददूतिसबहुवल्लभोनेकनारीप्रियोऽतएवस्वछंदंनिःशंकंरमतोयथाकयाचिद्दृ
पिकायासहकेलिंकरोतीत्यर्थः।तत्रास्मिन्नर्थेतेकिंदूषणंनकमपीत्यर्थः।ननुक्षणं
समाश्वासिहियावसुनरपतदंतिकंगत्वात्तमानयामीत्यतआह।पश्येत्यादिइति।अद्यैदानी
मेवाश्चर्यंयस्यप्रियस्यश्रीकृष्णस्यआद्यप्रियस्येतिवा।संगमायमिलनायेदंममच्चे
तोतःकरणंस्वयंस्वयमेवनतुयत्नेनयास्यतिगमिष्यति।कीदृशं।यदितस्यप्राण
कोटिवल्लभस्यगुणैःसौदर्यादिभिराकृष्य

नायतःसखिनिर्दयोयदिशठस्त्वंदूतिकिंदूयसेस्वछंदंबहुवल्लभः
सरमतेकिंतत्रतेदूषणंपश्याद्यप्रियसंगमायदयितस्यो॰
कृष्यमाणंगुणैरुत्कंठोतिभराद्दिवस्फुटद्दिदंचेतःस्वयंयास्यति।५०

माणंबलान्नीयमानं।अपरमपिगुणैरज्जुभिराकृष्यमाणंबलादन्यत्रनीयतइतिभाव।
कीदृशं।उत्कंठार्त्तिभराद्दिवस्फुटत्।उत्कंठाऔत्सुक्यंआर्तिःपीडातयोर्भरोतिशयःतस्मा
द्दिवस्फुटत्प्रकटीभवत्बहिर्भवदित्यर्थः।अपरमपितत्स्वंतरसंकुलेस्थानेस्थितवस्त
सांकर्याद्बहिर्भवतीति।स्फटद्दिदलदितिवा।अनोपिभाराक्रांतःविदीर्यतएव।अतःप
रंदुःखंसोढुमशक्यतयातद्गुणानेवस्मरंत्याप्राणाएवत्याज्याःततोंतेयामतिःसागतिरि
तिस्वयमेवचेतस्तत्रयास्यतीतिकिमतःपरंतवतत्रगत्यायानेनेतिभावः।अत्रप्रथ
मपद्यैदशठोनायकउक्तःस्वछंदमित्यादिनाधृष्टःततुभयलक्षणं।शठोगूढाप
राधकृतधृष्टःसक्तान्ययुवतिभोगलक्ष्मापिनिर्भयइति।उयंप्रणयसंरंभोक्तिः।

सतुवृंदावनेश्वर्यामिनुकूलं एव निसंतगे प्रकटमिष्यति। क्रीयत्ते दा सखीचोपसेवितपदांभो
जरतिअत्रोत्प्रेक्षानामालंकारः। संप्रति श्रीकृष्णेन सहरमाणा या सौभाग्यातिशयसु
खं। तद्विना तद्विरहिता याश्च संतापमष्टपदा कथयति। ५। अनिलेत्यादिना। गीतस्यास्य
देशाख्यरागो रूपकतालः। गीतार्थस्तु। हे सखि या वनमालिना। श्रीकृष्णेन रामताक्री
डिता सा किसलयशयनेन पल्लवशय्यया ततपतिनंतयाभवन्ति। श्रीकृष्णसंगेन नतसु
खमेव भवतीति भावः। अथवा। या वनमालिना। अरमिता सा किसलयसघनेन नतपती
तिना पितुतपत्येवेति का का। नूरश्चालुनेन अननुभूतविषयला अभवतीति वा। या च मिता
साद्भुतनत्स्मरणयोः कंठया पुनः पुनः संगम

अनिलतरलकुवलयनयनेन। सपतिन सा किमलयत्रामनेन॥१॥
सखि मा रमिता वनमालिना॥ ध्रुपदं॥

तृष्णया किसलयशामनेतननत्तपमीतिना पितुतमा भवतीत्यर्थः। नुकंच श्रीभागवते। चलसि
यद्व्रजाच्चारयन्पशून्नालिन सुंदरं नाथ ते पदं। नीलतृणांकुरे सीदतीति नः कलिलतां मनः कांत
गच्छति। दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतं। घनरजस्वलं दर्शयन्मुहुर्मनसि
नः स्मरं वीर यच्छसीति। कीदृशेन वनमालिना। अनलेन वायुना तरलं चंचलं यत्कुवलयं तद्व
न्नयनं यस्य स तथा तेन। अनिलतरलकुवलयवत्सुंदरे नयने मस्येति वा। वनमालिपदेन शृंगा
रित्वमुपपादितं। अथवा। वनमा[illegible]न्याः वृंदावनलक्ष्म्याः अलिना श्रीराधायाः तद्वनस्य चरसा
स्वादलंपटे नभ्रमरेणेत्यर्थः। अनेन तया कांचित्कदाचिद्रमिता अरमिता च सा तपस्येव तस्या
सेवानुकूलत्वान्निःसमिति ध्वनितं॥१॥ अपि च। या वनमालिना रमितेति सर्वत्र योज्यं। सा
मनसिज विशिखेन कामबाणेन स्फुटति विदीर्णा भवति। अन्यदपि प्रतिपदं पूर्ववत् ज्ञेयं।

कीदृशेन विकसितफुल्लं यत्सरसिजपद्मं तद्वल्ललितं मनोहरं मुखं यस्य तेन। मनसिजविशिखेन तन्मुखपद्मेन कामबाणपीडानिवृत्तिरिति साश्चर्यं निरूपयतीति भावः। अन्येष्वर्थेषु चितमेव॥२॥ किंच। यारमिता सा मलयजपवनेन मलयाज्जातेन वायुना न ज्वलति न दीप्यते। कीदृशेन अमृतादपि मधुरं मृदुतरमिति न्यायेन कोमलवचनं भाषणं यस्य तेन। मदुक्तं मधुरयागिरा चटुलचाटुकया बुधं मनोज्ञया पुष्करेक्षणा विधिकरि रिमाचिरमुह्यतीरधरसीधुनाप्याययस्व नः इति। चंदनतरुसर्पसंपर्कसविषपवनज्वालाहरणाय वचन

विकसितसरसिजललितमुखेन। स्फुटति न सा मनसिजविशिखेन॥२॥ अमृतमधुरमृदुतरवचनेन। ज्वलति न सा मलयजपवनेन॥३॥ स्थलजलरुहरुचिकरचरणेन। लुठति न सा हिमकरकिरणेन॥४॥ सजलजलदसमुदयरुचिरेण। दलति न सा हृदि विरहभरेण॥५॥ ॥६॥

स्यामृतत्वेन निरूपणं तथा व्याख्यानेन प्रियंवदत्वं इति नायकगुणः कथितः॥३॥ स्थलजेत्यादि इति। यारमिता सा हिमकरस्य चंद्रस्य किरणेन न लुठति तत्संगीभूमौ परिवर्तनं न करोति। कीदृशेन। स्थलोद्भवं जलरुहं कमलं तद्वद्रुचिरौ यौ तादृशौ करौ चरणौ च यस्य तेन। स्थलरुहजलरुहयोरिव रुचिर्ययोस्तौ तादृशाविति वा॥४॥ सजलेति। यारमिता सा हृदि विषये विरहभरेण वियोगाधिक्येन न दलति न दीर्यते। कीदृशेन सजलो जलसहितो यो मेघस्तस्य समुदयः सम्यगुदयः। तद्वद्रुचिरेण मनोहरेण अनेन नित्यनवीनत्वं स्पृहणीयत्वं संतापहारित्वं स्निग्धत्वमाप्यायनकत्वं रसमयत्वं च भगवद्रूपस्य कथितमिति भावः॥५॥ कनकेति। यारमिता सा परिजनानां हसने नोपहासेन परितः सर्वतो जनानां हासेन श्वसिति। संतापनिश्वासं न मुंचति। कीदृशेन कनकनिकषसुवर्णकषः पट्टि

कातत्रतालेस्यायाश्चरुचिकांतिर्यस्यत्ततादृशंशुचिअनुपहतंन्ववसनंच तत्रयस्यत्तेनात
त्रकनकपदेनेवर्णितत्वेप्राप्तेवचक्ष्यमानत्वजलादिसंपर्केप्यमानत्वदत्त्वनायनिकषप
दोपादानंकनककनिकषःकनकाश्मातद्वद्रुचिर्यस्यशुचिनीशृंगारमयेवसनेयस्याक
नकनिकषश्याासोशुचिश्चतेनेत्तिवाशृंगारःशुचिरुज्वलइत्याभिध्यानात्।शृंगारम
पत्वेनप्रियारूपसादृश्यात्।श्यामन्नारीरोचितश्यामन्नारीरञ्जोषसेत्तिचपीतांवरेण्ये
त्यर्थः।निकषःकषपट्टिकेत्तिहाराचलिः।शुचिःशुद्धेनुपहतेतिविश्वः।द्वी।सकल
भुवनेत्ति।यारमित्ता।सा।अतिकरुणेरसेनोपलक्षितासतीरुजंतद्विश्लेषजन्यांव्याध्य
वस्थांनवहत्तिनधारयेरेत्ति।कीदृशेनसर्वभुवनेषुसकललोकेषुयेजनाःयुवानः
तेभ्यवरतरुणेनाद्भुतलावण्यनिसकिशोरणेत्यर्थः।अथवा।।

कनककनिकषरुचिशुचिवसनेन।श्वसितिनसपरिजनहसितेन।द्वीस
कलभुवनजनवरतरुणेन।वहतिनसारुजमतिकरुणेन।।७।।

कलयाकांत्यासहवर्तंतइतिसकलाःभुवनजनायस्मात्तेनवरतरुणेन।तदुक्तं।स्वमूर्त्या
लोकलावण्यनिर्मुक्त्येतिभागवत्ते।तन्मूर्तिसौंदर्यलेशतोन्येपिसुंदराइत्यर्थः।अथवा।
सकलेसन्तोषंचतद्भुवनंचवैकुंठाख्यंतत्रजनंतदीश्वरस्तरुणवयसाप्रसिद्धः।तस्माद
पिसौंदर्यादिनावरतरुणेन।उक्तंयास्वस्यापिस्मापनमिति।तारुण्यंचात्रमध्यमंकैशोर
मेव।तरुद्वयोश्चवाल्येप्यकापिश्रीरुरसस्तयामूर्तंमधुरिमाघनकेशोरेसतिमध्यमे
तन्माधुर्यंयथा।नवंधनुरिवाततनोनटदघद्विषोभ्रूयुगंत्रारालिरिवनोणिता।नस्य
राजिरग्रेस्वरा।चिराजितनारीरिपूणीरुडितदंनरेखारुणा।नहेसरिवसमीक्षणा।नहे
सरिवसमीक्षणा।युवतिरस्यवित्रस्यतीति।रसामृतसिंधौ।गोलोकत्वेनप्रसिद्धत्वा
द्व्रजरूपेभुवनेरामश्रीदामसुबलादिभ्योपिवरतरुणेनेत्तिवा।अतिकरुणेनत्ति
श्रीकृष्णस्यविप्रयोगेषणंवा।तदाप्रथमपक्षेऽतिकरुणेनात्तित्तिग्धेनपरमरसा

वहनेस्यर्थः। द्वितीयेत्वतिक्रांताकरूणादयायस्यतादृशेन निर्दयिनेत्यर्थः। संगरिमेय
त्पक्षद्वयं प्रतिज्ञातं तयोः प्रथमेच्चतुर्विधं मा पि राधोक्तिः द्वितीयेतु क्रोधा यकस्याश्चित्सं
ख्यास्तूक्तिरपि संभवति। सखभिः पदैरिति। हे सखि त्वमेव स्वाधीनपतिका तेन रमि
ताच तवप्रियः पार्श्वएववर्ततेकिमिति विरहोवर्तेव विलपसि यात्वयारमिता साएवं
करोतु। रमितायाएवप्रेमपराक्रमउचितमिति वायात्वरमिता तस्यास्तदा स्वादरहि
यातएवं नघटत एव। ७। श्रीजयदेवेति। अनेन श्रीजयदेवभणितेन श्रीराधायाः वचनेन
तत्सख्यावातद्वचनेनैव जयदेवभणितमित्यर्थः। तेनहरिरपिहृदयापस्सार्यपिहृदयं
प्रविष्टामुः प्रियजनानां मनसि श्रीराधावक्षसीतिवा। हरिरद्भुतविक्रमोवत्रीअपिरूद्धो
भवत्वित्यर्थः। संकटेप्रविष्टस्यनिर्गमोभावात्। ८। इतिश्रीगीतगोविंदे षोडशः प्रबंधः।

श्रीजयदेवभणितवचनेन। प्रविशतुहरिरपिहृदयमनेन। ७। मनोभ
वानंदनचंदनानिलप्रसीदरेदक्षिणमुंचवामतां। क्षणंजगत्प्राण
मिधायमाधवंपुरोममप्राणहरोभविष्यसि। ५१।

लमपालभते। मनोभवेति। हे चंदनानिल चेदनसंबंधिवायो प्रसीद प्रसादं करु। हे दक्षि
णसर्वेषां विलासिनां अनुकूलस्वभाव वामतां प्रतिकूलतां मुंचत्यज। चंदनसंसर्गिण
स्तोषिसंगरतस्यदक्षिणस्वभावत्वात्। नवक्रत्वमुचितमितिभावः। अथवा। रेदक्षिणप्रसी
दनचेत्प्रसीदसितर्हिवामतां मुंचाननुमयिवामत्वेनास्तीसतआह। हेमनोभवंकाममा
नंदयसीतितदुद्बोधनैवमत्प्रातिकूल्यमाचरसीतिभावः। यदित्ववामतामपिमुंचसितत्
दाहेजगत्प्राणजगतांजीवानामतः क्षणं क्षणमात्रंमाधवं पुरोग्रेनिधायहत्वापश्चान्ममप्रा
णहरोभविष्यसि। जगत्प्राणेतितस्यानयनेस्वस्यच प्राणहरणे सामर्थ्यंघोतितं। माधवंपु
रोनिधायेतिदुस्त्यजस्य श्रीकृष्णप्रणयाज्जीवनमेवप्रार्थयति। तत्प्राप्त्याजीवनमेवभविष्यतीति
भावः। अन्योपभुक्तस्याग्रेप्राप्तेक्षणमपिप्राणानस्थास्यंतीतिवा। कमनीयत्वेन चांचल्येन च मा

संप्रतिपुनः स्मरत्वारहताभलयानि
माधवमित्युक्तो दक्षिणस्य वामत्वं जगत्प्राणस्य प्राणहरत्वमितिवि
रोधनामालंकारश्च। वामं प्रतिनसुदरेश्च। दक्षिणः सरलो वामपरछं
दानुवर्तिविधिनि। यथा।

अथवा ममैवायमपराधो नान्यस्येत्याह। यस्मिन्नू श्रीकृष्णे जनो गत्ते चित्तास्तेऽयं सखी
संवासः सखीभिः सहावस्थानं आयुरिव दुनोति रूपतापयति। पुनः पुनस्तस्मिन्नेव यो
जनात्। अयं च हिमानिलो शीतलवायुः अपि शिखीदाग्निरिव दुनोति। सुधारश्मि
श्चन्द्रो विषमिव कालकूटमिव दुनोति। एवमनेन मम कारेण स्वयं परेभ्यश्च व्यथात्रय
यित्वात्। अदये दयारहिते तस्मिं स्तादृशो। निर्दयत्वान्नामग्रहणायोग्येऽत्त एव च य
त्नस्यदेन सूचितेपतिभावाद्यो। हृदयमन्तःकरणचतुष्टयं पुनर्भूयोपि बलाद्धलते नि
वार्यमाणमपि हठात्तत्रैव गच्छतीत्यर्थः। अतो कुवलयदृशां कमलनयनानां कामो
दर्पानि कामनिरंकुशो नितान्तायेनस्य क्रमर्यादो गत एव वामः प्रतिकूलः अन्यान्यानुरा
गेहि कामो मनाहरो भवसत्र तु सः मयि न सानुरागः केवलमभैव चेतः तत्र धावतीति
वामता कामस्येति भावः। अथवा यस्मिन्गते अन्यत्र स्थिते सति सखीसंवासो रिपुरिव

रिपुरिव सखीसंवासोयं शिखीव हिमानिलो विषमिव सुधारश्मिर्यस्मि
न्नू दुनोति मनोगते। हृदयमदये तस्मिन्नेवं पुनर्वलते बलात् कुवलयदृ
शां वामः कामो निकामनिरंकुशः॥१५॥

मानिलस्य चन्द्रवत्। सुधारश्मेर्विषवदिति विरुद्धमिति विरोधालंकारः यमलंकारश्चात्र।
शिखिनो चन्द्रिबर्हिणा विप्रलम्भः॥१५॥ संप्रति विरहदुःखमसहमाना मलयानिलादीन्प्रा
र्थयति। बाधामित्यादि। हे मलयानिल मलयसंबंधिवायो बाधां पीडां विधेहि कुरु। अत्र
मलयानिलपदेन उत्तमाश्रितस्य तेयाचकत्वप्रसाख्यानं नोचितमिति ध्वनितं। हे पंचबाण
मम प्राणान् गृहाण पंचबाणैः पंचानामपि प्राणानां ग्रहणं कामस्य सुकरमिति सूचना
य पंचबाणेति संबोधनं ननु गृहमेव किमिति न गच्छसीत्यत आह। गृहं पुनः भूयो नाश्रयिष्ये
न यास्यामिति। तेन विना गृहे पिमे संतापनं जेकानेव भविष्यतिभावः हे कृतांत भगिनि य
मस्वसः तेश्चमया सीसांकि किं प्रयोजनमित्यर्थः। तरंगैः कल्लोलैः मम गात्राणि अवयवान्
सिंच आप्लावय। विरहानलजन्यदेहदाहः शाम्यतु निवर्ततां मम प्राणैः त्रातुर्यमस्य हित

माचरेति भावः॥ किंच निर्दयस्य स्वसुः तेदयानयुक्तेति ख्यापनाय कृतांतभगिनीत्वस्येस्य मरः॥ संमोहनः क्षोभणश्च दहनः शोषणस्तथा॥ उच्चाटनश्च कामस्य पंच बाणाः प्रकीर्तिताः॥ इत्यादि ५४॥ संगीतक विरामे विषमाक्षा स्ते। प्रातरिति। पक्षांतरे च सख्या बोध्यमानापष्यात दृष्ट्वा कृष्ण स्तदुक्ति चिन्हैरेव तदग्रे प्रकटी बभूवेति प्रत्यक्षानुभूतमिव वर्णयति। अयं नंदात्मजः जग दानंदाय ास्तु। कीदृशः अतिशायेन सहासं मुखं यस्य तादृशः॥ किं कृत्वा राधाननेन नयनयोः अंचलं प्रांतं आधाय अरोप्य कथं भूतं व्रीडा च चलं लज्जया तरलं कटाक्षितं कृत्वेत्यर्थः॥ उक्तं चाय हृतागत विश्रांतये चित्रेण विवर्तनं तारकायाः कलाभिज्ञा

बाधां विधेहि मलयानिल पंचबाण प्राणान गच्छ न गृहं पुनराश्रयिष्ये।
किं ते कृतांत भगिनि क्षमया तरंगैरंगानि सिंच मम शाम्यतु देहदाहः॥ ७॥
प्रातर्नीलनिचोलमच्युत मुरः संवीत पीतांशुकं राधायाश्चकितं विलोक्य
हसति स्वैरं सखीमंडले। व्रीडा चंचलमंचलं नयनयोराधाय राधानने
स्मेर स्मेर मुखोयमस्तु जगदानंदाय नंदात्मजः॥ ८४॥ सप्तम सर्गः॥

स्तं कटाक्षं प्रचक्षत इति। हसति। सखीमंडले सहचरी वृंदे च कितं विस्मितं यथा स्यात्तथा स्वैरं स्वेच्छया हसति। हास्यं कुर्वाणा सतीति किं दृष्ट्वा मत्तः प्रातीनि अस्य तं श्रीराधानुरागे च्युति रहितं तया स निस्य विलासिन भिस्यर्थः॥ अथवा अच्युतना मापितस्याः संभोग रसावेशे क्रीडा संगोपने नक्ताक्तो बभू वेति अच्युत पदेन व्यंग्य नीलचोलं रूपा म वस्त्रं यस्य तं। राधायाः उरो वक्ष स्थलं संवीत पीतांशुकं परिहितं पीत वर्णमंबरं यत्र तादृशं विलोक्य एवं वस्त्रा विनिमयः सखीनां हास कारणमि स्यर्थः॥ नंदात्मज इति धीरललितानुकूलोयं नायकः॥ न दुक्तं गह नादनुरागतः पितृ... मपनीत न्यहो वेर कस्य भागः॥ विहरन् सह राधया मुरारिर्यस्य मूना कूलवनान्यलं चकारेति। शार्दूलविक्रीडितं वृत्तं॥ ८४॥ इति श्री गीतगोविंदे विलक्ष लक्ष्म्य वर्णने नागर नारायणो नाम सप्तमः सर्गः॥ ७॥ तासु वर्तमानो पित्तया न लक्षितः इ

त्तिनागरो नारायणः॥ अथ न्नाछंदो मंगलार्थः॥ अथानंतरं वा॥ सा सोभ्यातिन्नायेन विख्याता राधा प्रभाति प्रातःकाले प्रियं कांतं साभ्यसूयं सेर्ष्यं यथा स्यादेवं माह उक्तवती॥ किं कृत्वा कथमपि कष्टेन यामिनीं रात्रीं विनीय नीत्वा समाप्तिं प्राप्येत्यर्थः॥ अत्र यामिनीपदेन प्रियविश्लेषे निन्नायाः दीर्घत्वं ध्वनितं तदुदरवती कन्येति वत्तृ॥ किंभूता सा॥ स्मरन्नारजर्जरितापि कामबाणपीडाता पित्रत्तिरो मविद्धापीत्यर्थः॥ दुःसहान्य कामिनी नखां कादिचिन्हदर्शनजनित महादुःखा विरहदुःखाप्युचाचेत्यर्थः॥ कीदृन्नां॥ प्रियं॥ अनुनयाय स्वापराधजनितक्रोधन्नांतये विनयं पुनःपुनरीदृन्नो नाचरामीत्यादि विनयवाक्यं वदंतं पुनः कीदृन्नं अग्रे प्रमाणं मपि पादाग्रे

अथ कमपि यामिनीं विनियस्मरन्नारजर्जरापि या प्रभाते अ
नुनय वचनं वदंतमग्रे प्रणतमपि प्रियमाह साभ्यसूयं॥५५॥

नम्रमयं॥ पक्षांतरे साभ्यसूयमाह॥ गुणेषु दोषाविष्करणमभ्यसूया॥ स्वरमित्तमपि निन्हेरन्योपभुक्तं परिकल्प तिरस्कारं चकारेत्यर्थः॥ रजनीयामिनीतमीसमरः॥ स्मरन्नारजर्जरितापि प्रणतमपि सहेर्ष्यमाहेति साधिक्यं सूचितं॥ यदत्र वामते वचा रूरसो दयोत्सवत्तिरसन्नानां॥ सरलतया रसाभास एवातो परमोचितमेव चेष्टितं श्रीवृंदावनचंद्रप्रियायाः येलन्यथा कल्पयंति ते रसपाटीयपराङ्मुखाज्ञेयाः॥५५॥ श्रीराधायदाहत द्गीतेन कथयति॥ रजनीत्यादि॥ गीतस्यास्य भैरवरागः तल्लक्षणं॥ सरोवरस्थे स्फटिकस्य मंडपे सरारूहैः न्नांकरमर्चयती॥ तालप्रभेदप्रतिबंधगीता गौरी तनुर्नारदभैरव मितीयतिजाललक्ष्या॥ गीतार्थश्च॥ हरिहरीतिखेदे हे माधव हे केन्नाव याहि याहि दूतो गच्छ गच्छ॥ कोपावेन्नोनयोहीस्यस्य द्विरुक्तिः॥ माधवेति चंचलायाः भर्तुस्तो

ईदृशं चापलं युक्तमवेति भावः समानसीलत्वात्। एवमधिक्षेपे कृतेप्यसंतुष्टा केशवेति। केशशब्दो न्यथीनिस्यां। केशाः विद्यंते यस्य यस्मिन्वेति प्रशस्ताः कामिन्याकर्षणेन विकीर्णा इत्ययं तेइति। त्वदेकपरायणोहमिति कथयंतमाह। कैतववादमिथ्यावादं मावद मा कथय। कैतवं तु छलं द्यूतेइति विश्वः। ननु त्वदर्थमिवाखिन्नास्मि सूक्तेन सुखयेत्स आह। तामिति। हे सरसीरुहलोचन कमलनयन नायिकां तामनुसरानुगच्छ। यात व विषादं दुःखं हरति दूरीकरोति। यदर्थं खिन्नोसि तयैव ते दुःखमपनेतुं युक्तमहं स्वयमेव दुखिता तेविषादं कथं हरिष्या।

रजनिजनितगुरुजागररागकषायितमलसनिमेषं। वहतिनयन
मनुरागमिव स्फुटमुदितरसाभिनिवेशं। याहि माधव याहि केश
व मा वद कैतव वादं। तामनुसर सरसीरुह लोचन या तव हरति विषादं। ध्रु०। हरि०

मिति भावः। तथाच रात्रिजागरेणार्धमुकुलितं रक्तवर्णं च नयनयोः तत्कालीन सरसीरुहलोचनत्वेन ध्वनितं। प्रियाध्यानेन मुद्राणं तद्दृस्यानुरक्तमिति वा कटाक्षितं। ध्रुवपदं नन्वहं त्वय्यनुरक्तः कथं मामनुरागत्वयान्यत्र ज्ञात अतयाह। रजनीति। हे कृष्ण ते वनयनं नेत्रं तदनुरागमिव वहति धारयति। वहसिति पाठे नयनं सरागमिव वहसीत्यर्थः। कीदृशं नयनं। रजनिजनितो रात्रिजातो गुरुर्महान्यो जागरस्तज्जनितो यो रागो रक्तता तेन कषायितमीषल्लोहितं अत एवालसनिमेषं अलसो मंथरा निमेषा पक्ष्मविन्यासो यस्य। तादृशं। अन्योपि यः कश्चिद्वस्तुवहति सोप्यलसो भवतीति ध्वनितं। पुनः कीदृशं नयनं। स्फुटं प्रगटमेव उदितः काचित्तास्य कामिनीविषयः शृंगाररसे रे स्याभिनिवेशः तत्सरतायेन

ताद्दशं। उदितरसस्येद्रिक्तश्रृंगाररसस्याभिनिवेशः आग्रहो यस्मिन्निति वा। तथा
चान्यनायिकाकेलिव्यासंगेन वृथा जागरः कारित इति रागेण क्रोधेन मम स्नेहाका
शाद्वा तस्य नयनस्य सूचनं मम भाग्ये युक्तमेवेति व्यंग्यध्वनिन मेतत्। अथवा। स्फुटाभि
त्यादि अनुरागविशेषणं। कीदृशं रागं स्फुटमिति बाहुल्येन ततं व्याप्य बहिर्निर्यातं।
उदितरसाभिनिवेशमिति वा। हरिशब्दो व्ययखेदवाची कषालीयो हि तेन्वेति ॥१॥
कज्जले इति हे कृष्ण। अरुणमपि तव दशनवसनं अधरः तव तनोः शरीरस्य अनुरू
पं योग्यं तनोति विस्तारयति। तनुत्वे स्थौमाऽधरोऽप्यधुना श्याम इति भावः। कीदृशं।
कज्जलेनांजनीभूतेन मलिनेन यद्विलोचनं नेत्रं तया श्रु

कज्जलमलिनविलोचनचुंबनविरचितनीलिमरूपं दशनवश
न मरणं तव कृष्ण तनोति तनोरनुरूपं ॥ वपुरनुहरति तव स्मरसं
३ क्षतरेखं — गरखरनखरक्षतरेखं मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखं ॥२॥

वने न विरचितं नीलिमा यत्र तादृशं रूपं यस्य तादृशं। चुंबनलग्ननेत्रांजनेन श्यामीभू
तं खदधर एवं स्फुटं ते धूर्ततां प्रकटयतीति भावः। तदुक्तं। गल्ले नेत्रे ललाटे च चुंबनं च प्र
कीर्तितमिति कज्जलमलिनेत्यादिना तस्याः विदग्धी ध्वनिता। आस्ताधरो तु रदनच्छ
दो दस्येव शावासंसी स्मरः। भाकिं वपुर्वेति। तव वपुः शरीरं रतिजयलेखं इदं तव व
पुः शरीरं रतिजयलेखं इदं तव वपुर्मया जितमिति सुरतविजयपत्रमनुवहति सदृशी
करोति। कीदृशं वपुः स्मरसंगरे अनंगरणे खरनखराणां तीक्ष्णानां नखराणां नखानां क्ष
ते राधा तैः रेखा यत्र तादृशं। कस्या इव लेखं। मरकतशकले नीलमणिखंडे कलिता निर्मि
ता या कलधौतलिपिः सुवर्णद्रवाक्षरविन्यासः तस्येव। अत्र कृष्णवपुः कषः स्थौमल्यान्मरकतश्च

लसाम्यं सुवर्णस्य चाकुविसंप्रदाये अरुणत्वेन निरूपणात् । नखक्षतस्य तल्लिपि साम्यात् कलधौतं रौप्यहेम्नोः कलधूतं कलध्वना चिति विश्वः । आकलं खंडे चेति पुन र्भवकररूहो नखः स्त्री नखरो स्त्रियामित्यर्थः । संगारोगी कृतो युद्धोस मरः । वर्णदृ तः स्थाक्ति मुखो लेखो वाचिक हारकइतिहारावली । ३ । ननु मार्गविस्मया गच्छतो मे वपुषि यनेकं कंटकादिस्पर्शादेव दृश्यते न तु नखांकमित्य आह । दृदं तव हृदयमदन द्रुमस्य कामवृक्षस्य हृदयांतर्गतस्य नवकिसलयपरिवारं नूतनपल्लवसमूहं अथवा पल्लवे न नूतनत्वं प्रसिद्धं तदा नवं नम्रे स्तवे विदुरिति विश्वः कोशात् श्लाघनी यं पल्लवसमूहमित्यर्थः । बहिर्वाप्तं दर्शयतीव प्रकटयतीव कीदृशं हृदयं । चरणक मलात् अन्यकामिनीपदपद्मात् गलता सवलता लक्तकेन सिक्तमुक्षितं । अपरोपि वक्षः सि

दल वि चरणकमलगलद्दलक्तकसिक्तमिदं तव हृदयमुदारं दर्शयतीव ब हिर्मदनद्रुमनवकिसलयपरिवारं । ७ । दर्शनपदं भवदधरगतं मम जनयति चेतसि खेदं कथय तिक थमधुना पि मया सह तव वपुरेतद् भेदं ।

कालंकारः । अतएव वोदारं मनोहरं दर्शनीयमितिभावः महरितिवा । मरुतो किमपि गो पनीयं नास्ती तिभावः चरणकमले गलित सोरस्य दलमदनद्रुमे सनुरागमूलत्व मलरूकसि कराभ्यां धारये कुचावितिपरिवारः परिकरे समूहे वेष्टने पिचेति धरणिः । ८ । ननु तव खेदं न त्वया एक्या नमहृदयेव्याधि विक्रिया जाता कथमन्यथा कल्प्यते । सत्यं यदि त

च वमयाए क्यं नस्यात् तदा तव शरीरगतक्षतेन मम वेदना नस्यादित्याह । दर्शनेति । दर्शन पदं भवदधरगतं भवनस्त वा घरस्थितकस्याश्चिद् तक्षतचिन्हं मम मचेतसि दुःखजनय त्रक्षतस्यान्य त्र य थाजने कैवीसंभवतु वलारंभदो ज्ञायते । अन्योपभोगेन क्ष्यदर्शना दतिदुःखेनासतत हृदय भेदेन कुतो वपुर्णोरैक्य मिति व्यंगेन भेद एव प्रदर्शितरित्यर्थः । प्रसि

145

ननुतवोपायनार्थंकमलनोटनंकृतंयतिमयिकोमलकोशादापन्नाभमरेणनमाधवोदुष्टेन
तुदत्तक्षतमिसतत आहाचहरवेति। हेकृष्णनूनंनिश्चयेनतवभूनोपिचित्तमपिबहिरिवबा
ह्यमिवमलिनतरमितिन्यायेनमलिनंभविष्यति। यथातववपुश्यामंतद्वत्तवमनोपिभवि
ष्यतीत्यर्थः। ननुममनोमालिन्यंत्वयाकथंज्ञातमित्यतआहकथमिति। कथयेतिप्रस्तौत्व
मेवपृच्छसेमदिनत्तवांतर्मलिनंतदाःस्मरशरज्वरदूनं। कामशरपातेनदुःखितमतएवा
नुगतं। त्वामनुसरंतंमादृशंजनंकथंवंचयसेप्रतारयसि। शरणागतजनवंचनंतंमलिनं
मंतरेणनसंभवतीतिभावः। व्याजेनदत्तक्षतादिसंगोपनात् अतिमलिनोसीतिध्वनितं।
अथोअथचसंप्रश्नेमंगलायोरपीतिविश्वः। नूनमितिशब्दोपादानात् उत्प्रेक्षानामायमलं
कारः तदुक्तंदंडिना। मन्येशंकेध्रुवंप्रायोनूनमित्येवमादिभिः। उत्प्रेक्षाव्यज्यतेशब्दैरिवशब्दोरि

वपु

बहिरिवमलिनतरंतवकृष्णमनोपिभविष्यतिनूनं। कथमथवंचयसे ५
जनमनुगतमसमशरज्वरदूनं। क्षिप्रमतिभवानेबलाकवलायवने
षुकिमत्रविचित्रं। प्रथयतिपूतनिकैववधूवधनिर्दयबालचरित्रं॥७॥

इति। क्षिपूर्वोक्तमेवक्रूरकार्येणापिस्पष्टयति। भ्रमतीति। भवान्वनेषुविपिनेष्वबलाकवला
यस्त्रीजनग्रासायभ्रमतिभ्रमणंकरोति। अत्रास्मिन्नर्थेकिंविचित्रंनकिमपीत्यर्थः। तत्रहे
तुमाह। प्रथयतीति। पूतनिकैवकंसप्रहितापूतनैवचवधूवधेस्त्रीमारणेतवनिर्दयंदयार
हितंबालचरित्रंशिशुचेष्टितंप्रथयतिख्यापयति। शिशुत्वेयेनस्तनदानेप्रवृत्ताराक्षसी
हतातस्येदानींकैशोरेमादृशीनांकोमलांगीनांहननेकिंचित्रमितिभावः। अथवाहिवधूव
धेनिर्दयंतवबालचरित्रंबालोपितादृश्याःकेसभगिन्यामनरूपचेष्टितंबालचरित्रंकोमल
वेश्यापूतनिकैवप्रथयति। विस्तारयतीत्यर्थः। स्वार्थेकः। खंडिताचेयंनायिका। तदुक्तं। भर
पति: तेन। निद्राकषायमुकुलीकृतताम्रनेत्रोनारीनखव्रणविशेषविचित्रितांगः। यस्याःकृतोप्रियगृह
मेति। प्रभातेसाखंडितेतिकथिताकविभिःपुराणैरिति॥७॥ श्रीराधाकृष्णोजयतिश्रीजय ॥७३॥

देवेति। हे विबुधाः श्रीकृष्णमाधुर्यरसास्वादनपंडिताः। इदं श्रीजयदेवभणितं वर्णितं र
तिवैचित्त्यासंभोगरहिता या खंडिता उक्तलक्षणा युवतिः कांता तस्याः विलापं परिदेवनं
शृणुत आकर्णयत। कीदृशं। सुधातोपि मधुरं तत्र हेतुमाह। विबुधालयतोपि स्वर्गादपि
दुःप्रापं तत्रापि दुर्लभमित्यर्थः। उक्तं च। न तस्य हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामु
पर्यधमिति। तव कथामृतमित्यादि श्रीभागवते। अथवा। सर्वशास्त्रप्रसिद्धमिदं। निःसी
मप्रेमरसाबलवनः श्रीव्रजराजनंदनः प्रियजनसमुदायेषु श्रीगोपिका एव तेन विबुधाः
श्रेष्ठाः वैकुंठवासिनः तेषामालयं वैकुंठस्थं तत्रापि दुःप्रापमित्यर्थः। तदुक्तं श्रीभागवते। ना
यं श्रीयोगइति। यद्वांछया श्रीललनाचरत्तप इत्यादि। विबुधः पंडिते देवेति विश्वः। पक्षांतरे
रतिरनुरागः वैचित्त्यविप्रलंभाख्यो भावविशेषः तेन वंचिता छलिता या खंडिता न तु यस्कं
न तस्या विलापमित्यर्थः। अथवा रतौ वंचिता चासौ अधरादौ खंडिता च युवति तस्याः विलापं संभोगादिषु

श्रीजयदेवभणितरतिवंचितखंडितयुवतिविलापं। शृणुत सुधामधुरं
विबुधा विबुधालयतोपि दुरापं॥ ८॥

लेनाधरादिखंडनेन शुष्कक्रंदनं याहि याहीति। ननु कीदृशं। सुधातोपि मधुरं अमृतादपि
स्वादु अत एव विबुधालयतोपि दुरापमिति। तदा नानुकामेन खिन्नास्मि याहि याहीति मा वद सं
भोगार्थमनुस्मरामीति चेदत्राह ममेच्छा नास्ति तामनुस्मरेति राधोक्तिः। ननु रजनिजनित
ति। तव नयनं कंदर्पानुरागं वहति कथं मां प्रतारयसीति कृष्णोक्तिः। ननु तव वपुः प्रचुका
ममयं श्यामत्वान्नू यतस्तव दशनवसनं अरुणे रूपमपि तनोरनुरूपेण नोति नत्वं सर्वे काममयं प
ऽयसी विकज्जलमलिनेत्यादि अत एव तव वपुरित्यादि नवकिसलयपरिवारमित्यादि पुन
राधायाः। अथ श्रीकृष्णस्य एवमेव भतु। नाम प्रिया यमत्वं दीयतां रतो सैवैवेक्ष्यत्यादिति
श्रीकृष्णे कथयति। सहि मया सह तव ऐक्यमत आह। दशनपदमिति त्वया मनए क्षयं दि
नस्यान्त दातचपुर मंदं कथकथमतीत्यर्थः। धूर्त पुनरपि तदेवं कामयसे। अनुगतं जनं

असमशरज्वरदूनं नखक्षततापपीडितां अथानन्तरं कथं वसेः न वसेः छलयसीत्यर्थः। अ
तानूनं बहिरियं दिनिर्दयबालचरित्रमिति पर्यन्तं श्रीराधोक्तिः। एवमन्योन्यविचि
धहावभावादिभिः जागरमौलयोरतिरसेनाक्रांतयोः संभोगः एवं नर्मादिगोष्ठी अ
नयः रूपया महाकविना निरूपिता वक्ष्यति च। अधरसुधापाने कथा नर्मस्य सिरि
त्यादि एवं तवेदमप्यग्रिमपदं संगच्छते इति ज्ञेयं तत्र प्रणयभरसंगेन तरंगेणोल्ल
सनेत्यर्थः। सुरतानुरागप्रकटनेन सखीष्वपि लज्जासंभवातिशयान सुकुमारांग्याः भ्रू
पीडया च त्रोकमित्यर्थः। सततदत्रप्रबंधः ११७ [illegible] इतिश्लोकः कुंभकरणेनउ
क्तः सदानंदसंदोहकरं मुकुंदं नमस्कृत्य पद्माग विधूतयोदं। नृपः कुंभकर्णो वियते
विचित्रं परं गीतगोविंदधातुं पवित्रं। श्रीकृष्णतवास्मि

तवेदं मन्ये स्याः प्रसरदनुरागं बहिरिव प्रियापादालक्तच्छुरितमरुण
च्छायहृदयं ममाद्य प्रख्यातं प्रणयभरभंगेन कितव [illegible] दर्शनं सा त्रो
कादपि किमपि लज्जां जनयति॥पद्दी॥

सुरतनाथ तवासि तवेदमिति हे कितव धूर्त। तदालोकस्व दर्शनं प्रख्यातः प्रसिद्धो
यः प्रणयभरोऽनुरागातिशयः तस्य भंगेन नान्यो न केवलं तु नान्योकादपि किमपि अ
निर्वचनीयां लज्जां जनयति। न्रोकेतु जनयत्येव परं तु त्रोकादपि लज्जां गुरुविस्
मादयतीत्यर्थः। तथा च प्रीतो मे स्याः परमानंदजनकं त्वमीदानीं तद्भावाच्छो
कजनकमेव तदालोकस्येति भावः। कीदृशं मम तवैतत् प्रत्यक्षं हृदयं परं यस्याः। कीदृशं प्रियाप
दालक्तेन प्रियायाश्चरणसंबंधियावकेन नामितं अत एवारुणछायादीनि यस्य तादृशं।
अरुणच्छोततीतिपाठे अरुणः संध्यारागः तद्वद्योतितं श्रीलं यस्यास्तीति अरुणद्युति द्युतिए
तादृशं किमिव बहिः प्रसरदनुरागमिवाहृदयं परिपूर्याधिक्याद् बहिः सतममेवा विपक्षयुवती
तिपरिहसितां कया त्रोकादपि मे अधिकलज्जा भवतीति भावः। प्रसरदनु
रागामिव समस्तश्लेषालंकारः। छाया सूर्यप्रिया कान्तिरिति। अरुणः संध्या
रागो स्फारकसारथ्योर्लोहितेऽपि चेति॥पद्दी॥

इदानीं सर्गांते कविः मंगलमाचरति। अंतर्मोहनेति। कंसरिपोः श्रीकृष्णस्य वंशीरवः
युष्माकं कल्याणानि व्यपोहयतु ददातु कल्याणदातृत्वसामर्थ्यकथनायात्र कंसरिपु
पदोपादानं। किंलक्षणः। कुरंगीदृशां हरिणातरुणीनेत्राणां अंतर्मोहि मोहनं मनोमोहः मौ
लिघूर्णनं तस्मादमंदमन्नौमौर्यात्रिरश्चालनं मिलन्मंदारस्य विस्रंसनमधःपातनं। सत्त्वाक
र्षणं सत्त्वस्य मानिनीनामपि वश्यीकरणं। दृष्टिहर्षणं नेत्रोत्साहः श्रवणनिर्वृत्या नेत्र
विकासो भवतीत्यादिकर्मसाधने महामंत्रः। पुनः किंलक्षणः। दृप्यद्दुर्दर्पयुक्तैः दानवै
र्दैत्यैर्दूयमानानां

अंतर्मोहनमौलिघूर्णनमिलन्मंदारविस्रंसनस्तब्धाकर्षणदृष्टि
हर्षणमहामंत्रः कुरंगीदृशां। दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखा
पदां भ्रंशः कंसरिपोर्व्यपोहयतु वः श्रेयांसि वंशीरवः॥१५॥ अष्टमः
सर्गः॥८॥ तामथ मन्मथखिन्नां अनुचिंतितहरिचरितां कलहांतरि
तामुवाच रहःसखी॥१॥ ×रतिरसभिन्नां विषादसंपन्नां॥

उपतप्यमानानां दिविषदां देवानां दुर्वाराः निवार्याः दुःखापदो दुःखसाधनीभूता विपत्तयस्ता
सां भ्रंशो नाशकः। यच्छ्रवणेन देवा दैत्यपीडाभयान्मुक्ता भवंतीति भावः। अनेनापि साम
र्थ्यलक्षणो नायकगुण उक्तः। तथा च देवादीनां विलाससाधको यस्य वेणुध्वनिः किंव
क्तव्यं तस्य श्रीपुरुषोत्तमस्य विलासित्वमिति भावः॥१५॥ ॥श्रीतैलंगीगोविंदसंहि
तावर्णने विलक्षलक्ष्मीपतिर्नामाष्टमः सर्गः॥८॥ ॥प्रणयकोपादरिमधिक्षणे
दानीं कृतपश्चात्तापां सखी आह। तामिति। अथ ग्रंथादौ मंगलार्थः॥ आनंतर्ये वा। तां कल
हांतरितां परुषवचनकथनानंतरं कृतपश्चात्तापां श्रीराधां रहःएकांते सखी उवाच।

कथितवती। कीदृशी। मन्यथा खिन्ना मन्मथेन कामेन खिन्ना दुःखिता अतएव रतिरसेन भिन्ना। संगतो गतिरसेन संभोगेण भिन्ना विदारिता अतः करणं वा अतएव विषादसंपन्ना उद्वेगसहिता। अतएव अनुवारं वारं चिंतितं स्मितं हरेः श्चरितं पुरा विलासितं तत्कालीन विनयं वाययाता। कुलहात्त रितां चेयं नायिका। तदुक्तं भरतेन। प्राणेश्वरं प्रणयकोपभरेण सीतं यावाटुकारमचिरादवधीर्य पश्चात्। संतप्यते मदनवह्निरिनिःश्वास हस्तैर्वाष्पाकुलानुकलहंतरितानुसा स्यादिति। इति भिन्नमन्यार्थवचने संगते दारिते। स्फुटेति श्वः। पश्चात्तदेव गीतेन कथयति। हरिरिति। गीतस्यास्य गुर्जरी रागः। यती तालः। गीतार्थस्तु। अयं इति मबोधनं। हे मानिनि मानवति मा।

हरिरभिसरति वहति मधुपवने। किमपरमधिकसुखं सखि भुवने।।१।। माधवे मा कुरु मानिनि मनमये।। ध्रुवपदं।। ।। ।।

धवं श्रीकृष्णे मानं मा कुरु। अथवा। अयेतिशुश्रावहविधो प्रियं संगमलक्षणेतियाव तु। निमित्त सप्तमीयं। संभोगार्थं विलंबकरं मानं मा कृथाः इत्यर्थः। माधवपदेनापि माधवो पि ह्यामेव प्रसादयस्यतो मानं मा कुर्वति। ध्वनितं ध्रुवपदं। मधुपवने वसंत वायो वहति। हरिः श्रीकृष्णो अभिसरति। स्वयमायाति। हे सखि त्रिभुवने त्रैलोक्ये अपरं श्रीकृष्णाभिसरनादन्य किं उत्कृष्टं सुखं अपितु न किंचिदित्यर्थः। न वार्तिनो नायप्रणवइति हरिपदेन कथितं।।१।। अपि च कुचकलशास्तेन घरं किं किमर्थं चिफलीकुरुषे निःफलं करोषि। श्रीकृष्णकरार्पणादेव कुचकलशयोः साफल्यं

नदभावे वैफल्यमितिभावः। कीदृशं। तालफलादपि तालफलापेक्षयापि गुरु काठिण्ययो
ल्याभ्यां श्रेष्ठमित्यर्थः। अतिसरसं अतिशयेन शृंगाररससहितं। तथा चातिविमर्दनेन ता
लफलस्य सरसत्वं भवति तथैवाचाप्यतिविमर्दनेन शृंगाररसं उरु चतीति ध्वनितं।
तथा चापरोपि कलशः रसोजलं तत्सहितः मंगलाय प्रियजनागमे तत्करे प्यतेऽतोस्मि
न्नवसरे त्वयाप्येवं कर्तव्यमितिभावः।२। ननु यदा हरिरागतस्तदा त्वया न कथितमित्य
त आह। कतिनेति। इदमचिरं सांप्रतमेवानुपदं स्थाने स्थाने प्रति मया कति न कथितं
कियन्न कथितं अपितु बहुधा कथितमित्यर्थः। किमिदं। हरिं अतिशयरुचिरं अति
शयेन मनोहरं चित्तचोरं मा मा परिहर मा उपेक्षस्व। ३। एवं श्रुत्वा श्रमुखी प्रसाह। किमि
ति। किमर्थं विषीदसि विखिन्ना भवसि ननु नास्मि विखिन्नेत्यत आह।

किं

तालफलादपि गुरुमतिसरसं। विफलीकुरुषे कुचकलशं। कतिन
कथितमिदमनुपदमचिरं। मा परिहर हरिमतिशयरुचिरं।३। किं
मिति विषीदसि रोदिषि विकला। विहसति युवतिसभा तव सकला। सजल
नलिनीदलशीलितशयने। हरिमवलोकय सफलय नयने।४।

रोदिषीति। विकला विकलासती रोदिषि अत एव तव सकलसमस्तायुवतिसभा तरुणीपरि
षत् विहसति हास्यं करोति। तव चेष्टितं विसतीति वा। सकला चतुःषष्टिकलायुक्ता रसपरिपा
टी कुशलेत्यर्थः।४। तर्हि किं करामि सत आह। सजलेति हे सजलनलिनीदलशीलितशाय
ने। सजलानि जलसहितानि नलिनीदलानि कमलिनीपत्राणि तेषां शीलितं निर्मितं शयनं
शय्या यया तादृशे। हरिं सकलसौंदर्यादिगुणविशिष्टनायकरत्नं आवलोकय पश्य। अतएव
वनयने नेत्रे सफलय कृतार्थय। तदुक्तं। अक्ष्वण्वतां फलमित्यादि। तथा च यदि विरहतसा च नि
र्मितसकलनलिनीदलशयनासि। तमनुगतं सस्नेहावलोकनेन सफलसकलकार्यं भवेतिभावः।

अथवा नव विरहतापेन सजलनलनीदलशीलितशय्यायां हरिमवलोकयेति
कतिन कथितमित्यर्थः। सजलसादौ सप्तमी। अस्मिंश्छयने तवानुनयार्थी विपचिष्टे हरिम
वलोकयेति वा।५।

विचारयतीमाह। जनयसीति। भवसितैौ चैगुरुखेदं महदुःखं किमिति जनयसि। वक्ष्यमाणं मद्
चनं श्टणु। कीदृशं। अनिहितो ना काङ्क्षितो भेदो विरस्यंय स्यतादृशं। युवयोर्हितकरमित्यर्थः॥
अथवा मया सह अनाकलितं भेदं यथा स्यादेवं मम वचनं श्टणु। इयं मम सखी मनोभिन्ना
मदनिष्टं भवदिष्यतीति बुध्या मद्वचनं श्टण्विति भावः॥६॥ तदेवाह। हरिरिति। हरिः श्रीकृष्णः
उपयातु त्वदंतिके॥ छतो बहु मधुरं अतिसरसं यथा स्यादेवं वदतु अधिकं चाटु वदत्विति
वा। एवं सति स्वीयं हृदयं अति विधुरे किमिति करोषि॥७॥ श्रीजयदेवेती। श्रीजयदेवभणि
तं हरिचरित्तं श्रीकृष्णस्य चरित्तं रसिकजनभक्तिविशेषसास्वादचतुरं भक्तजनं सुखयतु
आनंदयतु॥ किंभूतं अतिललितं शृंगाररसविशिष्टत्वेनातिमनोहरमित्यर्थः। उक्तं च। श्टगा
रप्रचुराचेष्टा यत्र तत्ललितं विदुरिति॥८॥

जनयसि मनसि किमिति वहुखेदं। श्टणु मम वचननिमनिहितभेदं॥६॥
हरिरुपयातु वदतु बहु मधुरं। किमिति विहृदयमति विधुरं॥७॥ श्रीजय
देवभणितमतिललितं। सुखयतु रसिकजनं हरिचरितं॥८॥ स्निग्धे
यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि द्वेषस्यासि यदुन्मुखे विमुख
तां यतासि तस्मिन्प्रिये। तद्युक्तं विपरीतकारिणि तव श्रीखंडचर्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातना॥५९॥
श्रीगीतगोविंदे अष्टादशप्रबंधः॥१८॥ स्निग्धइति। हे विपरीतकारिणि विपर्ययविधायिनी तिसं
बोधनं। तत्तर्हि तोलयि एतत्सर्वं युक्तमेव तथा च यः परस्मिन् विपरीतमाचरति तस्य सर्वं विप
रीतमेव भवति। किं तत्। तव श्रीखंडचर्चा विषं चंदनानुलेपो विषवत्संतापजनको भवति।
अपि च। शीतांशुश्चंद्रस्तपनः सूर्यः शीतलभावोपि तापमाचरति। हिमं तुषारोपि हुतवहो
ग्निरिव दाहको भवति। क्रीडामुदः केलिप्रमोदाः यातनाः दुःखं भवति। यद्यतो स्निग्धे तस्मिन् प्रिये
मधुरवचनैः सस्नेहं प्रकाशयति परुषासि निष्ठुरभाषिण्यसि यच्च प्रणमति तस्मिं स्वं स्तब्धासि यच्च

सिद्धैषमवलब्ध्येऽसि नासि। यच्च तनु सुखे आलिंगनाय सन्मुखे तासि स्वं विमुखतां यातासि प
राङ्मुखतां गतासि। यातनातीव्रवेदने यसमरः विरोधालंकारः। शार्दूलविक्रीडितं वृत्तं॥ ५२॥
सर्गांतिके विघ्नमंगलमाचरति। सांद्रेति। वयं श्रीगोविंदस्य पदारविंदं चरणकमलं वंदामहे
नमस्कुर्महे। किमर्थं अशुभस्कंदाय अशुभानि प्रतिबंधकदुरितस्य नाशाय। तादर्थ्ये चतुर्थी। बि
हुवचनं शिष्याद्यभिप्रायेण। दुरितनाशने सामर्थ्यं द्योतयति। स्वच्छंदमिति। किंविशिष्ट
स्वच्छंदं यथा स्यादेवं मकरंदवसुंदरं यथा स्यादेवं गलंसावास्रवं स्रावं मंदाकिन्या गंगया मे
दुरं स्निग्धं तत्तथा। तथा च यस्मान्निसृता गंगा जगत्पुनाति किं वक्तव्यं तस्य सामर्थ्यमि
ति भावः। अरविंदे हि मकरंदो भवति तेन मंदाकिनीति ठपमीयते इत्युपमालंका
रः। पुनः किंभूतं। सांद्रो निबिडो आनंदो हर्षो तेषु

सांद्रानंदपुरंदरादिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलम
णिभिः संदर्शितेंदिंदिरं। स्वच्छंदं मकरंदसुंदरगलन्मंदाकिनी
मेदुरं श्रीगोविंदपदारविंदमशुभस्कंदाय वंदामहे॥ ८०॥ ११॥

पुरंदरादयः। इंद्रादयो दिवि सीदंतीति दिविषदो देवाश्च तेषां वृंदैः समूहैः अमंदादराद
धिकादराद् आनम्रैः समंतात् कायादनानतियुक्तैः मुकुटेंद्रनीलमणिभिः संदर्शिताः
इंदिंदिराः भ्रमराः यस्मिन् तत्तादृशं। अनेन नमस्करणीयत्वं कथितं। अत्र चरण
स्य कमलोपमा मंदाकिन्या मकरंदोपमा। सुरवृंदमौलिनीलमणीनां भृंगोपमा।
एवं परस्परूपना चरणस्य। तथा चात्र मंदाकिनिपदेन व्यापकत्तमाऽविरतप्रवा
हरूपात्वं भगवतः यशो वर्ण्यते॥ ६॥ इति श्रीगीतगोविंदे कलहांतरिताव
र्णनो मंदमुकुंदो नाम नवमः सर्गः॥ ९॥ श्रीकृष्णो जयति।

इदानीं सखीबोधितां मानिनीं स्वयमनुनयति। अत्रांतर इत्यादिना। अत्रांतरे अस्मिन्नेव
वसरे प्रदोषे निद्रामुखे हरिः श्रीकृष्णः समुखीं सुंदराननां किंचित्कोपोपशमेन प्रस
न्नवदनामित्यर्थः। श्रीराधामुपेत्य समीपं गत्वा सानंदगद्गदपदं आनंदेन गलदक्ष
रवाक्यसहितं यथा स्यादेवं वक्ष्यमाणउवाच। कीदृशीं मसृणरोषवशां स्निग्धकोपवशां
सखीवचनैः किंचिन्नमितरोषामित्यर्थः। पुनः किंभूतां असीमशिरपारे निश्वासैर्निः
सह विरहदुःखसहनाक्षमं मुखं यस्यास्तां सव्रीडसलज्जं यथा स्यादेवंवीक्षितं सख्यांवद

अत्रांतरे मसृणरोषवशामसीमनिःश्वासनिःसहमुखीं सुमुखी
मुपेत्य। सव्रीडमीक्षितसखीवदनां दिनांते सानंदगद्गदपदं हरि
रुवाच। वदसि यदि किंचिदपि दंतरुचिकौमुदी हरति दर
तिमिरमतिघोरं स्फुरदधरसीधवे तव वदनचंद्रमा रोचयति लोचन
चकोरं ॥१॥ प्रिये चारुशीले मुंच मयि मानमनिदानं सपदि मदनी
नलो दहति मम मानसं देहि मुखकमलमधुपानं ॥ ध्रु० ॥ ॥ ॥

वदसीति। गीतस्यास्य देशवराडीरागः। अष्टतालीतालः। रागलक्षणं। आरब्धगमनं मु
द्रा घूर्णायमाननयनयुग्माढ्या। मुखवनायिनि निजदयिमे देशाख्य वराडीभवद्रोरीति।
लघुद्रुतौ लघुद्रुतौ लघुश्चसाष्टतालीप्रकीर्तितेति। गीतार्थस्तु। हे प्रिये प्राणवल्लभे श्रीरा
धे। चारुमनोहरं शीलं यस्यास्तत्संबोधनं। मयि मद्विषये अनिदानमकारणं अन्यनायि
कासंभोगकारणरहितं मानं मुंच त्यज। ननु मत्सा नचलतेतव कोहानिजातेत्यत आह।
सपदीति। सपदि क्षिप्रं मानसमकालएव मदनानलकामाग्निर्मम मानसं दहति तापय

154

ति।अतोमासोनेगस्यकाचा तोकिंतुमुखकमलमधुपानंदेहि।मुखमेवपद्मकमलंतत्संबंधियन्मधुतस्योन्मादित्वाग्निवामनायपानंदेहि।अनेनपानेनसंमुखेऽपत्रयस्याः मुखावलोकनंयाचितं।अथवा-चारुशीले मयित्वदेकनिष्ठस्वभावेति।अतएवाकारणंमानंमुंचेत्यर्थः।आस्वादयाचते।सपदित्वद्वक्त्रंमुखकमलमधुपानंमुखपद्मनिःसृतवचनामृतपानंदेहि।आस्वादरश्रवणंपानंमुच्यते।अतोपानंदेहीत्युक्तं।मुखकमलमधुपानंअधरामृतपानंवाध्रुवपदं।हेप्रियेयदिकिंचिदपिप्रियाप्रियनिरपेक्षंस्वल्पमपिवदसितदादंतरुचिकौमुदीतवदशनानांयादीप्तिःसैवकौमुदीचंद्रज्योत्स्नासाऽतिघोरंअतिभीमंदरंतिमि

सत्यमेवासियदिसुदतिमयिकोपिनीदेहिखरनखरशरघातं।
घटयभुजबंधनंजनयरदखंडनंयेनवाभवतिसुखजातं॥२॥

रंदरः साध्वसः।सएवांधकारस्तंहरतीतिदुरीकरोतिअपिच।तववदनचंद्रमावदनंचंद्रमाइवश्रीःस्फुटदधरधरसीधवेप्रकाशमानाधरामृतार्थंममलोचनचकोरंचक्षुःपक्षिविशेषंरोचयति।तादर्थ्येचतुर्थी।अनेनवदनचंद्रमसः तत्प्रियजनकत्वमितिकथितं।लोचनयाश्चकोरत्वेततदेकजीवनतयातदधीनत्वमितिध्वनितं॥१॥मृषाकरोषंप्रकटयंतीमाह।सत्यमितिहेसुदतिशोभनदंतेत्वं।सत्यमेवयथार्थमेवयदिमयिकोपिन्यसिकोपवत्यसितदाखरास्तीक्ष्णायेनखरास्तएवशराबाणास्तैर्घातप्रहारंदेहि।तेनापिचेन्नतुष्यसितदाभुजबंधनंवाहायांबंधनंघटय।तेनाप्यसंतोषश्चेत्रदखंडनंरदैदशनैःअधरेक्षतंजनय।येनवासुखजातंसुखसमूहोभवतितदेवकुरु।तथाचमय्यपराधानुरूपंदंडविधायकोपंमुंचेतिभावः।प्रभूणांहिसहपराधेषुजनेषुताडनबंधनखंडनादयोदंडाःसमुचिताः।अत्रेनद्व्याजननखक्षतालिंगनचुंबनादीन्प्रार्थयते॥२॥ननुयातवप्रियासातवदंडंविद

155

गीत०
११७८॥

गोविं०

यातु। किं मया मतम् आह। त्वमसीति। त्वं मम जीवनमसि। त्वयि विषण्णायां मन विषादो भवति। प्रस
न्नायां प्रसाद इति। त्वमेव मम जीवने मतो जीवनात् अन्यत् किं प्रियं भवति यतस्त्वं न भव त्त्वमसीति भावः।
त्वं मम भूषणं अलंकरणमसि। गौराङ्गी त्वां विना अस्य मम शरीरस्य मे केनापि भूषणेन शोभा
न भवतीत्यर्थः। अनेन नापि व्याजेनालिंगनं प्रार्थ्यते। भवजलधौ संसारे गोपजन्मलक्षणजलधौ
व्रजरूपे रत्नाकरे त्वमेव मम रत्नमसि। यथान्यो रत्नाकरे प्रविश्य परिश्रान्तः कश्चिद्र
त्नलाभात् पूर्णो भवति तथाहमप्यस्मिन् व्रजे त्वां स्त्रीरत्नं प्राप्य कृतार्थोऽस्मीति भावः। अनेन त्वत्प्राप्त्यै
स्य गोपकुलोद्भवे सम्बहुमानं रतिर्जन्म साफल्यमेष्यतीत्यादि वचनं ध्वनितं तथा चा। समु
द्रस्थानीये व्रजे व्रजाङ्गनाः रत्नानि महारत्नं श्रीराधैवेति च ज्ञापितो जातो यदुलक्ष्मी तत्र
त्नमभिधीयते ति। उपसंहरति। भवत्विति। इह प्रवणे मयि भव

त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भवजलधिरत्नं।
भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नं। ३।
नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपं कुसुमशर

ति सततं सर्वदा अनुरोधिनी अनुकूला भवतु। तत्र त्वदनुकूलतायां मम हृदयं मनःकरणं समुद्
योगी यत्नं। अतिशायित प्रयत्नवत्। त्वदाराधनप्रयत्नयुक्तमस्तीत्यर्थः। अनुरोधानुवर्तनामित्य
मरः। ३। नीलनलिनेत्यादि। हे तन्वि कृशाङ्गि। नीलनलिनस्य नीलोत्पलस्येवाभा कान्तिर्य
स्य एतादृशं तव लोचनं कोकनदरूपं रक्तोत्पलसौन्दर्यं धारयतीति विभाति। यदि च कुसुमशरः
कामः तस्य बाणभावेन बाणत्वेन तद्बाणाभिप्रायेण वा इदं कृष्णचक्षुः अनुरंजयसि रक्तं करो
षि। एतस्य चक्षुषो रनुरूपं योग्यं भवति। मन्मथशरमथितमानसानां रमणीनां नात्राणि
लोहितानि भवन्ति बाणत्वेन चेच्छरा हि सततं परमर्मभेदिनो रुधिराक्तत्वे न रक्ता भवन्ति। त्वं
स्वकासंभोगाभिप्रायेण लोचनमनुरंजयेति उपचितमिति भावः। तन्वंगीति संबोधनेनापि का
र्तांग्यास्तव रोषोनाचित इति ध्वनितं। अथवा कुसुमशरबाणैः कटाक्षैस्तेन योभावः शृंगाररस
स्यानुभावः। तस्य स्नेहकटाक्षावलोकनेनेत्यर्थः। कटाक्षावलोकनालसं कृष्णं मां यदि रंजयसि ममा
नुरंजने करोषि एतत्तव बाणस्य वा इदमनुरंजनमनुरूपं युक्तमेवेति भावः। श्यामे लोहितस्यापादनसमर्थां

११७८॥

156

किं वस्त्रसन्नं नीवीस्याह। स्फुरत्विति। मणिमंजरी हारलता कुचकुंभयोः स्तनकलशयोपरि स्फुरतु चंचला
भवतु तव हृदयदेशं वक्षःप्रदेशं रंजयतु स्वरश्मिभिः शोभयतु। त्वत्र यननलिनं रक्ततो धतेलं च चक्षुष्णं
रंजय। सिक्ततो मणिमंजर्यपि त्वं वक्षोयदि रंजयति तदानुरूपं भवतीति भावः। अत्र स्मरकेलिकर्मारं
भे मंजरीयुक्तपूर्णकलशस्थापनं मंगलायैवेति सूचनाय कुचयोः कलशत्वेन मणिहारस्य मंजरी
त्वेन रूपणं युक्तमवेति ज्ञतं। अपि च तव घनजघनमंडले भीसलजघनदेशे रशनापि क्षुद्रघटिका
पि रसतु शब्दायमाना भवतु मन्मथनिदेशाकामाज्ञां घोषयतु संभोगरणे मदनाज्ञया विलासि
नाजनान्योजयत्विति भावः। वचनचातुर्येण स्फुरतु मणिमंजरी रसतु रशनापीत्यादिना विपरीतर
तं याचते। पा। अपि च हे मसृणवाणि स्निग्धवचने भण आज्ञापय। तव चरणद्वयं सरसः सांद्रः स
हरसेन शृंगारेण सहवर्तत इति वा सरसं यथा स्यादेवं लसत् शोभायमानो ऽलक्तकरागो यत्र ता
दृशं करवाणि कुर्यां दशां चरणद्वयं। स्थलकमलगंजनं स्थलोत्पन्नं यत्कमलं स्वकांत्यानस्य तिरस्कारकं

स्फुरतु कुचकुंभयोरुपरि मणिमंजरी रंजयतु तव हृदयदेशं। रसतु रशनापि तव ज-
घनमंडले घोषयतु मन्मथनिदेशं। ध्रु। स्थलकमलगंजनं मम हृदयरंजनं जनि-
तरतिरंगपरभागं। भण मसृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकरागं। ध्रु

अरुणतया सौगंध्यसौकुमार्येण तिरस्कृतस्थलकमलसौंदर्यमित्यर्थः। अनेन चरणस्य पद्मादपि हि
तत्वं कथितं। नत्तहृदयानुरंजनत्वात्। पुनः कीदृशं मम हृदयरंजनं मद्धृदयमानुरागजनकं। अथवा मम
हृदयमपि क्रौंचबंधादौ रंजयति। संभोगे हृस्खलितालक्तकरागयुक्तं करोतीति तथाभूतं। अतो मयाऽ
स्य रंजनमुचितमिति भावः। पुनः कीदृशं जनितउत्पादितो रतिरंगे सुरतकौतुले संभोगरागा
यस्य वा परिभागं परस्परशोभायेन तादृशं। कामोद्रेककारीत्यर्थः। तथा च क्रौंचबंधादौ मम हृदयल
ग्नं सत् परस्परशोभादास्यतीति भावः। परस्परं तु यत्कौतिपरभागः सकथ्यत इति रंगकौशलं
गयोरिति धरणिः। ध्रु। स्मरेत्यादि। हे प्रिये उदारं सुंदरं पदपल्लवं चरणकिसलयं मम शिरसि धेहि मम
मस्तके स्थापय। अनेन प्रियजनचरणस्य सगरवत्वत गौरवातिशये नोपास्यत्वमुच्यते। पल्लवपदेन सौ
कुमार्यसौगंध्ये च तापहारित्वमागत्यसौंदर्यं चेति। उदारं महत्। अभीष्टप्रदं वा तेन सेव्यत्वेयो
ग्यत्वमिति। कीदृशं। मममंडनमलंकरणं। अनेन भगवतः प्रियजनानुवर्तनमेव भूषणमिति

कुचितं। पुनः कीदृशं। स्मरस्य यद्गरलं विषं तस्य खंडनं नाशनं। चिरहिमूर्धापद्त्वेन मलयानि
लोदः स्मरगलत्वनिरूपणात्। स्मरस्य सर्पत्वमाक्षिप्यते। चरणपल्लवे धेहि। से मेन नायिका
याः गारुडत्वद्यस्याक्षेपकमिदं। परमपि सर्पादि विषं गारुडिकचरणाभिमंत्रितपल्लवाधारोप
णेनन्चनाशयतीतिध्वनितं। किंच। मयि दारुणोदुःसहमदनः कामः तज्जनितंयत्कदनं तापः
स एवारुणः सूर्यः ज्वलति। अतस्तेन उपहित्त विकारं ग्लान्यादिरूपं हरनु दूरीकरोतु। अन्योपि
सूर्यसंतापन्नीरसिपल्लवदिस्थापनेननाशयतीतिध्वनितं। अरुणः स्फुटरागे स्यात् सूर्यसूर
स्य सारथावितिी कदनं कलुषे तापे च त्रि। ७। इतीति। इत्यनेन प्रकारेण मेरवैरिणः श्रीकृष्णास्य
राधिका मधिराधां लक्ष्मीकृत्य प्रोक्तं वचनजातं वाक्यसमूहो जयति। सर्वोत्कर्षेण वर्तते। कीदृशं।

स्मरगरलखंडनं मम शिरसि मंडनं धेहि पदपल्लवमुदारं। ज्वलति मयि दारुणो ॥७॥
मदनकदनानलो हरतु तदुपाहितविकारं। ७। इति चटुलचाटुपदुचारु मुरवै
रिणो राधिकामधिवचनं जातं। जयति पद्मावतीरमणजयदेवकविभारती भ ॥८॥

हरं चाटु श्रीतियुक्तं पटु चतुरं चारु सुकुमारं। पुनः कीदृशं। जयदेव नाम्नः कवेर्भारतीति संज्ञाय
स्या एवं भूया या बाणी भूषिता अलंकृता येन तत्तथा मानिनजनेति। मानिनीजनस्य मान
वती लोकस्य जनितं शातं सुखं येन तत्तथा। पाठांतरे। पद्मावती जयदेवस्य पत्नी तस्या रम
णो वल्लभो यो जयदेवकविः तेन भारत्या भारतीसंज्ञया कवित्वं वर्णितं पुनः कीदृशं। अतिन्रा
यित सुखं यस्मात्तत्तादृशं। भारत्या वाण्या भणितमिति तु व्याख्यानं मंदं। तथा सति पौन
रुक्त्यापत्तेः। प्रथमपाठस्तु समीचीन एव। तदुक्तं सारे र्णवसुधाकरे। शृंगारादिषु सर्वे
षु इष्टा भवति भारतीति। शृंगारतिलके च। प्रधानपुरुषप्रायासवक्रोक्तिनिरंतरा। भार
ती च भवेद्वृत्तिर्वीरहास्याद्भुताश्रयेति। चटुलः सुंदरे चलेति धरणिः। चटुलं चाटु प्रिय
वाक्यमिति हट्टचंद्रः। पटुस्तीक्ष्णे निरोगे च चतुरे न्यवदीति विश्वः। शा मे शांत सुखानि
च समरः। ८। ॥ इति श्री गीत गोविंदे नन विंशा प्रबंधः ॥१९॥ ॥ ॥ ॥

इदानीमात्मानं निरपराधं ज्ञापयन्संभोगार्थं प्रोत्साहयन्नाह। परिहरेति। हे कृतातंके। विहितकोपे। श्री राधे त्वं शंकां मम मान्यकामिनी संभोगजातइति संज्ञायं परिहर त्यज। यतो मम स्वांते चित्ते अंतरमभ्यंतरं वितनोः अतनुः शून्याकामादन्यो जनो तादृशो भाग्ययुक्तः स्त्रीलक्षणः कोपि न विशति न प्रविशति। कुतो न विशतीत्याह। परेति। पराः नवकाश्चि निष्ठ्रतराव काशाभ्यां तत्र हेतुमाह। त्वयेति घनेन निबिडेन स्तनजघनेन यस्याः सा तादृशा त्वया सततं नित्यमेव क्रांते व्याप्ते। तथा स्वांतं सदा त्वया पूरिते मदीये हृदये न्यस्य प्रवेष्टुं स्थलमेव नास्ति। सांगस्य प्रवेशाभावाद नंग एव प्रविशति नस्यांगाभावादित्यर्थः। हे प्रयापि

परिहर कृतातंके शंकां त्वया सततघनस्तनजघनयाक्रांते स्वांते परानव काशिनि। विशति वितनोरन्यो धन्यो न कोपि ममांतरं प्रणयिनि परीरंभा रंभ विधेहि विधेयतां। ध्रु॰। मुग्धे विधेहि मयि निर्दयदंतदंशं दोर्वल्लिबंधनिबिडस्तनपीडनानि। चंडि त्वमेव मुदमंच न पंचबाणचांडालकांडदलनां

नि। तस्मात् परीरंभारंभे आलिंगनारंभे विधेयतां कर्तव्यतां विधेहि कुर्वित्यर्थः। अतंकः कोपश्च शंकायोरिति धरणिः। ध्रु॰। यच्चैवं न प्रत्येषि तदा मय्यपराधानुकूलं दंडं आचरेत्याह। मुग्धेइति। हे मुग्धे सुंदरि मूढे वा। निर्दयं दयारहितं दंतदंशं दंतानक्षतं अथ च दोर्वल्लिबंधनं निबिडगाढं स्तनाभ्यां अपीडनं च विधेहि कुर्वित्यर्थः। हे चंडि अतिकोपने त्वमेव मुदं अपराधिनो मम दंडाचरणेन आनंदं अंच प्राप्नुहि। न पुनः पंचबाणः कामः स एव निरपराधिजनहिंसकत्वेन चांडालः तस्य कांडदलनात्। नाराचमहरणात्। असवः प्राणा प्रयांतु निर्गच्छंतु। चांडालप्रहारेण असमीचीनागतिरंतस्त्वया साक्षाद्देव यथोचितदंडाचरणं विधेयमिति भावः।

नयान्वकामपीडयाप्राप्तदैन्यामावस्थयाऽनिकांतरःसंभोगरूपंप्रसादमानवस्याःसकान्ता
ख्याचान्तेतिध्वनितं।चंडीस्यादतिकोपनेत्यमरः।१३।।ननुकोपोनास्त्येवेत्याह।इन्द्रीमु
खीत्यादि।हेइन्द्रीमुखिचंद्राननेतवभंगुरभ्रूःकुटिलाभ्रूःभातिशोभते।कीदृशी।युवज
नानांतरुणजनानांमोहायसंमोहनायकरालोभीषणःकालसर्पीकृष्णाहिवधूःअन्या
भुजंगीदृष्टामोहयतिअत्तोदृष्टमात्राएवेत्यतस्याःकरालत्वं।तदुदितभयभंजनायतस्या
दुदितंयद्भयंतस्यनाशाययूनांतरुणानां।मल्लक्षणस्ययूनइत्यर्थः।त्वदधरसीधुसुधै

इन्द्रीमुखितवभातिभंगुरभ्रूर्युवजनमोहकरालसर्पीतदुदितभय
भंजनाययूनांत्वदधरसीधुसुधैवसिद्धमंत्रः।।१४।।व्यथयतिवृथा
मौनंतन्विप्रपंचयपंचमंतरुणिमधुरालापैस्तापंविनोदयदृष्टिभिः।सुमुखिविमु
खिभावंतावद्विमुंचनमुंचमांस्वयमतिन्नायस्निग्धोमुग्धेप्रियोहमुपस्थितः।१५

वत्त्वदीयायाऽधरसीधुमदिराविशेषःसएवसुधामृतंसएवसिद्धःसाधितःमंत्रः।त्वमेवत्वेदध
रामृतंपाययसितदापरंतद्विषापहरणंभवेदन्यथामस्यादेव।अतोधरपानंदत्वानचकोपसर्प
दृष्टस्यममजीवनंसंपादयेतिभावः।१४।।एवमप्युतरममयच्छंतींप्रत्याह।व्यथयतीत्यादि।
हेतन्विकृशांगितववृथामौनंनिःप्रयोजनवचनेसंकोचोमांव्यथयतिपीडयति।कृशांग्याः
तवएतावत्कोपधारणमनुचितमितिसूचनायतन्विपदोपादानं।तस्मात्त्वंपंचमंरागविशे
षंप्रपंचयविस्तारयहेतरुणिमधुरालापैर्माधुर्यवर्षिसुरतालापैर्मधुरिवचनैर्वातापंम
मसंतापंविनोदायपसारय।हेसुमुखिचंद्राभाननवदनेदृष्टिभिःकटाक्षावलोकैर्विमुखीभा
वमौदास्यंविमुंचसुमुख्यायाअसमुख्यमनुचितमितिभावः।हेमुग्धेअयंप्रियजनःस्वयमे
यानाहूतएवोपस्थितःआगतः।कीदृशःअतिशयेनस्नेहवान्।अतोमानंमुंचयमागतः
प्रियःहंतुंनोचितइतिभावः।१५।।संप्रतिमानापनोदायतदंगस्तुतिंकरोति।बंधूकेतु।।

हे चंडि तेत्रिये अयंतवाधरो बंधूकद्युतिबांधवः बंधूकस्यारुणःपुष्पविशेषस्य या द्युति दीप्ति
तस्याः बांधवः सुहृत्तोषकर इत्यर्थः। अनेन बंधुकादिभिः श्रेष्ठ्यं उच्यते। अयं च स्निग्धो गल्लः
कपोलः मधुकच्छविः मीदृक्कुरदृक्जनित पांडितेभैया मधूकपुष्पस्येव छविः कांतिर्यस्य एतादृग्
श्चकास्ति शोभते। ते लोचन नीलिन श्रीमोचन स्वकांत्या निलोत्पलस्य कांतिं मोचयति त्याजय
ति तादृक्शां स्वभावत एव नीलतारकत्वा नील चक्षुरंजनेन विनापि सुतरां नीलोत्पलादप्यति
शोभते इति भावः। हे कुंदाभदंति कुंदस्येवाभा येषां तादृशाः दंता यस्याः तादृशी तव नासाति
लप्रसूनस्य पदवीं तिलपुष्पप्रसिद्धिं अश्यति प्राप्नोति मन्यते इति पाठे ऽतिक्राम

बंधूकद्युतिबांधवो यमधरः स्निग्धो मधूकच्छविर्गल्लश्चंडि चकास्ति
नीलनलिनश्रीमोचनं लोचनं। नासाभ्येति तिलप्रसूनपदवीं कुंदाभ
दंति प्रिये प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः।१९

तीत्यर्थः। प्रायः इति तर्कयामि। सः प्रसिद्धः पुष्पायुधः पुष्पमेवायुधं शस्त्रं यस्य तादृशः
कामः त्वन्मुखसेवया विश्वं जगज्जिजयते। कामः पंचभिः शरैः विश्वं विजयते त्वन्मुख
बंधूकमधुनीलोत्पलतिलकुंदपुष्पाणि संतीति त्वन्मुखादेव प्राप्तायुधः कामो विश्वं
जयत इति भावः। तथाच रक्तबीज नालकषायोज्वलेति अकर्षण वशीकरणोन्मादन
द्रावणः शोषणेति कामस्य शराः कथिताः। त्वन्मुखसेनयेति पाठे त्वन्मुखमेव सेना
कटकं तेन। बंधूको बंधूजीवः स्यादिति विश्वः। मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुम
इति हारावलिः।१९ श्री राधाधरामृतपानलुब्ध मिलिंदायनमः। हे दृशाविति।
हे तान्विलं पृथ्वी गतासि पृथिव्यां प्राप्तासती विबुधयौवनं देवयुवतीनां समूहं अ

गीत०
॥८५॥

होआश्चर्यं वहसि धारयसि एकेकेनैवांगेन देवांगनानां सौंदर्यं तिरस्करोषीत्यर्थः। तदेव
हा। दर्शयति। तव दृष्टौ नेत्रे यदालसे समदे नहर्षेणालसे मंथरे। तथा च स्वर्गे एके च मदाल
सा नाम्नी देवांगना। त्वं तु नेत्रे एव द्वे मदालसे दधासीत्याश्चर्यमिति भावः। तव वदनं इंदुम
त्यास्पदं। इंदुविषयिणी या मतिस्तस्या आस्पदं विषय इत्यर्थः। तव मुखमयमिंदुरिति म
तिर्भवति। तथा च इंदुमती देवांगना तस्याः सौंदर्यादप्यधिकं त्वं मुखमेव वहसीति
श्लेषेण लभ्यते। तव गतिः गमनं जनमनोरमं लोकानां मनोहारिणी ॥ अथवा
जनस्य मल्लक्षणभृत्यजनस्येति। तथा च मनोरमा नाम्नी देवांगना

दृष्टौ तव मदालसे वदनमिंदुमत्यास्पदं गतिर्जनमनोरमा विधुतरंभ
मूरुद्वयं। रतिस्तव कलावती रचितचित्रलेखे भ्रुवावहो विबुधयौ
वतं वहसि तन्वि पृथ्वीगता ॥१७॥

तदात्मिका। अथवा रमा लक्ष्मीस्तदात्मिका। लक्ष्म्याः सौंदर्यादिकं तव गात्रे यंत्रभूतं वर्त्तत
इत्यर्थः। तवोरुद्वयं ऊरुयुग्मं विधुतरंभं विधुता स्वत्रोभया तिरस्कृता रंभा कदली
येन तादृशं। तथा च ऊरुसौंदर्येण तिरस्कृता रंभा नाम्नी देवांगनापि। अथवा च तव रतिः सुरत
क्रीडा कलावती कामकलाकौशलकारिणी। हावभावकिलकिंचितमोट्टायितबिब्बोकादि
मनीत्यर्थः। तथा च संभोगकौशलेन वाहृता कलावती नाम देवांगनेति भावः। भ्रुवौ रचित
चित्रलेखे निर्मितविचित्रलेखे च रुचिरपाठे मनोहरे इत्यर्थः। तथा च स्वर्गे एका चित्रलेखा अ
त्र तु च द्वाभ्यां चित्रलेखा द्वयं रचितमित्याश्चर्यमिति भावः। प्रेयो नामायमलंकारः। तदुक्तं
दंडिना। प्रेयः प्रियतराख्यानं रसवद्रसपेशलमिति। पृथ्वीछंद इत्यपि ध्वनितं। तथा श्लो
कद्वयेन गुणकीर्त्तनेन मानवश्याः प्रसादनं कथितं ॥१७॥ कविः सर्गांते आशिषं प्रयुंक्ते। ॥८७॥

गोवि

प्रीतिमिति। हरिः श्रीकृष्णः वः युष्माकं गायतां शृण्वतां प्रीतिमानंदं तनुतां विस्तारयतु। भक्ता-
नां क्लेशानां हरतीति हरिः। किंलक्षणः रणे संग्रामे राधायाः पीनौ पयोधरौ तयोः स्मरणकृतुसं-
स्कारोबोधायाभ्यां तौ तादृशौ कुंभौ यस्य तथाविधेन कुवलयापीडेन हस्तिना सार्द्धं संभेद-
वान् संसर्गवान्। अत्र प्रचुरशृंगारित्वं तथा च श्रीराधायां सर्वाधिकभावं तथा च श्रीकृस्या-
द्भुतवीर्यं शृंगारविरोधिभयानकहेतुमहासत्वहस्तिसंग्रामे शृंगाररसस्याविर्भावेन वर्णि-
तमिति ज्ञेयं। तदेवाह। यत्र यस्मिन् व्रणे तत्कुंभस्थलदर्शनोद्बोधात् सात्विकविकारेण स्विद्यति
स्वेदं कृतवति। पुनः केनापि सुखोदयेन क्षणं मीलति ईक्षणं निमीलति सति। अथ अथानंत-
रं तत्क्षणमेव द्विपे क्षिप्ते सहते सति। कंसस्यालमत्तिन्नायेन जितं जितयावेगे

प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्धं रणे राधापीनपयोधरस्मर-
णकृत्कुंभेन संभेदवान्। यत्र स्विद्यति मीलति क्षणमथ क्षिप्ते द्विपे
तत्क्षणात् कंसस्यालमभूज्जितं जितमिति व्यामोहकोलाहलः। छ॥

नद्विरुक्तिः इति व्यामोहकोलाहलः अभूत्। अथ मर्थः। जितं तावत्प्रथमं कंसभायामानंदो जा-
तः। पश्चात्सत्क्षणमेव हं तद्दीपे आवेगा छत्रेणा जितमिति अमुकनामप्रकारेण व्यामोहः मूर्छा
लोकाहलः हाहाकारश्चाभवदित्यर्थः। यद्वा उदितसात्विकविकारेनादृष्टास्यदर्शनात् व्यामो-
हात्तत्रोस्या जितमिति कोलाहलोऽभवदित्यर्थः। छ॥ ॥ इति श्रीगीतगोविंदे मानिनी-
वर्णनं मुग्धभावो नाम दशमः सर्गः ॥१०॥ ॥ दशमे मानप्रकारमनुवर्ण्येदानीमेकादशे
साम्नानीतायां मानिन्या अभिसारमाह। सुचिरेत्यादिना। कापि अंदिनिष्ठाभिधा सखी श्री-
राधां जगाद बभाषे का सति प्रदोषे स्फुरति सति। कीदृशे दृष्टिमोषे दृष्टिं मुष्णाति चोरयति स्वविषय-
ग्रहणसामर्थ्यं करोतीति तादृशोरसोबोधकागारदर्शांधकारेत्यर्थः। पुनः कसति। केरावमृग

क्षीहरिणमयनां श्रीराधां । सुचिरं बहुकालं व्याप्यानुनयनं प्रीणयित्वा प्रसादयित्वा कुंजय्या
लतोपावेष्टितं कुटिरां प्र्यु । तरन्त्रायनीयं गतवति । सुचिरं अभिसारादिना तस्यां स्नेह । धिक्ये
न तद्वश्यता कस्थितेति ध्वनितं । राधानुनय एव मम परमपुरुषार्थ इति ज्ञापनाय सुचिरं
पदोपादानं । कीदृशे केन्द्रावे । कृतवेशे । कृताभिसारोचितालंकरेण । अथवा । निर्मिते श्रीरा
धामंडनार्थे विविधपुष्पादिनालंकरणादिकं येन तादृशे । कीदृशीं राधां । रुचिता रुचिरा मनो
हरा भूषा लंकृतिर्यया तादृशीं पुनः कीदृशीं । निरवसादां । निर्गतोऽवसादाः श्रीकृष्णानाम
म सजं दुःखं यस्याः तां । श्रीकृष्णानुनयात्तु विगतखेदामि

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतवति कृतवेशे केशवे कुंजशय्यां ।
रचितरुचिरभूषां दृष्टिमोषे प्रदोषे स्फुरति निरवसादां कापि राधां जगाद । ६९
अतः परं श्लोकचतुष्टयं अष्टपद्यनंतरं मग्रिमाष्टपद्याः ज्ञेयं
सा मां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यंगमालिंगनैः प्रीतिं यास्यति रंस्यते सखि सम
ति संचिंत्य नुः सत्वांप न्यातिवेपते पुलकयत्यानंदति स्विद्यति प्रत्युद्गच्छति मूर्च्छति । स्थि
र्यः । ६९ । पुनरपि तस्योत्कंठाधिक्यं कथयंती त्वरयति । स्येत्यादि । हे सखि सा राधा व्यागत्य
मां द्रक्ष्यति ईक्षिष्यते । दृष्ट्वापि मां स्मरकथां स्मरक्षोभेण सवलितमधुरवक्रोक्तिकं दर्पकेलि
सूचिकां कामकथां वक्ष्यति । कथयिष्यति स्मरालापं कृत्वा सा प्रत्यंगं प्रत्यवयवं च मम आलि
गनैः प्रीतिं यस्यति । प्रीतिं प्राप्य कापि मया सह रंस्यते केलिं करिष्यति । इति चिंताकुलः स श्री
कृष्णः । स्थिरः तमः पुंजे स्थिरांधकारसमूहे तां पश्यति । समागत्य साध्वसेन वेपते । पुल
कयति अंगानीति । अथवा । तवालिंगनं विभाय स्पर्शसुखेन रोमांचयुक्तो भवतीत्यर्थः ।
आनंदयति संभोगात्क्रीडामनुकल्प्यानंदयुक्तो भवतीत्यर्थः । तेन च संभोगश्रमेण स्विद्यति
स्वेदयुक्तो भवति पश्चात्सुरतांते न पुनरपि सतृष्णं दृष्ट्वा अनिच्छया गच्छतीं प्रत्युद्गच्छति । प्रत्युत्थानं

स्थिरतमः पुंजे निकुंजे प्रियः ॥ ७० ॥
करोति इत्यनेन रसवतीत्वं ... करोति

श्री

तिरस्कृतिनिनिर्वृत्तोभूत्वाकंपपुलकस्वेदसात्त्विकविकारान्प्रकटयतीत्यर्थः।साक्षात्समागमेकी
दृग्घोररसोदयोभविष्यतीतिकेनचकुंनाख्यते।अतिंघ्रंगंतव्यमितिभावः।प्रत्यंगमालिंगनेनच
क्षाधिरूढमालिंगमुक्तं।।शार्दूलविक्रीडितंछंदः।दीपकालंकारः।७०।।श्रीकृष्णस्यप्रेमानुव
र्ण्यदानीमभिसारोचितनिबिडांधकारस्योदीपनत्वमनुवर्णयंतीपुनर्रैपित्वरयति।अक्ष्ण
रित्यादि।हेसखिध्वांतंअंधकारः।निकुंजेलतामंडपेप्रसकृत्सर्वतःसुदृशांसुंदरनयनानांक
तीनांपरवंचकानां।अभिसारसत्वरहृदांअभिसारेसत्वरंतीव्रंहृत्तुयासांपरमविदग्धावि
लासिनीनामित्यर्थः।तासांप्रसंगंप्रत्यंचयचमालिंगतिहेलस्यति।किंकुर्वन्।अक्ष्णोर्नय
नयोः।अंजनंकज्जलंनिक्षिपित्।श्रवणयोःतापिच्छगुच्छावलीतमालस्यस्तबकपरंपरांनि
क्षिपित्।मूर्ध्निमस्तकेश्यामसरोजदामनी

अक्ष्णोर्निक्षिपदंजनंश्रवणयोस्तापिच्छगुच्छावलींमूर्ध्निश्यामसरोज
दामकुचयोःकस्तुरिकापत्रकं।।धूर्तानामभिसारसत्वरहृदांविष्वक
निकुंजेसखिध्वांतंनीलनिचोलचारुसुदृशांप्रत्यंगमालिंगति।।७१।।

नीलकमलमालांनिक्षिपत्।कुचयोःस्तनयोःकस्तूरिकापत्रकंमृगमदचित्ररचनांनिक्षि
पत्।कीदृशंध्वांतं।नीलनिचोलंचारुप्रच्छदवत्सुंदरं।अभिसारोचितवरप्रभूषणादिकंस
र्वंध्वांतमेवकरोतीत्यर्थः।अतोभूषादिनिर्माणेनापिकालातिक्रमोनयुक्तइतिभावः।शा
र्दूलवृत्तं।तथान्वा।स्त्रीणांमलंकारोदिरत्ननाधिकारोनपुंसकादानामेवेतिनपुंसकनिर्दे
शेनध्वनितं।अपिचाश्यामसुंदरेणैवसर्वभूषादिकंसंपादनीयमित्यलंमंडनविलंबेनेति
तस्मादृशात्ध्वनितंधूर्तःस्याद्वचकेलोकेच।।७१।।किंचभावादृशीनांप्रेमपरीक्षाकारणमप्येतदि
त्याह।काश्मीरेत्यादि।काश्मीरवत्कुंकुमवत्।गौरंवपुःशरीरंयासांमीदृशीनामभिसारिकाणाम
भिसारपराणांनायिकायिकानां।अभितःसर्वतःरुचिमंजरीभिःकांतिपरंपराभिःआबद्धारेखा
येनतादृशं।एततमालदलनीलत्तमं।तमालदलवत्पल्लवदलवदतिशयनेननीलंतमिस्त्रंतमः

तत्प्रेमहेमनिकषोपलत्तां। तासां अभिसारिकाणां हेमतदेव हेमस्वर्णं तस्य निकषोपलतां च
षकैण पाषाणतां तनोति विस्तारयति। परकांतिमतीनां एतादृग्रूपपिगाढांधकारे सर्वं
मुपेक्ष्य कांताभिसारप्रस्थाने नप्रेम्णः शुद्धिः परीक्षतेति भावः॥८२॥ परमविदग्धासा
वीररसोद्बोधकवाक्यद्वंद्वैः संकेतनिकुंजसमीपमानाय लज्जावती पुनरपि निकुंजप्र
वेशाय यादिशाति। हारावलीत्यादि। अथ अथानंतरं द्वयं सखीसखीश्रीराधां द्रुतिवक्ष्य
माणमुवाच। कीदृशीं निकुंजनिलयस्य निकुंज एव निलयो निभृतगृहं तस्य द्वारे हरिं
श्रीकृष्णं निरीक्ष्य दृष्ट्वा व्रीडावतीं लज्जायुक्तां प्रथमसमागमे कामिनीनां लज्जा

काश्मिरगौरवपुषामभिसारिकाणामाबद्धरेखमभितो रुचि
मंजरीभीः। एतत्तमालदलनीलतमं तमिस्रं तत्प्रेमहेमनिकषो
पलतां तनोति॥८२॥ हारावलीतरलकांचनकांचिदाममंजीर
कंकणमणिद्युतिदीपितस्य। द्वारे निकुंजनिलयस्य हरिं नि
रीक्ष्य व्रीडावतीमथ सखीमियमित्युवाच॥८३॥ ॥१॥

भवति। द्रुति लज्जावती युक्तां। कीदृशस्य निकुंजे निलयस्य हारावल्यो हारपंक्तयः तरलो
मध्यमणिः कांचनकांचिदाम स्वर्णखचितमेखलादाम मंजीरो नूपुरः कंकणं करभू
षणमेतेषु खचिता ये मणयस्तेषां द्युत्या दीपितस्य प्रकाशितस्य। तरलश्चंचले चले
खंडे हारमध्यमणावपीति विश्वः। निलयश्चारं मंदिरमिति रत्नकोशः॥८३॥ तदेव गी
क। गीतार्थस्त्वा हे मुग्धे सुंदरि। अनुगतमधुमथनानुसरणकृतविलंयादनभिद्रू ॥८२॥

हे राधिके रूपेणाधिके रूपेणाधिके। सकलव्रजांगनातिशायिना सौंदर्येण मोहितव्रजेंद्रनंदने। अथवा। स्वमाधुर्यवर्षिण्या पंचमादिस्वरेण वा वशीकृतकृष्णा वर्णितं च भगवच्छ्रिय॥ कृष्णसारहर पंचमस्वरे मुंचगीतकुतकानि राधिके। प्रक्षते त्र हरिणानुधावतां त्वां नयाचद तिशीषणे जनदृति। रस्तु राब्दे रूपे चेत्येकाक्षरः। मधुमथनं मधुमधुरास्य रसं तं मश्नाति विलोडयतीति तथा। तं शृंगाररसस्वादचतुरमित्यर्थः। अथवा। मधुमथनं भ्रमरवद्व्रसास्वादलंपटं तं। अथवा। मधु वसंतं तं मथ्नाति दहति सयति सः स्मरः तं कंदर्पकोटिसुंदरं अनुसराभिनुगच्छ। कीदृशं। अनुगतं तं च सौंदर्यलावण्यादिना

विरचितचाटुवचनरचनं चरणे रचितप्रणिपातं। संप्रति मंजुलवंजुलसीमनि केलिशयनमनुयातं॥१॥ मुग्धे मधुमथनमनुसर राधिके॥ ध्रु॥

कृष्ट अनुकूल्येन त्वां अनुसृतं तं। अथवा। कामेनाधिकरूतिराधिके शृंगारस्वभावरत्यर्थः रस्तु कामइत्येकाक्षरः। मधु वसंतं। अथवा। कात्स्न्येन सर्वतो भावेन त्वद्वशीभूत्वानुगतं संकेतस्थानं प्रियं अनुसर। क्रीडाभवेत्यर्थः। वसंतस्योद्दीपनविभावात्। अथवा। हे राधिके ऽनुसार नन्वनाहूता कथं व्रजामीति चेदत आह। मधुना माचिदूषकोयं समागतस्तेन मकोटिचल्लभात्वमेवासि। त्वत्सादनरवस्त्रोभया पिव्रजसुंदरीकदंबमपि न तुलयामि। इत्यादिवचनकदंबस्य रचना संदर्शयेन तादृशं। पुनः कीदृशं। तव चरणारविंदे रचितः प्रणिपातो चनतिर्येन तादृशं। अथवा। तव नयनाममच्चरणे रचितः फणिपातो यन तादृशं। चरणे संकेतार्थाभिमुखगमनार्थमिति वा। विविधानुनयपूर्वकं नमस्क्रिया कथनामर चितपदौ

पादानां तर्हि संप्रतिकृतागतमाह।

167

संप्रतीति। संप्रत्यधुना मंजुलो मनोहरो यो वंजुलो वेतसः तस्य सीमनि पर्यंतेव्यशो कलतिकातटेति यावत्। यत्केलिशयनं क्रीडाशय्या तामनुलक्षीकृत्य यातं गतं तत्रस्थः त्वां प्रतीक्षत इत्यर्थः। वंजुलादीनामुद्दीपनविभावत्वेन परिगणनात्। तां प्रोत्साहयंती त्वरयति।।१।। घनेत्यादि हे सखि त्वं पिहि श्रीकृष्णमुपगच्छ। कथं यथास्या स्यात्। एवं पुनः कथं यथास्यात्। दरेण साध्वसेन मंथरश्चरणे विहारः पदविन्यासो यत्र। एवं यथास्यात्। तत्र हेतुगर्भविशेषणेन संबाधयति घनयोर्निबिडयोर्जघनस्तनयोर्भारस्य भरो तिशयो यस्यास्तादृशि। मरालानां हंसानां स्वकीयमंथरागमनेन मंजीरादिशब्देन च निकारं तिरस्कारं विधेहि कुरु। संप्रति मरालेषु शब्दायमानेषु सत्सु मंजीरादिध्वनिरपि मरालशब्द

> घनजघनस्तनभारभरे दरमंथरचरणविहारं। मुखरितमणिमंजीर
> मुपैहि विधेहि मरालनिकारं।। श्रृणु रमणीयतरं तरुणीजनमोहन
> मधुरिपुरावं। कुसुमशरासनशासनवंदिनि पिकनिकरे भज भावं।।२।।

व्यस्येत्येव लक्ष्यते। संप्रति योग्याभिसारक्षण इति ध्वनितं। अथ च हे सखि शब्दो यात्रायां शुभं सूचयतीति गमने प्रति विलंबो न कार्य इति भावः। तदुक्तं वसंतराजे। काले सुवस्वपि दर्शनेन हंसस्य शब्देन च सर्वसिद्धिरिति। मरालो राजयंसेस्यान्मराले हंसमात्रकः इति धरणिः। निकारः स्यात्परिभवे धान्यस्योत्करणेपि चेति च।।२।। अन्यमप्युद्दीपनप्रकारं दर्शयति। तरुणीजनानां मोहनं माधुर्यातिशयेन मोहजनकं मधुरिपोः श्रीकृष्णस्य रावं शब्दं करकमलेन करामि। चरणमहमागमिता सिविदूरमित्यादि निमधुराणि संभाषणानि महामधुरमोहनत्यद्भुतस्वरग्राममूर्छनातानतालरागै रालापितं स्वद्गुणसंकेतिवेणुनादं वा श्रृणु आकर्णय। कीदृशं रमणीयतरं अतिशयेन रमणीयं। अतो तरुणीजनमोहनं मधुपविरावमिति पाठे मधुपानां भ्रमराणां विविधप्रकारेण शब्दा।।८४।।

कथवा मधुः माधुर्यरसः तं पिबति

असासत्या स्वादयतीति मधुपः श्रीकृष्णः तस्य विविधानुनयालापमिति मधुपशब्देनापि भ्रमरश्लेषेण तद्रसलांपट्यं तद्गुणगानपरत्वं च कथितं । तथा च श्रीभागवते। मधुरया गिरेति। का स्त्रीति चापि कनिकटे कोकिलसमूहे। कुसुमशरासनबंदिनि सति। कुसुमान्येव शरासनं धनुर्यस्य तादृशः कामः तस्य शरासनं तदाज्ञातया बंदिनि स्तावके सति। अथवा। कुसुमशरासनं वंदितुं नमस्कर्तुं शीलमस्य तादृशे। कामाज्ञाकारिणि सतीत्यर्थः। भावं श्रीकृष्णे नुरागं भज त्वमाश्रय। अथवा। कामाज्ञया शब्दायमानेपि पिकरे भवमभिप्रायं भज। भिक्कंनिनंद श्रुत्वा तद्गृहे सप्रियतमसंभोगार्थं वसरे पिके कादी नास्ति भिवंश्रुकदी कुवित्यर्थः। बंदिनस्तायका इत्यमरः। अत्रापि पिकरेण झंकारेण श्रीकृष्णस्य मधुरस्वरो यात्रायां गीतवाद्यवत् ।

र

अनिलतरलकिसलयनिकरेण लतानिकुरंबं। प्रेर॥
णवामिव करे भोरु करोति गतिं प्रति मुंच विलंबं॥४॥ ध्रु॥

करभः कनिष्ठिकामणिबंधपर्यंतं करस्य बहिर्भागः तद्वन्निम्नोन्नतौ ऊरू यस्यास्तादृशि। गतिगमनं प्रति विलंबं कालक्षेपं मुंच त्यज। अनिलेन वायुना तरलश्चंचलो यः किसलयनिकरः नवपल्लवसमूहः तत्स्वरूपेण करेण लतानिकुरंबं लतासमूहः त्वत्प्रेरणमिव करोति। किसलयकंपच्छलेनासमंजसमसहमानो लतासमूहोपि त्वां प्रेरयतीति विलंबेन का र्यं इति ध्वनितं। शकुनशास्त्रे चा वामे बंधुरवाक्यक्षीवृक्षः पल्लविनोग्रतः। अनुकूलो वहन्वायुः प्रयाणे शुभसूचक इति। समूहे निकुरंबमस्त्रियामित्यमरः। मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः। प्रयोजनामोलकारः।४। अपि स्फुरितमिति। अस्तु कुंचकुभंस्तनकलशं पृच्छास खीसमीचीनार्थंदेति प्रसंकुरु। कीदृशं। स्फुरितं सकंपकस्मादिव अनंगतरंगवशादिव। अनंगस्य कामस्य यः तरंगः ऊर्मीः तद्वशादिव। अनंगतरंगेत्यनेन तस्याः रसतरंगिणीत्वमाक्षिप्यते। अन्योपि कुंभो नद्यां तरंगैः प्रेर्यमाणः सकंपो भवतीति। अयमपि

मसमीनयाच

गीत०
॥८५॥

रणादिवसकंपइतिभावः। इत्यन्वयो ऽत्रास्त्रेक्षाद्योतकः। पुनः कीदृशं। मनोहरोयोमुक्ताहारः स एव विमलानिर्मलाजलधारायत्र तादृशं। तत्र स्तनोपरिस्थितस्यहारस्यजलधारात्वनिरूपणात् स्तनस्यपूर्णकलशत्वेन निरूपणमाक्षिपते। पूर्णादिव कलशात्तरं गैरांदोलने सति बहिर्जलधारानिःसरणंसंभवात्। पुनः कीदृशं। सूचितोहरेः श्रीकृष्णस्यविरहतापहरणाद्वैरिरिति। परिरंभ आलिंगनं येन तादृशं। नारीणां स्तनः कंपः प्रियसंगमं सूचयतीति शाकुनिकाः। तदुक्तं। निस्यंनायां स्तने कंपः प्रियसंगमसूचक इति। पूर्णकलशत्वेन निरूपणमिति यात्रायां पूर्णकलशदर्शनं शुभमिति सूचनायाः॥७॥ सख्याः सकाशाल्लज्जांतीत्याह। अधिगतमित्यादि। इदं तव वपुः सखीभिः अतिशयेन रतिरणाय सुरतसंग्रामाय सज्जं कृतालंकरणादिसविधानमधिगतं ज्ञातं। अथवा सखीभिरिदं तव वपुः

स्फरितमनंगतरंगवशादिव सूचितहरिपरिरंभं। पुच्छ मनोहरहारविमलजलधारममुं कुचकुंभं॥७॥ अधिगतमिति खिलसखिलसखीभिरिदं तव वपुरिति रतिरणे सज्जं। चंडि सितरशनारवडिंडिममभिसर सरसमलज्जं॥८॥ धी

बहुधा रतिरणे सज्जमधिगतं। इदानीं तासां कालज्जेति भावः। अतो हे चंडि रतिरणरंगकर्कशे अलज्जे निःशंकं सरसं सोत्साहं। अथवा रसः शृंगाररसस्तेन सहितं सरागं वा। अभिसर। इतः शब्दायमानः कृतोरशनायाः कांच्या रवो ध्वनिः डिंडिमो वाद्यविशेषो यत्र एवं यथास्यात्तथा। अभिसर। श्रीकृष्णाभिमुखं सुरतरणसंकेतभूमिं प्रयाहि। अन्यत्रापि सोत्साहरणे डिंडिमस्ताद्यते पवेति ध्वनितं। अभिसर मेति पाठे। अलज्जे लज्जारहितं श्रीकृष्णेन सह सुरतं भिधेहि।
यो सैंगा दोलज्जायाः अनुपयोगात्वात्। अलंलज्जा मिस्कात्तं किंचो कुचिदात्मनेपदेनोपि परस्मैपदि न एवायथा चलेद्धाधो धारा धामित्यादि। चलद्धाधाधीमित्येतत्तदंडुगसिंहरीकायां च मेरीयित्तकुट्टमिस्येर। अभिरसः शृंगाररसेन सहितं यथास्यादेवं पुनः कथं यथास्यात्। रसितरशना

नारवडिडिमं यथास्यात्तो अनेन विपरीतसुरतमिति ध्वनितं। तो न स्तु सखीभिः कृष्णः यामिनि [illegible] इति भावः॥८॥ गोविंद

॥८५॥

तदेवाह। स्मरेत्यादि। हे सखी मचलं व्यसलीलं लीला सहितं यथा स्यादेवं चलगच्छ। कीदृ
शेन करेण। स्मरस्य कामस्य येन शरास्तद्वत्सुभगा सुंदरा नखा यस्मिन्तादृशेन। अन्यस्मि
न्नपि रणे शस्त्राणि भवंति अत्र रतिरणे तु नखा एव स्मरशस्त्राणीति भावः। अपि च
वलयक्वणितैः कंपोत्थैः शब्दैः हरिमपि निजगतिशीलं स्वयगमस्वभावस्वरूपं। अथ
वा मतिप्राप्तिं शीलचरित्रं अवबोधय ज्ञापय। अन्यत्रापि समीचीनो योद्धा प्रतिभटम
वहितं कृत्वा च सुध्यते इति ध्वनितं। निगदितशीलमिति पाठे कथितस्वभावमित्यर्थः। ७
श्रीजयदेवेत्यादि। इदं श्रीजयदेवेन भणितं। हरिविनिहितमनसां हरौ विनिहितं तत्प
रं मनो येषां। तादृशानामविरामं अनवरतं कंठतटीं अधिवसतु। कंठ

स्मरशरसुभगनखेन सखीमचलं व्यकरेण सलीलं चलवलयक्व
णितैरवबोधय हरिमपि निजगतिशीलं॥७॥ श्रीजयदेवभणितम
धरीकृतहारमुदासितवामं हरिविनिहितमनसामधितिष्ठतु कं

देशो वसतिरित्यर्थः। कीदृशं। अधरीकृतः स्वगुणैर्हीनः कृतो हारो येन तादृशं। पुनः कीदृ
शं उदासिता स्वमाधुर्येण तिरस्कृता वामा येन तादृशं। अविराममिति भणितस्य वि
शेषणं वा। कीदृशं नित्यमित्यर्थः। कंठस्थितस्य हारस्य रामायाश्च विषयिणां शोभाप्र
दत्वं सप्रदत्वं भवति। श्रीजयदेवस्य भणितं महत्तमैः कंठे धृतं एतस्य माधुर्यास्वा
दनेन तयोस्तिरस्कारो जायत इति भावः॥८॥ ॥इति श्रीगीतगोविंदे विंशः प्रबंधः
॥२०॥ ॥अस्याष्टपद्यनंतरं चत्वारः श्लोकाः॥ सा मां द्रक्ष्यति०॥१॥ अक्ष्णोर्निक्षि०
काश्मीरगौ० हारावली०४॥ ततः मंजुतरे सष्टपदी। एवं सततितिश्लोकाः। एकोनसप्त
त तिश्लोकानंतरं लिखितास्ते अत्र ज्ञेयाः। दिचगीति नाहा मंजुतरेति। गीतस्यास्य वराटी

रागः। मंठतालः। गीतार्थस्तु। हे राधे माधवसमीपं श्रीकृष्णांतिकं प्रविश। इह मंजुतरकुं
जतलकेलिसदने। मंजुतरं यत्कुंजतलं निकुंजाभ्यंतरः तदेकैवकेलिसदनं क्रीडामंदिरं
तत्र विलस विलासं कुरु। कीदृशि। रतिरभसेन रसकृतादेन हसितं हास्ययुक्तं वदनं य
स्यास्तत्संबोधनं। रतिरभसहसितं विद्यते यस्याः सा रतिरभसहसितवान्। श्रीकृष्णः
तस्य अनः प्राणो यस्याः सा तत्संबोधनमिति वा। श्रीकृष्णस्य प्राणरूपे इत्यर्थः। अथ
वा। इह निलकुंजे प्रविश्य माधवसमीपं विलस संभोगं कुरु। हे मंजुतरकुंजतलकेलि
सदने। मनोहरतरं कुंजतलमेव क्रीडागृहं यस्यास्तादृशि।

मंजुतरकुंजतलकेलिसदने प्रविश राधे माधवसमीपमिह
विलस रतिरभसहसितवदने ॥१॥ नवलसदशोकदलशयने
सारे प्रविश राधे माधवसमीपमिह विलस कुचकलशतरलहारे ॥२॥

अथवा इह माधवे विलस कीदृशे। मंजुतरकुंजतलं केलिसदनं यस्य तादृशे। पुनः की
दृशे। रतिरभसेन हसितं वदनं यस्य तादृशे। प्रविश राधे माधवसमीपमिह विलसं
इत्येतद् ध्रुवपदं प्रतिपदमनुवर्तमानत्वात्। मानशोभात् स्याधवसौंदर्यनिधानं इत्यर्थः।
वल्लभायाः सभागमे निरवधिसौंदर्यप्रकटनात् माधवे पदमुपात्तं। कुंजतरपाठे प्रकृ
ष्टकुंजे इत्यर्थः ॥१॥ आपि च नवलसदिति। कीदृशे केलिसदने। नवनूतनं लसच्छो
भायमानं यदशोकदलं अशोकपत्रं तन्निर्मितशयनं शय्या यत्र दवसारे युवतीनां
तादृशे। माधवसमीपं प्रविश शय्यायां विलसेत्यर्थः। एवंभूतश्रेष्ठशय्यायां प्रविश

विलसति। कीदृशि। कुचकलशयोः स्तनकुंभयोः तरलश्चञ्चलो हारो यस्यास्तादृशि। अप रस्मिन्नपि विलासगृहे महाधनं तिष्ठतीति ध्वनितं। कुचकलशतरलहारेइत्यनेन विप रीतसुरतं सूचितं। अत्र कलशहारयोः संयोगात्प्रे मंगलाचरणमपि च ध्वनितं। अथ वानचलसदृशो कदलैः श्रीकृष्णनिमित्तिदृश्याया सारः श्रेष्ठ्यं यस्याः सा भा च प्रधान निर्वेद्याः तस्य सर्वस्वरूपा इत्यपि तस्या एव संबोधनं। अथवा। तादृशानायनमेव सारो यस्यास्तादृशि। अथवा। इह माधवे विलससदृशो कशाय्यायां च रांगनायाः महाधने। पुनः कीदृशे पुरुषकर्तसंभोगादौ खलु कुचकलशयोः उपरि चञ्चलो हारो यस्य स तादृशे। अ शोकदलपदेन नाशोषविरहदुःखहानिशनंदावाप्तिश्च भविष्यतीति ध्वनितं॥२॥ ॥

कुसुमचयरचितशुचिवासगेहे। प्र० मिह विलस कुसुमसुकुमारदेहे॥३॥

कुसुमचयेति। इह कुसुमचयेन पुष्पसमूहेन विचित्रवितानैर्विविधमंडनादिनि शुचि अनुप हतं अनुपभुक्तं। अथवा शुचिः शृंगारः तस्य रूपं शृंगारप्रधानानां भोग्ययोग्यं वो। श्रीकृष्णे न निमित्तं तत्र योगार्थं वासगृहं लीलागृहं तत्र विलास। कीदृशे। कुसुमादपि सुकुमारो देहो यस्यास्तादृशि। अथवा इह माधवे विलस कीदृशे कुसुमचयेन रचितशुचिवासो गेहं ये न तादृशे। पुनः कीदृशे। अथवा कुसुमचयेन रचितं अर्थात् श्रीकृष्णेन वासगृहं यस्यास्तादृ शीति संबोधनं। प्रविशराधेनत्र कुष्ठो विसरः प्रणयः आसम्यगाधः कंपः प्रकृष्टरसो दीप्त प्रणयकंपः समग्रसात्त्विकविकारो यस्यास्तादृशि। श्लेषकथने सप्तशानामभेद इत्यलं कारिका। तथा च तादृशात्राय्यारचनेन तस्य त्वयि भावः तत्समीपे उदितसात्त्विकविकारेति विलसेत्यर्थः। युद्धधं कंपने तत्र मे तिच प्रसरः प्रणये मे गोविसरः प्रसभबुजेति विश्वः। हे कुसु मसुमारदेहे। कौ पृथिव्यां सुशोभिनाम्य शोभामामसशोभाय यस्य कुसुमः श्रीकृष्णः तस्य सु कुमारं सुतरां कुः अभीप्सितत्वनाश्रयो मारः कामः तद्रूपोदहो यस्यास्तादृशि। श्रीकृष्णासि

173

चलेत्यादि। हे राधे माधवसमीपं चल व्रज। इह केलिसदने प्रविश्य विलस च कीदृशो केलिसद्नो मलयसंबंधीयः पवनो वायुः तेन सरभसोऽगीते च। अथवा चल श्चंचलयो मलयपवनस्तेन चिलासिनी नाम नो सिचालयतीति चलपदेन मांच मे योक्तं कीदृशोर तो चलितं वर्धितं ललितं हाय चित्रो षए च गीतं यया सा तादृशी अथवा। रतो वलितं ललितं कमनीयं गीतं गानं यस्यास्तादृशी। रति वलितं ताचासौ ललितगीता च तस्याः संबाधनो। रसचलितपाठे रस चलितं शृंगाररससंभिन्नं ललितं मनोहरं गीतं गानं यस्यास्तादृशी। रससहितं हाव चित्रो षो गीतं यस्यास्तादृशी इति वा। अथवा इह श्रीकृष्ण विलसा कीदृशो रसा तत्प्रेम्णा वलितं संभक्तं ललितं मनोहरं गीतं तव गुण गाणीयस्याः तादृशोर सवलितं वा। ललितलक्षणं तु नानाविध मनोहार्यस्विभावजं मनोहरं। शृंगारचेष्टितं स्त्रीणां ललि

चलमलयपवनसुरभिशीते। प्रविश्य राधे माधवसमीपमिह विलसरति
वलितललितगीते॥४॥ विततबहुवल्लिनवपल्लवघने। प्रविश्य राधे मा
धवसमीपमिह विलस चिरमलसपीनजघने॥५॥ मधुमुदितमधुप
कुलकलितरावे प्रविश्य राधे माधवसमीपमिह विलस मदनरसरभसभावे।
ते संप्रवक्ष्यत इति॥४॥ वितते त्यादि। हे राधे माधवसमीपं प्रविश्य इह केलिसदने विलस स्त्व।
कीदृशे॥ विततस्तैर्विस्तीर्णे बहुभिर्वल्लीनां लतानां नवैः पल्लवैर्घनसान्द्रे। एवंभूते शायने वा।
त्वं कीदृशी॥ अलसपीनजघने। अलं मंथरं पीनं मांसलं जघनं यस्यास्तादृशी॥ अनेन निर्जयं
बहु कालं शय्यायां संभोगसुखमनुभवेति ध्वनितमिति व्यंग्य॥५॥ मधुमदिते त्यादि। कीदृशो
केलिसदने। मधुना पुष्परसेन मुदितान्यानंदितानि यानि मधुपकुलानि भ्रमरसमूहास्तैः
कलितो विहितौ रावः शब्दो यत्र तादृशे॥ अथवा मधुमुदितमधुपकुलचलदागमनमहोत्से वे रावः
शब्दो यस्य तादृशो माधवे तस्याः श्रीराधायाः संबाधनं वा कीदृशी॥ मदनस्य कामस्य योरसः शृंगार

तादृशो।सरससंभोवेइति पाठे सरसः सरोगाभावो।त्रिप्रायोयस्याः यद्यपि मधुपेत्यनेनैव मधुपानं प्राप्तं तथापिइदानीं तनु मधुपान पातये मुदितमित्यपात।मधु नावसंत्तेवा।दी। मधुरतरेत्ति।कीदृशे।कलिसदने।मधुरतरोतिशायेन मधुरोयः पिकनिकराणां कोकिलसमूहानांनिनदः शब्दः तेन मुखरे।पुनः कीदृशे।दशनरुचिरे वदंतकांतिरे वरुचिरं।शिखरमणिक्यविशेषतादृशीदंतकांतिर्यस्यास्तादृशे।द्वितियपक्षेतिपर्यासोपमा।बो ध्यातदुक्तं दंडिना।त्वद्वदनमिवोन्निद्रमरविंदमभूदिति।शिखरादपिरुचिरादंतकांतिरि त्यर्थः।अथवा।इहमाधवे विलस।कीदृशे।मधुरतरः पिकनिकरा।

मधुरतर पिकनिकर निनद मुखरे।श्रविशराधे माधवसमीपमिहविल
सदशनरुचिरुचिरशिखरे॥७॥ विहितपद्मावतीसुखसमाजे करुमुरारे
मंगलशतानि भणति जयदेवकविराजराजे॥८॥ ध्रु॥ ध्रु॥ ध्रु॥

णांनिनदः स्वसंगमे गोष्टीशब्दस्तेन मुखरे।अनेन गोष्टीध्वनिः कथिता।मधुरतरलपाठे मधुनातरलाश्चचलाइति।पक्कदाडिमबीजाभंमाणिक्यंशिखरं विदुरिति विश्वः।७।विहितेत्ति।हे मुरारे जयदेवकविराजराजे मंगलशतानि कुरु।कीदृशे।भणति तवगुणान्वदंति।पुनः कीदृशे। विहितकृतः पद्मावत्याः श्रीवृंदावनलक्ष्म्याः सुखसमाजः सुखसमूहोयेन तादृशे।अथवा कविराजराजे भणति गायति सति।किंभूते।विहितः प्रियायाः सुखरूपः समाजः प्रियसंगमोयेन तादृशे।किंच।कविराजराजइति प्रौढोयं कविः तदुक्तं।येथोचित्त निजोत्कर्षवादी प्रौढइती रितइति।तद्रसस्यवर्णनेन सर्वाधिक्याद पियुक्तमेव।कविराजराजइति॥८॥इति श्रीगीतगोविंदे एकविंशः प्रबंधः॥२१॥ ॥चैचित्यांतरेण प्रेरयति।वामिसादिना॥ ॥

अयं श्रीकृष्णः आत्यासि सुंदरी भिदुः प्रापः त्वया सुलभत्वेन चक्रीकृतः त्वां चितेन मनसा चिरं व
हन् धारयन् अतिश्रांतः अतिशयेन श्रमयुक्तो जातः कंदर्पेण कामेन भृशमतिशयेन ता
पितः अतिसूक्ष्मे चित्ते पीनस्तनजघनचयास्ते धारणेन श्रमयुक्त एव। अन्योपि धर्मयोगु
रुतरभारोद्वहनं करोति तस्यातिश्रमो भवतीति भावः। अतस्त्वं वसुधया अमृतेन संबाध
संकटं बिंबाधरं बिंबफलसदृशमधरमोष्ठं पातुमिच्छति। एतदपि युक्तमेव श्रांतस्य तत्त
स्य पाने च्छा पथ्यमेव च तत् स्मादृतोः अस्य श्रीकृष्णस्यांकं उत्संगोक्षणमलं कुरु भूषयानन्वयं
बहुनार्यनुरक्तः अतस्तदंकारोहणं दूषमीत्यत आह रहः श्रीकृष्ण कुतः कस्माद्भूतो संभ्रमः भयं
नुपसेवितं त्वदीयचरणं कमलं येन तादृशो नित्यपार्श्वे वितिमीयर्थः। तत्रापि हेतु

त्वांचित्तेन चिरं वहन्नयमतिश्रांतो भृशं तापितः कंदर्पेण चपातुमिच्छति सु
धासंबध बिंबाधरं। अस्यांकं दलं कुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्री
ते दासवदुपसेवित पदांभोजे कुतः संभ्रमः॥७४॥ सा ससाध्वस समानंदं
गोविंदे लोललोचना॥ सिंजाना मंजुमंजीरं प्रविवेश निवेशनं॥७५॥

गर्भविशेषणमाह। भ्रूक्षेपेति। भ्रूक्षेपस्य भ्रूचलनस्य या लक्ष्मीसंपत्तिस्तस्या यो लवो लेशस्तेन क्री
ते दासजनेन संभ्रमो सुकर इति भावः। संभ्रमस्यादूरे भीतो संगमे आदरे पि चेति विश्वः॥७४॥
से स्यादि। सा श्रीराधा निवेशनं क्रीडागृहं प्रविवेश प्रविष्टा किं कुर्वाणा। मंजु मनोहरो यो मंजी
रो नूपुरस्तं सिंजानाम शब्दं कुर्वती। सिंजानमंजुमंजीरं भिति पाठे सिंजानश्चासौ मंजुमंजीर
श्च यत्र तद्यथास्यादिति क्रियाविशेषणं प्रविवेशेति तन्मोहनायकिमपि हायादिकं प्रकटयं
ती विशेषेति भावः। अयं यथास्यात्तथा ससाध्वससहितं सादमानंदसहितं च यथा स्यात्तथा। कार
शी सा। गोविंदे लोले चंचले लोचने यस्याः सा। सिंजाना मंजुमंजीर मिसनेन कंपः सात्विकस्तनपर्ये

वलनं हर्षसाध्वसौ व्यभिचारीभावौ लीललोचनेनानुभावः करा
क्षरूपः। यद्वा चापलो व्यभिचारिभावः। एवं नायस्य श्रीकृष्णस्य स्मरमा
गमे रसोपनिरूक्तः॥७५॥

वनमालिरीकोक्ताष्टपदीत्र्यमिदं पूर्तितिं ॥ लो

वराडीरागेरूपकताले। रागताल ध्रूपदानि पूर्ववत्॥ एवं निकुंजमंदिरे प्रवेशयन्ता संप्राप्तिर्त्ते दर्शन महोत्सवानाहा। साराधा हरिं ददर्श। कीदृशं। राधावदनचंद्र विकोकनेन विकसित यनानाचिका राज्जृभांगविमर्दना धाक्तेएव विदिष्टोर्मयो यत्रतां कमिव जलनिधिमिव। कीदृशं। जलनिधिं विधुमंडलदर्शनिन चंद्रमंडलावलोकनेन तरलिताश्चंचलीकृतास्तुंगा अत्युच्चास्तरंगा उर्मयो यत्र तं। अत्राग्राधश्रृंगाररसत्वेन जलधिसाम्यं। श्रीराधामुखस्य चंद्रसाम्यं। ज्रभांगमर्दनादीनां तरंगसाम्यं। कीदृशं। एकः श्रृंगारास्त्यार सोऽनुरागो यस्य तं। यद्वा एकस्यां राधायां नुरागो यस्य नान्यासु तं। कीदृशं। चिरं बहुकालमभिलषितो वांछितो विलासः केलिर्येन तं। अथ

राधावदनविकोकनविलासितविविधविकारविभंगं। जलनिधिमिव विधुमंडलदर्शनतरलिततुंगतरंगं॥१॥ हरिमकरसचिरमभिलषितविलासं। ददर्श गुरुहर्षवशंवदवदनमनंगविकाशं॥ध्रु०॥ हारममलतरतारमुरसि दधतं परिरभ्य विदूरं। स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरं॥२॥

वा। चिरमधीनं वक्त्रं यस्य तं पुनः कीं० अनंगविकारं कामममंदिरं। मन्मथ कोटिप्रकाशमित्यर्थः। पुनः कीं० विदूरमतिशयेन परिरभ्यालिंग्योरसिवक्षसि हारं दधतं बिभ्राणं। कीदृशं हारं। विमलतरस्तारोतिविमलं मौक्तिकं यत्र तं। किमिव। स्फुटतरः प्रकाशः बहुलो यः फेनकदंबः फेनसमूहस्तेन करंबितं मिश्रितं यमुनाजलपूरं प्रवाहमिव। अत्र कृष्णद्युतेः कल्लोलत्वेन यमुनायाः हारस्यातिविमलत्वेन फनसाम्यं।२। पुनः कीं० हरिं श्यामलं नीलं मृदुलं कोमलं शरीरं मंडलं शरीरस्य प्रत्यंगं यस्य तं। कीदृशं। अधिगतं परिचितं प्रियं गसादं यस्य तेरं दुकूलं पीतांबरं येन। कमिव। पीतरागानां गोरपुष्परेणुनां पटलस्तरः समूहस्तत्रियस्तेन वलयितं वेष्टितं मूलं यस्य तादृशं नीलकमलमिव। अत्र श्रीकृष्णस्य श्यामलत्वेन परागसमूहस्य पीतत्वेनांतर्बहिर्मूले परागत्वात् दृष्टतोपमेव।।३। पुं० कीं० हरिं।

177

तरलानां चंचलानां कटाक्षाणां चलनेन मनोहरं यद्वदनं तेन जनितो रतिरागः सुरतानुरागो येन तं मधुरिपुं राधायाः । एतेन दर्शनसौख्यस्य परा काष्ठा दर्शिता । कीदृशं । स्फुटानां विकसितानां कमलानि यत्र तादृशं । शारदशारत्काले तडागमिव सरोवरं यथा भवति तथा श्रीकृष्णं श्रीराधादर्शनेन भाती स्यर्थः । अत्रेयं व्यवस्था । तडागस्थानीयं श्रीकृष्णः विकसितकमलस्थानीये तस्य नेत्रे । कमलोदरस्थानीयं नेत्रयोर्मध्यभागं खेलितखंजनस्थानीये तन्नेत्रगोलके । शारत्स्थानीया श्रीराधेति यथा च योग्यमुन्नेयं ।

श्यामलमृदुलकलेवरमंडलमधिगतगौरदुकूलं । नीलनलीनमिव पीतपरागपटलभरवलयितमूलं ॥ आतरलदृगंचलचलनमनोहरवदनजनितरतिरागं । स्फुटकमलोदरखेलितखंजनयुगमिव शारदतडागं ॥ वदनकमलपरिशीलनमीलितमिहिरसमकुंडलशोभं । स्मितरुचिरुचिरसमुज्वलिताधरपल्लवकृतरतिलोभं ॥५॥

श्रीराधा शारस्त्राकट्येन श्रीकृष्णचंद्रस्य विकाशो जात इति ध्वनिः ॥४॥ पुनः हरिं श्रीराधा वदनकमलस्य परिशीलनेनासादरावलोकनेन मीलिते स्थिरीभूते मिहिरसमे सूर्यसदृशो कुंडले तयोः शोभा यस्य तं । तं चिनाऽभरणशोभापि भारवाहेति ध्वनिः । यथा सूर्यदर्शनेन कमलप्रकाशस्तथा श्रीराधावदनसूर्यप्रयत्नेन श्रीकृष्णवदनकमलप्रकाशो जात इति प्रेमपरा काष्ठा दर्शिता कीदृशं हरिं । स्मितरुच्या ईषद्धास्यकांत्या रुचिरो मनोहरस्तथा समुल्लसितो राधाधरपानोत्कंठितो योऽधरपल्लवस्तेन कृतो राधायारतिलोभः सुरततृष्णा येन तं । यथा सूर्यमंडले कमलप्रीतिस्तथा श्रीराधामुखे श्रीकृष्णस्य सुरतेच्छेति ध्वनिः । अनेन श्रीराधायामेव तस्य रतिलोभः सूचितो नान्यत्र ॥५॥ श्रीरा॥

पु॰ कीं॰। त्रात्रा किरणेश्छुरितं कबुरितमुदरं यस्य जलधरस्य तद्वत्सुंदराः सकुसुमाः कचा

यस्य तं। पुष्पाणां चन्द्रकिरणैः साम्यं। केशानां च वलाहकस्य साम्यं। एतेन नायकस्य नायिका

दर्शनातिशृंगारिक्त मुक्तं। किं दर्शयति मरे (?) ध्यकारेण दितं यद्विधुमंडलं चंद्रबिंबं तद्वन्निर्म

लो योमलजयतिलकस्य स्थले निवेशोरचनाविशेषो यस्य तं। तिलकस्य चर्तुलत्वात्पूर्णचं

द्र साम्यं। एतेन नायकस्य तिलकशोभोक्ता॥ ६॥ पुनः कीं॰ विपुले विस्तीर्णैः पुलकभरै रोमां

चितसमूहैर्दंतुरितं व्याप्तं। अनेन नायकस्य नायिकादर्शनेन रोमांचितत्वमुक्तमिति ध्वनिः।

कीदृशं रतिकेलिकलाभिः सुरतक्रीडायां चुंबनालिंगनादिकामचातुरीभिरधीरं चंच

लं। अथवा रतिकेलिकलाभिरुपलक्षिता श्री राधा तस्या दर्शनेनाधीरं॥

त्रात्रा किरणछुरितोदरजलधरसुंदरकुसुमकेशं। तिमिरोदितविधु

मंडलनिर्मलमलयजतिलकनिवेशं॥ ६॥ विपुलपुलकभरदंतुरितं र

तिकेलिकलाभिरधीरं। मणिगणकिरणसमूहसमुज्वलभूषणसुभगशरीरं॥ ७

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं। प्रणमत हृदि विनिधाय हरिं सुचिरं

एतेन नायकस्य नायिकादर्शनेनातिव्याकुलतेति ध्वनिः। कीं॰ मणिगणानां आभरणखचि

तरत्नसमूहानां किरणसमूहैः समुज्वलानि दीप्यमानानि भूषणान्यंगाभरणानि तैः सुभगं

सुंदरं शरीरं यस्य तं। अथवा श्री राधांगान्येव मणयः किरणसमूहेन समुज्वलभूषणैः

सुभगशरीरं यस्य तं अथवा श्री राधांगान्येव मणिमणिकिरणसमुज्वलभूषणैः सुभगं श

रीरं यस्य तं॥ ७॥ श्रीकृष्णभजनं शिक्षयन्सर्वानुपदिशति। हे रसिकाः सुचिरं नितरां हरिं सा

धूनां भजनानुसारेण पापतापहरं हृदि विनिधाय। हृदये आरोप्य प्रणमत। स एव भजनी

यो नान्य इति मत। तन्नमनमेव सर्वं करिष्यतीत्यभिप्रायः। कीं॰ सुकृतस्य पुण्यस्योदयेन सारं प्रा

प्तिर्यस्य तं रूपगतावितिधातुः। हरिस्तु भजनेन सुकृतेन प्राप्यत इति प्रसिद्धः। पु॰ कीं॰ श्रीजयदेवभणित

स्य विभवेन सामर्थ्येन सकृत्तोदयसारं। ८।

जयदेवसरस्वत्याः स्वगुणवर्णनेनेति द्विगुणीकृतो भूषणभारो ऽलंकारसमू

येन। जयदेवसरस्वती स्वयमेवोपमालंकारवती भवद्गुणैश्च सुतरामलंकृते

संप्रतिराधायाः श्रीकृष्णदर्शनेनहर्षदशायति। अतिक्रम्यतिइदानींतत्क्षणप्रियतमसमालो
कनसमयेकृष्णावलोकनकालेराधायाः अक्ष्णोनेत्रयोर्हर्षाश्रुनिकरः सात्विकभावेनआ
नंदजलसमूहः पापता कइवा अपांगंनेत्रप्रांतमतिक्रम्यश्रवणापथस्यकर्णमार्गस्यपर्य
तंगमनप्रायासैनैवस्वेदांबुपूरइवा कीदृशयोरक्ष्णोः श्रीकृष्णदर्शनाभिकांक्षया। अतिशये
नचचलत्वंप्रापितयोः। प्रायशः श्रीराधादर्शनाश्रीकृष्णस्याप्येतानिचिन्हानिजातानीति
ध्वनिः।७८। पुनस्तदेवप्रकारांतरेणाह। भजत्येति। मृगदृशोमृगाक्ष्याराधायाः तल्पांतंशय्या
प्रांतंभजत्याः प्राप्नुवंत्या अवहिते सावधाने आलीपरिजने सखीसेवकवर्गेगेहाद्बहिर्याते

अतिक्रम्यापांगंश्रवणपथपर्यंतगमनात्प्रयासेनेवाक्ष्णोस्तरलतरभा
वंगमितयोः दृशानांराधायाः प्रियतमहमालोकसमयेपपातस्वेदाबु
प्रसरइवहर्षाश्रुनिकरः।७८।भजंत्यास्तल्पांतंकृतकपटकंडूतिविहित
स्मितेयातेगेहाद्बहिरवहितालीपरिजने। प्रियास्यंपश्यंत्याःस्मरपरव
शाकूतसुभगंसलज्जालज्जापिव्यगमदतिदूरंमृगदृशः।।७९।। ।।

सखीचदूरमतिशयेनव्यगमत्तिदेदूरमगमत्। कीदृशेपरिजानकृतकपटेनकर्णादिकं
डूयनेनविहितांस्मितंहास्यंयेनतत्स्मिन्। कीदृश्याः प्रियास्यंकृष्णमुखंपश्यंत्याः। कीदृशं
स्मररसेनकामरसेनाकूतंक्रीडाविलासतेनसुभगंसुंदरं। अकूतंस्याद्भयेकामेक्रीडिते
ध्वनितार्थकइतिहलायुधः।७९। सर्गांतेकविराशिषमाशास्तेजयेति। मुरजितः श्री
कृष्णस्यभुजदंडोजयति। सर्वोत्कर्षेणवर्तते। कीदृशः प्रकीर्णाः सर्वत्रखचिताः अस्रग्वि
दवोरुधिरकणायत्र। कीदृशस्यभुजापीडस्यबाहुदंडस्य। क्रीडयाहतोकुवलयापीडमा
माकरीहस्तीयेनतस्य। कइवाजयश्रियाविजयलक्ष्म्याविन्यस्तैर्नानारचनयाक्षिप्तैर्म
दारकुसुमैः पारिजातपुष्पैर्महितइवपूजितइवापुनः कइवस्वयंस्वयमेवसिंदूरेणद्वि ।।९०।।

स्यहस्तिनोरणमुद्राऽनंदेन मुद्रितइव चिन्हितइव अथयास्वयं आत्मना सिंदूरेण वीरसोदये न द्वीपीन द्वाभ्यां श्रीराधाकृष्णाभ्यां श्रृंगाररसं पिबतीति द्विपः कामस्तेन योरणः सुरत संग्रामस्तत्र मुदानंदेन मुद्रितइव चित्रितइव प्रकीर्णत्वा कलंप्रोक्तं विस्तरपीतियाद्दवः। ॥७८॥ ॥इतिश्रीमत्कृष्णचंद्र० नवमालिसं० विअभिसारिकाचर्णने एकादशः सर्गः॥११॥

द्वादशे प्रार्थितां कांतां राधां संप्राप्य केशवः। सुप्तापल्लवशाय्यायामुवाचस्मितमंजु लं॥१॥ गतवतीति सरसं श्रृंगाररससहितं यथास्यात्तथा तत् हरिः प्रियां श्रीराधांद वाच वक्ष्यमाणमिति शेषः। कस्मिन्सति। सखीवृंदे लज्जयासमं अनुपमं गत वति अपयाते सति। कीदृशं। अमंदा अभिकायां

जयश्री विन्यस्तैर्महितइव मंदारकुसुमैः स्वयं सिंदुरेण द्विपरणमु
दा मुद्रित इव। भुजापीडक्रीडाहतकुवलयापीडकरिणः प्रकीर्णा
सृग्बिंदुर्जयति भुजदंडो मुरजितः॥७८॥ श्रीज० सानंदगोविंदे नाम एका
दशः सर्गः॥ गतव॰ति सखिवृंदे मंदत्रपाभरनिर्भरस्मरशरवशाकूतस्फीतस्मि
तस्नपिताधरां। सरसमनसदृष्ट्वा राधां मुहुर्नवपल्लवप्रसवशयने विक्षिप्ताक्षीमु

त्पालज्जातस्यायोभरोतिशायस्तयोवातेनयेस्मरशराः कथाबाणास्तद्वशायदाकू तसाभिप्रायोविलासावातेनस्फीतप्रवृद्धं यत्स्मितमीषद्धास्यतेन स्नपितो व्याप्तायधरो यस्यास्तां। पुनः की० मुहुर्वारंवारं नवपल्लवप्रसवशायने नूतनकिसलयपुष्पाशय्या यांनिहितनयनां। एतेन सुरतेच्छातस्याः सूचिता॥७९॥ ॥हरिः प्रियामाहेतियदुक्तं तद्गीतेनाह किसलयेति। गीतस्यास्यविभासरागः। स्वच्छंद समानित पुष्पचापः। पियार ससादुरसाभिन्नत्तः। पर्यंकमध्यस्यकृतोप्रवेशोविलासोचितपूर्वः किलहेमगौरः। तालक्कवयोः स्वरूपमुक्तमेव। हरेध्विकेऽधुनायो अनुसरभजो कीदृशं क्षणमनुगतं त्व

नारहरिः टीका ॥७७॥

दनुगहहक्षण मनुगामिनं अधीनं वा॥ अथवा॥ न चलक्षण मधुना॥क्षणमधुरेण मदेन
व संतेन वाऽनुगतं तवाधीना पुं०की० ना पुरुषस्तस्यायं नारः श्रृंगारः सः अयनमाश्रयो
यस्य तं॥ तस्य दमिस्य पुनडाहृप्यः फकु॥ तस्य पणादेनू॥ एतेन श्रृंगाराश्रयो नारायण
इति सिद्धं॥ अथवा॥ नारा आपः नाराः अश्रुजलानि वा अयनमाश्रयो यस्य तं त्वद्वियोगा
नलसंतप्तत्वाज्जलेव सामि॥ रोदनं करोमि॥ ति भावः॥ हे कामिनि॥ चरणनलिनस्य प्रवेनूं पल्ल
वतल्पे कुरु प्रवेन्नाय दूदं तव पदपल्लववैरि॥ यतो नूायनं तस्मा पराभवं न कोप्यात्तिरस्कारमनु
भवतु प्राप्नोति॥ कीदृनूं॥ सुवेन्नां सुंदरं पल्लवरचना दिनाऽलंकृतं मयि तव पविपक्षं पल्लवतल्पे
लच्चरणविन्यासर्पराजयं प्राप्नोत्वर्थः॥ अनेनान्यनायिका

किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशं॥ तवपदपल्लववैरि
पराभवमिदमनुभवतु॥१॥ क्षणमधुनानारायणमनुगतमनुसरराधि
को॥ कणकरकमलेन करोमि चरणमहमागमितासि विदूरं॥ क्षणमुपकुरु
शयनोपरि मामिव नूपुरमनुगतिशूरं॥२॥ वदनसुधानिधिगलितममृतमि
व रचय वचनमनुकूलं॥ विरहमिवापनयामि पयोधररोधकमुरसि दुकूलं॥३॥
श्रिरस्युपादारोपः कृतो भविष्यतीति भावः॥१॥ किंच॥

अमृतमिव जीवनप्रदं वचनमनुकूलं सानुरागं रचय कथय॥ कीदृनूं॥ वचनं वदनमेव सुधानि
धिश्चंद्रस्तस्माद्गलितं चिकुलं॥ आज्ञापयामि ति चेत्॥ तर्हि॥ उरसि स्थितं दुकूलं पट्टवस्त्रं विरहमि
व वियोगमिवापनयामि दूरीकरोमि॥ किमिति॥ पयोधररोधकं स्तनाच्छादकं॥ एतेन नान्यत्र चिर

किंचहे प्रियेवल्लभे मधुरसि मम वक्षसि कुचकलशं विनिधेह्याय्यापर्ययः तदर्पणं न मनसिज
स्य कामस्य तापसंतापमात्मनो मम च त्वया नाश्य। तत्स्पर्शमात्रेण कामकामपीडा निवृत्ति भविष्य
तीति भावः। कमिव प्रियस्य परिरंभे आलिंगने योरभसो रागस्य लवरो कठ्यते न चलितमि
चव्यास्यमिव। कीदृशं पुलकितं। संजातपुलकं। एतेन रसः पूर्यमाणः पुलकव्याजेन बहि
रुद्गतइति ध्वन्यते। पुंकी दुरवापमतिदुर्लभं त्वदनुग्रहेणैव सुलभमिति ध्वनिः। कुचक
लशपदं केलिसिंधुत्तरणायोक्तिभावः। कामज्वरे शीतलपूर्णकलशालिंगनं विधा
तव्यमेव। यथा कांश्यं कलशजलपूर्णभाजनं विरहिणीमदनज्वरशांतये विरचयेत्। नि
पुणस्तु सरवीजनो नलिनचंदनपंकयोजनमिति॥ ५॥ एवमप्यत्र सत्यां प्रति

प्रियपरिरंभणरभसवलितमिव पुलकितमतीवदुरवापं। मदुरसि कुचकल
शं विनिवेशय शोषय मनसिजतापं॥ ४॥ अधरसुधारसमुपनय भामिनि
जीवय मृतमिव दासं। त्वयि विनिहितमनसं विरहानलदग्धवपुषमविला
सं॥ ५॥ शशिमुखि मुखरय मणिरसनागुणमनुगुणकंठनिनादं मम
श्रुतियुगले पिकरुतविकले शमय चिरादवसादं॥ ६॥ ॥ ॥

र्थांतरवाह। हे भामिनि प्रशस्ता भामिनी यायेऽधरसुधारसं सुधारसं अधरामृतमुपनयसमर्प
य। अधरवक्त्रसंयोगं कुर्विस्यर्थः। किंचाधरामृतं दत्वा दोषं त्वच्चरणानुवर्तिनं मां मृतमिव
जीवय त्वदधरामृतपानेनैव मम जीवनं नान्यथेति भावः। किंच त्वयि विनिहितं मनसं
दग्धानेदत्तचित्तं। किंच विरहानलेन दग्धवपुषं दग्धशरीरं अतएवाविलासरहितं एतेन दहे
कजीवनमात्रं कथितं॥ ५॥ किंचहे शशिमुखि चंद्रवदने श्रुतियुगले कर्णयुगे मणिरसन
गुणं कांचीदाम सुस्वरयवाचालं कारय सुरतविपरीतं विधाय वाचालं कारयेत्यर्थः। कीदृ
शं अनुगुणः सदृशः कंठस्य निनादः कूजितं यत्र तं। किंचाश्रुतियुगले पिकरुते कौटिलशब्दे

हे प्रिये दूरस्नातं तवेदं नयनं मामवलोकितुं दृष्टुं मीलति मुद्रां प्राप्नोति। किमिव लज्जितमिव कृतागविहिताचरणादिति। कीदृशं मां। अतिविफलरूषा अतिशयिनिरर्थकक्रोधेन चिफलीकृतं प्रियावलोकनादिसुखं वंचितं। नयविशेषणं चा। विरमनिफलक्रोधात् प्रारंतोऽवेदं श्रमं क्रीडादेनं च विसृज त्यज। सरतमोहं मादृशो विसृज्जेति ध्वनिः। ७। श्री जयदेवभणितं कथितं तदिदं गीतं रसिकजनेषु एतत्संभावितांतःकरणेषु मनोरमं रतिजनकं रतिः संभोगः शृंगाररसभावासंचारिसात्विकाद्युयस्ते स्तेषां चाविनोदं कौतकं जनयतु उत्पादयतु। कीदृशमिदं। अनुपदं प्रातिपदं निगादितं मधुरिपुमोदः कृष्णहर्षो यत्र तत् अथवैवं संबंधः। श्री जयदेवभणितं प्रियः श्रीराधायाः दृशं नेय

मामतिविफलरूषा विफलीकृतमवलोकितुमधुनेदं मालति लज्जितामिवनयनं तद विरमधुरिपुमोदिस्पृजराति खेदं ॥७॥ श्री जयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदं जयतु रसिकजनेषु मनोरमरतिरसभावविनोदं ॥ प्रस्फुहः पुलकांकुरेण निबिडाश्लेषे निमेषेण च क्रीडाकूतविलोकितेऽधरसुधापाने कृथानर्मभिः। आनंदाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभूद्‌द्भूतः स तयोर्बभूव सुरता

देवः स चासौ श्रीकृष्णस्तेय भणितं श्रीराधायां प्राप्तिमामनुसरेत्संनुनयवाक्यं कथितं। कीदृशं। अनुपदं निगदितं मधुरिपोः स्वस्य मोदो हर्षो यत्र तादृशं। अन्यसमानां मुष्प्रितिः प्रमदोहबद्धसमरः। ७। तमनुवर्ण्य प्रियं प्रतिभाविसुरतारंभमाह। प्रस्फुहदिति। तयो राधाकृष्णयोः सुरतारंभः प्रियंभावुकः प्रियभवनशीलः परमसुखदाता। उद्भूतः प्रकटो बभूव। कस्य। यस्मिन्निबिडाश्लेषगाढालिंगनेकर्तव्ये सुरतारंभे पुलकांकुरेण राधाद्रुमम प्रस्फुहअलिगविघ्नीभूतं। किंच। यस्मिन्सुरतारंभे सुरतक्रीडायां यद् आकूतमभिप्राय पूर्वकमन्योन्यमवलोकितं तन्निमिषेण। पक्ष्मचलनेन त्रसहीभूतं। किंच नेतावरपरमपि तु सुरतारंभाधरसुधापाने विधेय कथानर्मभिः रहः कथाकौतुकैः प्रस्फुरभूता

दोर्भ्यामिति। सुरतमेव विचित्ररसारंभेन दर्शयति दोर्भ्यां सापराधवत्कालिंगनेन संयमितो यंत्रितः। किंच पयोधरभरेण स्तनभारेण पीडितः। किंच पाणिजेन नखेन विद्धः संताडितः। दंतैः क्षताधरपुटः व्रणिताधरः। श्रोणितटेन नितंबेनाहतः संमर्दितः। किंच कचे केशे धृत्वा हस्तेनानमितो नम्रीकृतः। पादयोर्दासवत्। किंच अधरमधुस्पंदेन अधरामृतद्रवेण संमोहितो विस्मृतान्यरसः कृतः। एवं विडंबितोपि कांतः श्रीकृष्णः कामप्यनिर्वचनीयां तृप्तिमवापतत्तो हेतोरहो आश्चर्ये कामस्य वामा चिरुद्धागतिः स्थितिः। अथवा वामयति वामा पराभवकारिणी वामा मनोज्ञा वा। एतेन विपरीतसुरतं स्पष्टमेवोक्तं। वामो विरुद्धो शीले स्यात् क्रूरे रमे विकथ्यनदृति कालायुधः। नायकप्रार्थितो दंडः प्रसादत्वेन विनयुक्त इति ध्वनिः।

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजैराविद्धो दशनैः क्षताधरपुटः
श्रोणितटेनाहतः। हस्तेनानमितः कचे धरमधुस्पंदेन संमोहितः कांतः कामपि
तृप्तिमाप तदेहो कामस्य वामा गतिः। ८७। मारं केरतिकेलिसंकुलरणारं-
भेन यासाहासप्रायं कांतजयाय किंचिदुपरि प्रारंभि यत्संभ्रमान्। निस्पं-
दाजघनस्थली शिथिलिता दोर्वल्लिरुत्कंपितं वक्षो मीलितमक्षि पौरुषरसः

नामेव तृप्तिं चित्रानुष्टि सारां केति। अनया श्री राधया साहसप्रायं साहसबहुलं कांतजयाय श्रीकृष्णजयं कर्तुं तदुपरि कांतोपरि किंचिदुत्कोंतरं सुरतमिति शेषः। रतिकेलिसंकुरेणारंभोरतिकेलिभिः संश्लेषचुंबनादिभिः संकुलव्याप्तरणारंभे संग्रामोपक्रमे। यत्तू यदा प्रारंभि। तदा साहसात्संभ्रमात् जघनस्थली निस्पंदा निश्चला अभूदिति शेषः। कीदृशः कामस्यांकः। छिद्रं न खलु न दियत्र। किंच दोर्वल्लिर्बाहुलता शिथिलिता श्लथीभूता। वक्षो हृदयं उत्कंपितं। अक्षि चक्षुर्निमीलितं मुद्रितं। आलिंगनायकेनापि रसविशेषेण सर्वं जातमिति भावः। एवं कृतोपि स्त्रीणां पौरुषरसः पुरुषाभिलाषः कुतः कथं सिध्यति। अपि तु न सिध्येदेवेत्यर्थः। संकीर्णे संकुले व्याप्तइति यादवः। ८८। एवं पुरुषायितेन स्वजयमलभमाना स्वस्वभावमवलं

तस्यति। एभिः पूर्वोक्तैः कामशरैः पञ्चभिर्मनः कीलितं च शीकृतं दैवेनेदं तं द्भुतमाश्चर्यमभूत्। मनसापि
यमन्यवधूमागच्छेदिति भावः। कीदृशैः प्रातर्निखातैः प्रातःकाले दृशोर्नेत्रयोर्निखातै रा
रोपितैः कोतैरात् रास्ता नाह। तस्या राधायाः उरः पाटलपाणिजैः रक्तनखैरंकितं चिन्हितं॥
तस्या दृशौ नेत्रे निद्राकषायेति लोहिते। तस्या अधरश्रोणिमा अधररागः निर्धौतः पीतः चुंबना
दिना। किंच तस्या मूर्धजाः केशाः विलुलिताः स्रस्ताः शिथिलिताः स्रजो मालाः येभ्यस्ते। त
स्याः दरदूषत्स्खलच्छिथिलं अंचलं च स्रस्तादृशी कांचीदाम मेखलागुणः। नीवी मोचनोत्त
निकाम पंचशरत्वेम निरूपिता। निबंधनं त्वत्र निखातैर्बाणैरन्यत्कीलितमिदमाश्चर्यमिति सूर्यैः
॥१९॥ तदेवाह। व्याकोशश्इति। इयं श्रीराधा तदपि मां धिनोत्ति प्रीणयति। यद्यपि
तस्याः पाटलपाणिजांकितमुरो निद्राकषायदृशौ निर्धौतोधरशोणिमा विलुलि
त स्रस्तस्रजो मूर्धजाः। कांचीदाम दरश्लथांचलमिति प्रातर्निखातैर्दृशोरेभिः का
मशरैस्तदद्भुतमभूत्तत्कर्मनः कीलितं॥ १९॥ व्याकोशः केशपाशस्तरलितमलकैः
स्वेदलोलो कपोलो दष्टा बिंबाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः। कांचि
कांचिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः पश्यंती सत्रपं मां तदपि विलुलि

केशपाशः केशकलापो व्याकोशो विलुलितो जातः अलकैश्चूर्णकुंतलैस्तरलितं इतस्ततः प्रसरतं।
कपालो स्वेदलोलो स्वेदनासाचिकभावजलेन चंचलो। बिंबाधरः श्रीः दष्टा खंडिता। कुचकलशरुचा
का स्याहारयष्टिः हारकलापः। हारिता निर्जिता। कांचीमेखला कांचिदाशां दिशां गता चलिता। तथा
विधा जाता। अपि किं कुर्वती हस्तेन स्तनजघनपदं स्तननितंबभागमाच्छाद्य सद्यः शीघ्रं सत्रपं स
लज्जं मां पश्यंती। कीदृशी विलुलितां म्लानां स्रजं धारयंती। मज्जयाय कृतप्रयत्नास्वयमे
व प्राप्तपराभवेति भावः। २०॥ एवं पुरुषायितसुरतविलासकौतुकपानसौभाग्यमाहामील
दृष्टीति। धन्यः श्रीकृष्णः कुरंगीदृशाः मृगनयनायाः श्रीराधाया आननं मुखं धयति पिबति धि
न्याहमिति सादरं राधाधरामृतं पिबतीति भावः। कीदृशः हर्षस्य सुरतानंदस्योत्कर्षेणाधिक्येन विमुक्ता

सालसानिःसहाश्रांताव्यापाराक्षामातनुर्देहोयस्याः कीदृशा। त्रयामायाः श्रीराधायाःयोत्तुंगो
स्तनो तथोरूपरिष्वंगी चालिंगनस्वभावः। एतेन सुरतविरामेपि सुरतातृप्तिः कथिता। की
दृशामानना। केन चित्सुरतानंदसुखविशेषेण सुरतश्रमेण वा मीलदृष्टिमुद्रिताक्षी। की
दृशी। मिलतोः स्फुरद्रोमांचयोः कपोलयोः पुलका नियत्र तत्तापुं। कीं। सीत्काराणां धारास्ता
सां चन्नादध्वनादव्यक्ता अप्रकटा आकुलाश्चयो केलयस्तासु याकाकुः क्रीडाध्वनिविशेष
स्तेन विकसतः प्रकटीभवंतोयदंतास्तेषां अन्नावः। किरणास्तेधौतिः प्रक्षालितोऽधरोय
त्रतादृशी। काकुस्तियो विकारोयः शोकभियादिभिध्वनेरित्यमरः। ८॥ अथेति मंगलं
थानंतरं वा। राधा सुरतश्रमापहृतमंडना।

मीलदृष्टिमिलत्कपोलपुलकं सीत्कारधारावशादव्यक्ताकुलकेलिकाकुविकु
सद्दंतांशुधौताधरं। श्वासोत्तुंगपयोधरावुरुपरिष्वंगीकुरंगीदृशोहर्षोत्कि
र्षविमुक्तनिःसहतनोधन्योधयस्यानने॥ ८॥ अथ कांतं रतिश्रांतमपि म
डनवांछया जगाद माधवमुग्धा राधा स्वाधीनभर्तृका॥ ९॥ अथ सहसा
सुप्रीतं सुरतांते सा नितांतखिन्नांगी। राधा जगाद सादरमिदमानंदेन गोवि
दं॥ १०॥ कुरु यदुनंदन चंदनशिशिरतरेण करेण पयोधरे मृगमदपत्रकमत्र
मनोभवमंगलकलशसहोदरे॥ १॥ निजगाद सा यदुनंदने। क्रीडति हृदयानंदमे॥ १॥
पुनरपि मंडनवांछया माधवं श्रीकृष्णं जगाद उक्तवती। कीदृशी। स्वाधीनभर्तृका पुनः कीं। मुग्धा
सुरतसंग्रामचतुरा सुंदरी वा। कीदृशी। कामं तेनोहरतिश्रांतकृतसुरतश्रमं॥ ९॥ सा राधा
रूदवक्ष्यमाणसुरतांते आमेदं सादरं गोविंदं जगादोक्तवती। कीं। सहसा रूपतायेत्राप्त
असवः प्राणा यस्मात्सुतरां प्रीतियुक्तं। कीं। नितांतखिन्नांगी स्मरजर्जरितांगी। एतेनांग
मेव खिन्नं मनस्तु मनः पुनः पुनः सुरतामिलाषसूचितः। १०॥ रागताल क्रमो लक्ष्मी
पूर्वमुक्तमेव। अत्र स्वाधीनभर्तृकेयं नायिका पूर्वं जगादेति यदुक्तं तद्गीतेनाह। कुर्विति। सा रा
धा यदुनंदनं जगाद उक्तवती। कीदृशी। क्रीडति रमेमाणा। हृदयानंदने चिताल्हादजनके। चिमुक

187

दुनंदनः। यादवानां हितार्थायिघ्नतो गोवर्धनो मयेति। अत्रास्मिन्पयोधरे कुचे करेण मृगमदपत्रकं कस्तूरिकापत्ररचनां कुरु रचय। करेणेति पुनः करस्पर्शाभिलाषः सूचितः। कीदृशेन करेण चंदनादपि अति शीतले न कीदृशे पयोधरे मनोभवस्य कामस्य मंगलाय कलशः पूर्णकुंभस्तस्य सहोदरे तुल्ये ॥१॥ किंच हे प्रिय बहुभलोचने नेत्रे त्वदधरचुंबने न लंबितं विगलितं कज्जलमुज्वलय पुनरर्पय। कीदृशे रतिनायकस्य कामस्य सायकान्मोचयतीति मोचने। कामबाणप्रसारिणी। यु मुदि त्वय जगद्विजयाय कामोपि बाणं न मुंचति नादृशोपि। लंबितं गलिते प्रांते लंबमानदृशेरौ योरिति तरलकोनंशः ॥२॥ हे शुभवेष रुचिर मूर्त्ती मम श्रुति मंडले कर्णप्रदेशे कुंडले निवेश्य यार्पय। कीदृशे। नयनकुरंगस्य तरंगाचिनोका

अलिकुलगंजनसंजनकं रतिनायकसायकमोचने। त्वदधरचुंबनलंबित
कज्जलमुज्वलय प्रियलोचने ॥३॥ नयनकुरंगतरंगविलासनिरासकरे
श्रुतिमंडले। मनसिजपाशविलासधरे शुभवेश निवेशय कुंडले ॥४॥ भ्रमरच
यं रचयंतमुपरि रुचिरं सुचिरं तमसंमुखे। जितकमले विमले परिकर्मय नर्मजनकम

शस्य त्रकारुास्य निरासकरे निरोधके एतेन कर्णांत विश्रांतलोचनत्वमुक्तं। पुं० कीदृशे कामजालस्य क्रीडानुकारके। वेषालंकरणे केलिभवमेदृत भाव कद्गति वैजयंती ॥५॥ किंच हे प्रिये। मम मुखे अलकं चूर्णकुंतलं परिकर्मय मंडय चुंबनादिना। अलकं कीदृशं। उपरि मुखोपरि सुचिरं निरंतरं भ्रमरसमूहं भ्रमरश्रेणी शोभां जनयंतं सजातीयं बुध्वा भ्रमरसमेस्तत्र पतंतीति भावः। पुं० की० रुचिरं मनोहरं नर्मजनकं परिहासक्रीडाकारकं नर्मजनः परिहा ससखीनस्यकं सुखरूपं वा। कीदृशे। विमले निर्मले। अनेन कलंकाभावः सूचितः। कीदृशे संमुखे सुंदरे नु ग्रहाभिमुखे वा। पुं० कीं० जितं कमलं येन रतस्मिन्। हे जितकमल जितमाम्मानयनकौ साकमलं येन तसंबोधनं वा। तदा द्विमले। इकामस्तेन विमले श्रास्य

हेकमलानन कृष्ण अलिकररजनीकरे ललाटचंद्रे तिलकं कुरु त्वया। की० कस्तुरिरसेन निर्मि
तं। अत एव ललितं मनोहरं। की० विहिता कृता कलंककेलीचंद्रे कलंकशोभा सा दत्र्यं येन त
त्। की० विश्रमितो विश्रामं प्रापितो श्रमसीकरांबुकणो यत्र तादृशे। ललाट मलिकं मो
रिसमरः। मृगनाभिर्मृगमदः कस्तूरी गंधश्रेष्ठकेति हारावली। वलितं निर्मितं युक्तमिति या
दवः। स्वीकरांबुकणा स्मृताः इत्यमरः। रोहिणीशो निशानाथो रजनीश्वर इति हलायुधः। ५।
किंचा हे मानद। मानखंड न मान प्रदायके तिवा। मम रुचिरे सुंदरे केशपाशे कुसुमानि कु
रु त्वया। मानसज्ञस्य कामस्य ध्वजचामर तुल्यो की दृशे। इति गलिते सुरतसमये बंधुमले।
शृंगारचेष्टया सुंदरे वा। की० शिखंडिनो मयूरस्य शि

मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे। विहितकलंककलं
कमलानन विश्रमितश्रमसीकरे॥४॥ मम रुचिरे चिकुरे कुरु मानद मानसज
चामरे। रतिगलिते ललिते कुसुमानि शिखंडिशिखंडकडामरे॥५॥ सरसघ
नेजघने मम शंबरदारणवारणकंदरे। मणिरसनावसनाभरणानि शुभा
शयवासय सुंदरे॥७॥ श्रीजयदेववचसि जयदेवहृदयं सदयं कुरु मंडनो हरिचरण
स्मरणामृतनिर्मितकलिकलुषज्वरखंडने॥८॥ ॥ ॥ ॥

खंडकाश्चंद्रकास्त एव डामरो अटोपो आडंबरो वा चा कचित्स्यानिवायस्य यादृशो डामरो वा घभे
दस्या दाटोपे। शिखिनाम पीति भोजे॥६॥ हे सुभाशय शुभातःकरण। मम सुंदरे जघने नितं
बे। मणिरसना मणिखचित क्षुद्रघंटिका। वसनाभरणानि वाससह परिधाने कारय। की० द
शे सरसे शृंगारादिरससहिते घने निबिडे च। कर्मधारयः। पु० की० शंबरदारणः कामः स ए
व वारणः कुंजरस्तस्य कंदरे निवासे। कुंजरो वारणः करी इत्यमरः। ७। हे रसिक जन्य श्रीजयदे
ववचसि वचने दयासहितं हृदयं कुरु। की० जयदे विश्वजयप्रदे। की० मंडने विश्वालंकारभूते।
पु० की० हरिचरणस्मरणामृतेन कृतं कलिकलुषज्वरस्य खंडनं नाशो यन तादृशे। यद्वा जयदे
वेति पाठे जयतीति जयः दिव्यतीति देवः। हे जयदेव कृष्ण। श्रीजयदेववचसि त्वं हृदयं कुरु तद्वचांसि

मंडने शृंगा:। की०। मंडनं श्रीगाळंकारसमर्पितमस्मिन्नंगा

189

गीतोत्तमे च श्लोकेनाहास्य ये ति हे कृष्ण मम कुचयोः पत्रं पत्ररचनां मकरिकारूपां यत् किं च।
कपोलयोश्चित्रं चित्ररचना विशेषं कुरु किं च जघने नितंबे कांचीं क्षुद्रघंटिकां घटय।
पंथ्याया किं च कबरीभरं केशसमूहं स्रजा पुष्पमालया अञ्च संयोजय किं च वलयश्रेणीं कं
कणसमूहं पाणौ कलय कुरु किं च पदे चरणयोर् नूपुरौ कुरु इति एवमुक्तो राधया पीतः
संतुष्टः पीतांबरः कृष्णो पि तथैव अकरोत्। एतेन स्वाधीनभर्तृकत्वमुक्तं ॥८४॥ यद्गांधर्व इति।
यद्गांधर्वकलासु गानविद्यासु कौशलं नैपुण्यं प्राविण्यं गांधर्व मार्गादि त्रिविधं कला
नृत्यांगभेदविलासाः यद्वैष्णवं विष्णोर् अनुध्यानं अनुक्षणं चिंतनं च यच्च शृंगारस्य शृंगा
ररसस्य विवेकसंयोगादि विधानकौशलं तस्य यथार्थज्ञानं किं च यत्काव्येषु कविरचना

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयोर्घटय जघने कांचीमंच स्रजा क
बरीभरं। कलय वलयश्रेणीं पाणौ पदे कुरु नूपुराविति निगदितः प्रीतः
पीतांबरोपि तथाकरोत् ॥८४॥ यद्गांधर्वकलासु कौशलमनुध्यानं च यद्वै
ष्णवं यच्छृंगारविवेकतत्त्वमपि यत्काव्येषु लीलायितं। तत्सर्वं जयदेवपंडि
तकवेः कृष्णैकतानात्मनः सानंदाः परिशोधयंतु सुधियः श्रीगीतगोविंदतः ॥८५॥

विलाससर्वस्वं तत्सर्वमन्यदपि च सुधियः जयदेवपंडितकवेः प्रसादस द्विवेचिका बुधिः
कविर्देवता प्रसादलब्धकवित्वं तस्य श्रीगीतगोविंदतः श्रीगीतगोविंदग्रंथात् परिशोधयंतु
विवेकेन विचारयंतु ज्ञानं त्वित्यर्थः। कीदृशाः सुधियः सानंदाः आनंदसहिताः। कीदृशस्य कवेः
कृष्णैकतानात्मनः। कृष्णे हरौ एकतानं तदाकारमात्मा मनो यस्य तस्य अथवा कृष्णस्यैकतानो
मुख्य आत्मा मनो यस्या श्री राधाया इत्यनेन श्रीराधा कृष्णोपासकत्वमुक्तं एकतानोनन्यवृत्तिरे
काग्रैकमनाव पीत्यमरः ॥८५॥ सर्गांते कविराशिषमाशास्ते पर्यंकीकृतेति हरिर्वो युष्मानातर
क्षतु। कीदृशः कायव्यूहं बहुशरीरमिवाचरन उपचितं समृद्धमाकूतं कामभरो यस्य सः पुं० की०
अक्ष्णां त्रासे सहस्रे पादांभोरुहं कृष्णचरणकमलं धारयति धारिणियाचारिधिसुता लक्ष्मी स्तां दिदृक्षुर्द्रष्टुमि

पुः। लक्ष्मीदर्शनं तु नेत्रयुग्मेन न संभवतीति कायव्यूहं नेत्रसहस्रं च कृत्वा द्रष्टुं चेति भावः। किं कुर्वन्।
पर्यंकीकृतः नागनायकः। त्रीपस्तस्य फणाश्रेणी नां पंक्तीनां ये मणयस्तेषां गा
णे समूहे संक्रांतप्रतिबिंबसंवलनया। संबंधप्रतिबिंबप्रसरणेन वपुः प्रक्रियां बिभ्रद्दधत्।
मणीनामनंतदेहलाभेन तादृक्नेत्रलाभो भूदिस्यर्थः। पक्षे। वारिधितुल्यगुणाधितोषमलभ
मानः। कायव्यूहमिवाचरन्निति तुल्यं। अस्मिन्पक्षे नागशब्देन नागरं। तं प्रतिनीयार्थं निहि
ताये मणिगणा रूत्याद्याख्यं यत् श्रेणीतु कथितापंक्तौ श्री तुल्यार्थसंहितावपीतियादवः।
संक्रांतः प्रतिबिंबे स्यात्प्रवेनो संक्रमे पि चेसपि। १० पुनः कविर्ग्रंथसमासो वा त्रीषमान्नास्ते।

पर्यंकीकृतनागनायकफणाश्रेणीमणीनांगणे संक्रांतप्रतिबिंबसंवलन
या बिभ्रद्वपुः पक्रियां पादांभोरुह धारि वारिधिसुतामक्ष्णां दिदृक्षुः न
नैकामव्यूहमिवाचरन्नुपचित्ताकूतो हरिःपातु वः। १०। तामप्राप्य मयि
स्वयंवरपरां क्षीरोदतीरोदरे त्रीं के सुंदरि कालकूटमपिबन्मूढो मृडानीपतिः।
इत्थं पूर्वकथाभिरन्यमनसा विक्षिप्य वक्षोंचलं राधायास्तनकोरकोपरिमिल

न्नामिति। हरिर्वः पातु। हे सुंदरि। मृडानीपतिः। रुद्रः क्षीरोदतीरोदरे क्षीरसमुद्रतटे त्वा प्राप्य
कालकूटं विषमपि बदिति त्रीं के। इत्थमनेन पूर्वकथाभिरन्यमनसा अन्यमनस्केया वक्षो
चलं स्तनावनकवस्त्रं विक्षिप्याप सार्य राधायाः स्तनौ कोरकौ जातां कुरौ तदुपरिमिलन्नेत्रः।
कीदृत्रीं। तां मयि स्वयंवरपरां। अनेन किशोरलालमसंध्वनितं। ११। रुद्रानीकविरात्मनः
काव्यस्य माधुर्यादिगुणत्वं कथयति। साध्वीति हे माध्वीकमधो मद्यमास्तवयं मधुराहमि
ति चिंता साध्वीनभवति। एतत्सदृत्रीं पस्यामीति चिंनैव न कार्या। किंच हे त्रीं करित्वं च कर्कत्र
सिकार्कत्रेप न रजो रूपासीत्यर्थः। किं च हत्रांक्षेत्वां कद्रक्ष्यं तिआस्वादयिष्यति अवलोकयि
ष्यतीति वा। किं चाहे अमृता त्वयापि माधुर्यमादिकादिगुणातित्रायेन गर्वेनिधार्यतदपेक्षया।

191

२ सारस्य गारस्य च तु भगमव जयदवस्य वेदाध्यायाध्यायः।

त्वं नृतमसि हक्षीर तेन वरसः नीरं जलयद मधु रां हे माकंद पकाम्र फलक्रंद विलपाकि चाहे कांता धरत्वं पाताले गच्छ जयदेवस्य विषकसामस्येन च चांसिया च नू शृंगारभा वं श्रीराधाकृष्णविषयं यच्छंति तावच्छुष्मा भिनस्थेयं। कीदृशानि। सारस्वतानि सरस्व तीर सप्लुतानि जयदेवभणितानि तेन सर्वपदार्थानि सकतारूनि भावः। १२।१९। स्वटी कायां सर्वसंमतिये गय ताभाह। श्लोकपंचकेन। साधूनां स्वत एव संमतिरिह स्यादेव भक्त्य र्थिनाम आलोच्य ग्रथनश्रमं च विदुषामस्मिन्नवदादरः। ये केचिन्मत्सरकलुषाः प्रभृति परास्ता नर्थये मल्लत्तिं भूयो विलक्ष्य च दल च प मि हृचे सावासनास्थास्यति॥१॥

साध्वी माध्वी कचिंता न भवती भवतः न्वाकरि कर्करासि द्राक्षे द्रक्ष्यंति केत्वा मम तमृतमसि क्षीर नीरं रस स्तोभाकंद कंद कांताधर धर पृणि न लेशं यच्छंति यावैः शृंगारभावं सारस्वतानि श्रीजयदेवस्य चक्कस्व सि। १२। श्रीभो जदेवप्रभवस्य रामादेवीसुतं श्रीजयदेवकस्य। पराशरादि प्रियवर्गकंठे श्रीगीतगोविंदकवित्वमस्तु॥१९॥ ॥ इति श्रीगीतगोविंद जयदेवकृतौ

इह वनमालिसंजीविन्यां श्रीगीतगोविंदटीकायां भक्त्यर्थिनां साधूनां भक्तानां स्वंमतिः स्वीकारः स्योदेवा विदुषामपि नानाशृंगाररसग्रथनश्रमं विचार्यस्यामादरो भवेदेवाये च भक्तिपांडित्यहीना विरलाः परग्रंथनिंदापरास्तानर्थये याचकितन्मत्कृतिं भूयो वारं वा रं वीक्ष्य इह टीकाया भावं वदंतु टीकाश्रमे षज्ञातेषु परनिंदायां वासना स्थास्यति चेत्॥ भक्तमार्गधुरिशीलनेन कुत्तः सादुर्वासनेति भावः॥१॥ टीकासप्तक मालाक्य सारं सारं समु ध्दृता तथापि सवालिशं किंचिक्षंतुमर्हति सुरयः॥१॥ श्रीवदासतनूजेन भट्टेन वनमालिना गीतगोविंदटीकेयं रचिता शुभदा सतां॥२॥ चेत्रा रवकृष्णपक्षस्यैकादश्यां शुभमंगले। वारा णस्यां कृता टीका भट्टेन वनमालिना॥३॥ कास्यान रोतमु यहे मध्यमाधवत्रार्थयोः।

॥ श्री ॥

टंवरे सदा तं रुषभानुजा रंतां पण्भरू तिश्रीमत्कृष्णचंद्रसेवकोदीच्यावतंसश्रीनिवासपंडि
तात्मजश्रीवनमालिभट्टविरचितायां वनमालिसंज्ञी विन्यां श्रीगीतगोविंदटीकायां सुप्रीततपे
तां बरोनाम द्वादशोंदेसर्गः॥१२॥   ॥श्रीराधायाः प्रथमा स्वपयांकृष्णस्य शृंगारपरत्वे वर्णितत
त्यथा। हे केशव सुरतश्रायिनूत्रनूनस्ते चिकुरेति वा हे धृतमीनश्रारीर धृतमीनस्य शरीरं मी
वशरीरं येनध्धृतमीन बद्ध इत्यर्थः॥ तच्चेविपरीतरतो भवति॥ तत्स्वरूपं प्रसावहित्वचरणौ
पुमान्यत्रांगनायते। नायकामुपरि स्थाप्य मीनबंधः प्रकीर्तितः॥ किंच मीनो हि रसवेदी मक
रकेतनः सोयं प्रेमनिर्वाहकश्च। मंगलार्थकश्च। तद्वदत्रापि धृतमीनबंध एव मंगलो। हे देव
क्रीडाकर्त्तः। हे हरे भक्तजनसंतापहारिन् सर्वमंगलहरिन्वा युवतीकामतापनाशनेति वा
जयजयेति वीप्सायामतिशयेन सर्वोत्कर्षेण वर्तस्व। जय जगदीशेति वा पाठः॥ गछतीति ना
नमृंगारसमापाद्यते तज्जगद्युवतिवृंदं तस्येश नायकचूडामणे। प्रथमं मीनबंधकेलिमाह।
प्रलयेति। प्रकर्षेण मनसो लयस्तदाकारता यत्र सुरते सप्रलयः। यथा। सुरते च समाधौ च म
नो यत्र न लीयते। किं तेन सुरते नार्थः किं तेन च समाधीनेति। तत्रानंदस्य मज्जनित पयोधौय
ज्जलं तस्मिन्। वेदं वा स्थापयन् शास्त्रप्रतिपाद्य मीनबंधादिकुशलं संभावयते। ज्ञायते रति को
शोक्त केशस्य शादि लीला वा अखेदं यथा स्यात्तथा धृतवान् सिंत्वयोषितवानसीत्यर्थः॥ कीदृशं
वेदं विहितं स्रुतं वहित्रस्य पोतस्य चरित्रं केलिजलधिपारप्रापकरूपं येन। एतेन नो मिकचूडाम
णित्वं सूचितं॥१॥ हे धृत कछपबंध। तल्लक्षणं। हस्तौ पादौ च संकोच्य कांतमुपरि वल्लभः स्थाप
येत्सुरते यत्र कछपः स प्रकीर्तितः॥ तव पृष्ठे पृष्ठे विश्लोगे क्षितिरदावनभूमिस्तिष्ठति वर्तते इ
त्यन्वयः॥ कीदृशे पृष्ठे। अतिविपुलतरे अतिशयेन विपुलयति विशेषेण महत्वं रसस्य प्राप्नो
ति तथा पुलमहवे धातुः। अनेन नायकस्य श्रांतोद्वहनत्वं सूचितं। कीं० धरणि धरणकिण
चक्रगरिष्ठे। पूर्वोक्तबंधधारणेन किणं कुंकुमादिचिन्हं यत्र चैतत्के का कृतिकंकणं तन्नगरि
ष्टे प्राप्तगौरवे। अनर्घ इत्यर्थः। अन्यद्भिरलेअचिन्हे अप्रणेमेचानर्घ्यमिदं पन स्वछरीरं रत्न
प्रियानखचिन्हितमप्यमूल्यमितिश्रीराधोक्तिरत्र सर्वत्र ज्ञेया। तथ्यं यथा सर्वस्यापि रत्नस्य
व्रणेर्द्धः परिहीयते। दयिताधररत्नं तु व्रणितं यात्यनर्घतामिति फलपर्यंतं कार्यनिर्वाहे

कतया स्थिरजालक्षणो नायकगुणउक्तः। क्षितिः सह सत्रीलेद्दिरतीर्णी च धरास्वपीति म
होदधिः। पृष्ठपृष्टप्रदन्नो स्यात् स्वयद्द्विविलान्नायेति मेदिनीकारः। आहे घृत सूकररूप॥
सूकरोति तनूकरोति कुंदद्दप्तीति सूकरः। अत्र तु मानकदर वचनेन तथात्वं तस्योच्यते। उ
कंचा कामिमानवसनांतरवारीमूल मुखवनति मानलतायारतिात वदन्ना नन्निखरे
धरणीलग्नातिष्ठती सन्वयः। चत्तेर संश्रय सीवा धरणीत छीलासातवदन्नानन्निख
रे दंताग्रे दन्नानक्षत विधानेवसति। कस्मिन्केवा न्नान्निनिपरमानंदजनके चंद्रे निमग्ना
कलंककले खेव। सा यथा। विघमानापित्रो क्षातिरस्कारिणीति। एतेन नायकस्य गुणप्र
कर्षदिन्नातिः। आक्रीडायां प्रवर्तमानस्याग्र पश्चान्नागोनर क्षितत्तद वसरजन्यत्वात्॥
नखक्षेत निर्दयत्वकथनार यति समये नृसिंहरूपदूसकौंतवकरकमलवरे तवहस्त
कमलवरे तवहस्तकमलवरे श्रेष्ठेन खमस्ति। कीदृक्। अद्भुमाश्चर्यजनको ग्रत्र्क्षागो
यस्य तत तथा। रक्तत्वकथनेन कंजसाम्यं। पुनः कीदृक्। दलितो विदारितो हिरण्य
कन्निपोः स्वर्णन्नाय्यायां तनुरवखे भृंगोयत्र तत्। अन्यत्र भ्रमरेण कमलं विदार्यते
अत्र तु स एव दलित इत्यनेन शृंगाररसपूर्तिरुक्तेति भवः। केशवेत्यादि पूर्ववत्॥४॥
हे घृत वामनरूप नामयति नाम यति आलिंगनादिभिर्मोचादिनावायः स वामनः
तेसंबोधनं। तेन मा तेनत्वं विक्रमे सुरतप राक्रमे रस्थर्थः। वलिंत्रिवलिं छलयसि वंचयासि
विपरीतविधानेनज्ञासो त्रमसी तिसूचितं। हे अद्भुत वामन आश्चर्य नामन पदनखत्तिसंबो
धनं। विपरीतसुरते तेन तत्र यं पदनखं पेदनखक्षत तह्यालनायय त्रीरते नजनितं जनस्य
नंदनस्यवंदनस्य पावन चित्तप्रसादो येन तत सबुद्धि चिनप्रसारकारिनूः। यतेन नायको
त्कर्षः। पावनत्वं च नायकस्योक्त तनुनखदानकेरनखेनेव जन्यते न पदनखेनेति। स समे
वस्तु विपरीतरतौ नायका पदनखक्षता सिप्रायेण मातव्याख्या। विभूतिरसमितिभृगवः। रसि
कानां रसिकानां पतिः प्रभुः। प्रभास्ताम्रगुपतिरूपः प्रत्रांसाथरूपः। रसिकचूडामणे जयजग
न्नाथादीन्नादिपदं पूर्ववत्। क्षत्रियरुधिरसद्द्रपयासि जगत सलपयः। सिकालिंदीजलक्रीडा ॥४६॥

यां कुंकुमकश्मिरितायां गच्छतीति जगं नाशि ... नंकारयसी संन्यया:॥ कीं०
युवतीवृंदे अपगतपापे स्नानमात्रेण नश्यसे सारलुप ... पु०॥ कीं०॥ ... मितसचतापारामितः स्री
तिः प्रापितः सचस्य कामस्याचिरहोतापो यनमनोत्र कामनाचके सीमो सीमसनद्वतिपाता
हे धृतनरपुपतिरूप जयारचचएकपत्नीपत्तय ... पतिः श्रेष्ठतसंबद्धिः॥ एतेन बहुयुव
तिष्वासक्तिर्निवारिता॥ दिक्षुरतिविहारदिक्पाल ... णे स्मरसंग्रामे दशमुखादस्यैप्रकारेण्मौ
मौलिः केशपाशास्तेन बलिं पूजां चितरासि विस्तारयसि यद्वा दश मूखायुकामायमौलि
ना किरीटरत्नेन बलिपूजां वितरसि ददासी के चितु॥ कीदृशं दिक्पतिकमणीयं दिक्षाप
तयदृष्टायस्तेषां कमनीयं मनोहरं तदाप्सि ष्टं वा तदगोचरमितिवा॥ पु०॥ कीं०॥ रतिजनकं रो
षपूर्वकं त्॥ ७॥ हे हलधररूप हलेविलखनैधातुः हलनं हलविलेखलनवक्षताधररूपं
रत्नोघतेरूत्ति हलधरसुरतेकेलिप्रश्नास्तो हलधररूपस्तत्संबुद्धिः॥ ध्रुतना ना ग्नखाधर
क्षते प्रदरूपत्वे॥ विशदे निर्मले वपुषि शरीरे वसनं वस्त्रं वहसि॥ स्वात सुंदरस्य वसनध
रणं भारमतो धारयसीरूकं॥ कीं०॥ जलदाभे जलदानां नीलमेघवृंदानामाभा शोभा य
स्मात तत्॥ जलपदस्याभिप्रायो॥ जलदो यथा स्वजीवनं दत्वा विश्वजीवनं करोति तथात्व
मपि वेदोक्तं हित्वा विहारकुरु॥ न हि वेदोक्तमर्यादापालनेन सर्वे पि रिरंसः साधयितुं शक्यं
क्यः॥ पु०॥ कीं०॥ हलहतभीतिमिलितयमुनाभं हलेन यदुनंदनं तद्भीत्यात द्रायेन मिलि
ता या यमुना तस्या आभेवाभा दीप्तिर्यस्य तत्॥ हलहतीपाहे स एवार्थः॥ हरधरपदेन
धीरललितलक्षणो नायकगुणउक्तः॥ ८॥ हे बद्धशरीर बुद्धजातं श्रीवृषभानुजास्वरू
पायत्तं स्वरूपं येन तादृशं जयेति पूर्ववत्॥ हे सदयहृदय त्वं यज्ञविधिः मकरध्वजय
ज्ञविधिः अहह इति खेदे श्रुतिजातं तत्प्रतिपादकमर्यादामार्गं निंदसि मर्यादाभूतं मा
र्गं न मन्यसे न वेदस्त्रियामकर्द्रसर्थः॥ उक्तंच रतिचक्रे प्रवृत्तस्य नैव शास्त्रं न च क्र
मः इति भोजे॥ कीं०॥ दर्शितपशुघातायेना॥ हे धृतकल्किशरीर धृतं सापराधशरीर
ये नताद्दृशा म्लेच्छमिवहनिधने कलपालं कलयसि म्लेच्छ अव्यक्ते शब्दे म्लेच्छस्य अ
व्यक्तकूजननिचहः समूहस्तस्य निधने विनाशे खड्गखड्गवदतिकरालं तीक्ष्णं स्वेने कलय

सीद्दासि॥ ॥ हेरसिक॥ श्रीजयदेवकवे [illegible] गीतं स्वतः प्रणास्फुटीभूतं स्मणुकीरुदा
रं मतिर मणीयं॥ श्रीराधाकृष्णकेलिनिरूपणसात्त्। पु॰ की॰ ॥सुखदं दस्सकेलानंदपू
र्णसात्त्। पु॰ की॰ ॥शुभदं शुभदं दातिय:॥ श्रीकृष्ण: तस्मदं॥ भवसारं भवेसारं सारभूतं
यद्गाभवो मनोभव: कामस्तस्य सारं श्रृंगाररसंपूर्णंयद्गाभवसस्मादिति विश्वसंभव:
श्रीकृष्णस्तस्य सारं सारभूतसुरति विस्तारकं हे घ्नताविद्दवा॥ विधानिभीनवंधादिवा
शाके १७२८ क्षयनाम संवत्सरे आश्विन शुक्लपक्षे [illegible] भृगुवासरे तद्दिने [illegible] कोंचरसिनु
तारामनिंबग्रामस्थगणेनादेडकरेण लिखितं परमार्थं समाप्ति मगमत्॥ श्रीकृष्ण॥

॥ सटीक श्रीगीतगोविंद: समाप्त:॥ श्रीकृष्ण॥

[OrderDescription]
,CREATED=22.09.20 13:57
,TRANSFERRED=2020/09/22 at 14:23:31
,PAGES=196
,TYPE=STD
,NAME=S0003645
,Book Name=M-1656-GEETGOVIND SATIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,